धर्मे हि वेदस्य प्रामाण्यं प्रथमेऽध्याये चिन्तितम् । श्रेयस्साधनतया धर्मत्त्वं गतो यदि विधिशब्देन फलत्त्वं व्यापारस्य बोध्यते ततो वेदस्य धर्मे प्रामाण्यविचारः प्रतितिष्ठति । इतरथा·· स्थितः स्यामिति सकलशास्त्रार्थोपयोगिफलवत्त्वमात्राधिकरणे प्रतिपाद्यते । एवं सर्वशा ...विशेषनिरूपणार्थेऽधि.... ।

Colophon: (Leaf No. 206)

इति श्रीमहोपाध्याय पार्थसारथि विरचिते तन्त्ररत्ने पञ्चमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ॥

श्रीमद्दुण्डिराजाय नमः ॥

Subject: Tantraratnam, IV—1 to VI—1.

Remarks:—The Ms. is in a decaying condition.

॥ लघुवार्त्तिकटीका—लघुन्यायसुधा ॥

6803. LAGHUVĀRTTIKAṬĪKĀ—LAGHUNYĀYASUDHĀ.

J. L. Collection No. 9.

Substance—Paper. Size—9⅓ × 4¼ inches. Sheets—423 (2-9 are missing). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—6340. Author—Uttamaślokatīrtha. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

श्रीदक्षिणामूर्तये नमः ॥

अर्थवादमन्त्रनामधेयानि न धर्मे प्रमाणानि । तेभ्यस्तत्वमित्यनुदयात् अर्थवादानाञ्चाख्यायिकादिप्रतिपादनेन निराकांक्षतया सन्निहितविध्येकवाक्यत्वायोगात् । अध्ययनविधेश्च तदंशे अदृष्टार्थत्वादिति चेत् मन्त्रार्थवादप्रमुखाः प्रमाणानीति वार्त्तिके ।

End:

आर्त्विज्यमध्ययनंसम्पन्नास्त्रयोऽपि कुर्युः याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपाया इति नियमस्य पुरुषार्थत्वात् । तदुक्तम् ॥ धने पुरुषः प्रत्यवेयान्नं क्रतुवैगुण्यं (?) । अत स्त्रयोप्यृत्विजः सर्वकर्मस्विति चेदार्त्विज्यं ब्राह्मणा एवं कुर्युः सर्वेषु कर्मसु ॥ ब्राह्मणानामार्त्विज्यमिति यज्ञसूत्रकारः क्रत्वर्थे वापि स्मरति। याज्ञवल्क्योऽपि ॥

"प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा" इति ।

श्रीमद्रामायणेऽपि

"क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥"

इति क्षत्रियस्य याजकत्वनिराकरणात्क्रतुवैगुण्यमेव दर्शितम् । "राजयाजकयाज्यस्य विनश्यति यथा हविः ।" इति हविर्नाशेन क्रतुवैगुण्यमेव दर्शयति । लिं...नि(?) च ब्राह्मणानामिदं हविरित्यादीनि तत्र तत्रोपलभ्यन्ते । तस्माद्ब्राह्मणानामेवार्त्विज्यं ॥ २६ ॥

Colophon:

जैमिनीयन्यायपुष्पमालेयं परमेश्वर ।
त्वत्पादयुग्मभूषास्तु ऋजुना मां पथा नय ॥ १ ॥

विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथितास्फुटम् ॥ २ ॥

इति लघुवार्त्तिकटीकायां लघुन्यायसुधाख्यायां द्वादशस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः । लिखितं हरिपाण्डे ब्राह्मण । गाम्भीरेरिदम् ।

Subject: Laghuvārttikaṭīkā otherwise known as Laghunyāyasudhā I-XII.

Remarks:—The Ms. is in good condition. On the title page is given

इदं पुस्तकं रंगभट्टभट्टगोस्वामिनाम् ॥

On the last sheet is given,

गंभीरराजात्मजस्येदं ।।

Laghunyāyasudhā is a running commentary on a small scale on Kumārila's Vārttika. It is called in the colophon Laghuvārttikaṭīkā. Its author is Uttama Śloka Tīrtha. Perhaps he is identical with the Vedāntic writer of the same name the author of the Vedāntalaghusūtravārttika, etc., and the preceptor of Svayamprakāśayati

---

।। न्यायामोदः ।।

6804. NYĀYĀMODAḤ.

J. L. Collection No. 596.

Substance— Paper. Size—9½ × 5 inches. Sheets—40. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Bālakṛṣṇānanda. Complete. Not printed

Beginning:

श्रीगणेशाय नमः ।

कल्याणगुणनिवासः
श्रीमद्रघुनाथमुनिचरणयुगलम् ।
ध्यायन्न्यायामोदं
भद्रं विरचयति बालकृष्णेन्द्रः ।।

अथातो धर्मजिज्ञासा ।। कर्ममीमांसा विषयस्था आरम्भणीया वा न वा विचारणीयं । किं स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना सा विधीयते वा न वा इति

तदर्थमिदं विचारणीयम् । किमध्ययनकरणकभावनायाः स्वर्गः फलं उतार्थावबोधः फलमिति । किंचातः । यदि स्वर्गफलं तस्याध्ययनमात्रादेव सिद्धेः मीमांसा न विधीयत इत्यनारम्भणीया सा । यद्यर्थावबोधः फलं तस्य तां विना।सिद्धेः विधीयत इत्यारम्भणीयेत्येतदतो भवति । तत्र पूर्वः पक्षः । अध्येतव्य इति तव्यप्रत्ययेन भावनायामभिहितायां भाव्यापेक्षायां विश्वजिन्न्यायेन स्वर्गः कल्प्यः ।न च रात्रिसत्रन्यायेन "यं यं क्रतुमधीते तेन तेनास्येष्टंभवती" त्यर्थवादप्रतीतस्य भाव्यत्वमिति साम्प्रतम् । तस्य ब्रह्मयज्ञाध्ययनफलत्वेन ग्रहणाध्ययनफलत्वाभावात् । अध्ययनं हि चतुर्विधं ग्रहणाध्ययन ब्रह्मयज्ञाध्ययन धारणाध्ययन प्रायश्चित्ताध्ययन भेदात् ॥ तत्राध्ययनस्य विश्वजिन्न्यायेन स्वर्ग एव भाव्यः ॥

End:

किम् प्राप्तस्याङ्गत्वस्य बाध उतानुष्ठानस्येति । नाद्यः, अन्यत्वमन्यातिदेशप्रमाणकस्य बाधासम्भवात् । अनुष्ठानस्यैव बाधाभ्युपगमाच्च द्वितीयः । अनुष्ठानस्याप्राप्तत्वाच्चेत्सिद्धं यत्प्राप्तमङ्गत्वं न तस्य बाधः यस्यानुष्ठानस्य बाधो न तत्प्राप्तमिति । एवं सति मुख्यार्थविवक्षाशूरः गुरुरुपेक्ष्य इति ॥

Colophon:

॥ इत्यतिदेशविवेकः ॥

997

R
R.
016.4912
Sa7D
V.12

इति श्रीपरमंहसपरिव्राजकाचार्यानेकाशिष्यवृन्दनिषेवित श्रीराघवेन्द्र-
सरस्वती (शिष्य) श्रीबालकृष्णेन्द्रसरस्वतीविरचितो
न्यायामोदः समाप्तः ॥
श्रीसाम्बाशिवार्पणमस्तु ॥

Subject: Nyāyāmodaḥ.

Remarks:—The Ms. is in good condition. On the title page is given

न्यायामोदपुस्तकं गाम्भीरेः रंगभट्टभट्टगोस्वामिनो ॥

This work is a running Vṛtti on the Sūtras and the author Bālakṛṣṇānanda is the pupil of Rāghavendrasarasvatī. The latter may be identical with the author of Mīmāṃsāsūtradīdhiti or Nyāyāvalīdīdhiti. Bālakṛṣṇānanda is identical with Kṛṣṇānanda, the author of the Advaitic work, Siddhānta Siddhañjana.

॥ जैमिनीयसूत्रवृत्तिः—फलवती ॥

6805. JAIMINĪYASŪTRAVṚTTIḤ—PHALAVATĪ.

Burnell's Catalogue No. 9594. Page 82. Left column.

Substance—Palm leaf. Size—$13\frac{1}{2}\times1\frac{1}{2}$ inches. Leaves—160 (97-246) Lines—10 to 14 to a Page. Script—Grantha. No. of Granthas—4750. Author—? Incomplete. Not printed.

Beginning:

.... प्रयोजनत्त्वं(त्वनुष्ठान) रूपं अनियमानियमाभ्यां

व्याख्याति ॥ ७ ॥ तथा सोमाविकारो...मा स्यात् । सोमविकारेषु गवादिष्वेकाहेषु सन्देहः । दर्शपूर्णमासाभ्यां प्राक्... प्रयोक्तव्या । उतोर्ध्वमेवेति । सोमविकारो वा.... मासाभ्यां ऊर्ध्वमेव स्यात्— यथा दर्शपूर्णमासोत्तरकालं सोमस्यानुष्ठानं । तथादिनप्राक् दर्शपूर्णमासाभ्यां वैकृतानुष्ठानं । तथा हि । कस्मात् । आर्थिकं च.... न प्रतिविशतीत्युक्तं । दर्शपूर्णमासोत्तरकालता तु शाब्दी । सैव चोरके श्रुति (?) दृश्यते इत्यर्थः । प्रयोजनत्त्वं त्वनुष्ठानरूपं प्राग्वत् पक्षयोस्स्पष्टं ॥ इति जैमिनीयसूत्रवृत्तौ फलवत्यां पञ्चमस्याध्यायस्य चतुर्थः पादः ।

End:

'समानदेवताकवाक्यं स्याद्वा विभक्तत्वात्'

* *

रथन्तरस्वयोन्युत्तरयोर्गाने च गत्या विभक्तत्वादेकदेवताक....ष्वन्तर स्वरूपाख्यस्याविभा........स्वयोन्युत्तरयोरेव स्यात् । नान्यथा । प्राकृतोक्तया गाने तु देवतासाम्यस्य च्छन्दः— साम्यस्य चाभावान्न प्रकृति... । प्रयोजनन्त्वनुष्ठानरूपं कोटिभ्यां प्रद्योतितम् ।.... ओं । "ग्रहाणां देवतान्यत्वे.... रस्यात ।" द्वितीयाध्यायोक्तस्तुतशस्त्राधिकरणप्रयोजनकथनपरमिदं सूत्रं । स्तुतश.... ॥

Colophon: Leaf No. 225.

इति जैमिनिसूत्रवृत्तौ फलवत्यां दशमस्याध्यायस्य

द्वितीयः पादः ॥

Subject: Jaiminīyasūtravṛtti known as Phalavatī.

Remarks: —The Ms. is in a decaying condition. There is a transcript copy of this Ms. in this library T. V. No. 78A & 78B.

This Ms. begins with the closing portion of the 4th Pāda of the 5th Adhyāya and runs up to half of the 10th Adhyāya.

The author of this Vṛtti on the Sūtras of Jaimini is not known. That he may be Upavarṣa is only the fond but futile hope of Dr. Burnell.

॥ मीमांसाकौस्तुभः ॥

6806. MĪMĀMSĀKAUSTUBHAḤ.

Burnell's Catalogue No. 2097. Page 88. Right column.

Substance—Paper. Size—10½ × 4 inches. Sheets—73. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1440. Author—Khaṇḍadeva, Incomplete. Printed.

Beginning:

विघ्नध्वान्तनिवारणैकतरणिर्भक्तैकचिन्तामणिः
विद्याकाननगाहनैकसरणिः माचित्तभूषामणिः ।
भूयादेष कुतर्ककर्कशधिया हन्तीय हर्तीः(हर्तापहर्ता) तथा
मोहानां सुधियां सदैव सवि(पि)ता कात्यायनीशात्मनः(जः) ॥

वृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
माचित्तरङ्गचारी भूयान्नृत्यप्रियः कृष्णः ॥

शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमाङ्ग(केय)स्य ।

श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥ ३ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

अत्र सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं । वायुर्वै क्षेपिष्ठा देवतेत्यादयोर्थवादा धर्माधर्मयोः प्रमाणं न वेति सन्देहः ।

End:

तथा करणमन्त्राणां विकल्पोद्देशेय(?) ।
सर्वमेतत्तदासिध्येन्मन्त्रार्थश्चेद्विवक्षितः ।
तस्मादर्थप्रत्यायनार्था मन्त्रा इति सिद्धम् ॥
प्रामाण्यम् ॥

मीमांसाम्बुनिधिं प्रमथ्य विविधैर्न्यायोच्चयैर्निर्झरैः
कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम् ।
यद्धालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय सपरं यः कौस्तुभाख्यो मणिः ॥

Colophon:

इति श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभाख्या प्रथमेऽध्याये द्वितीयाङ्घ्रेः ॥

इति श्रीमत्पूर्वोत्तरमीमांसापारावारपारीणश्रीरुद्रदेवसूनोः खण्डदेवस्य कृतौ मीमांसाकौस्तुभे प्रथमाध्यायस्य द्वितीयः पादः ॥

Subject: Mīmāmsākaustubha I. 2.

Remarks:—The Ms. is in a fairly good condition.

Khaṇḍadeva, son of Rudradeva and teacher of his commen-

tator, Śambhubhatta, died in Samvat 1722 or A. D. 1665 as is seen from a verse at the end of Śambhubhaṭṭa's commentary on the Bhāṭṭadīpika. Khaṇḍadeva has written besides Mīmāmsākaustubha Bhāṭṭadīpikā and Bhāṭṭarahasya also. The Kaustubha begins with the II Pāda of the I Adhyāya.

The Mīmāmsā Kaustubha has been published from Kāñcīpura, in the Śāstramālā Series, 1904.

MIMĀMSĀKAUSTUBHA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6807	B. L. 12347	Paper.	12×6¼	135	11	Devanāgarī	Incomplete; I. 2–3,
6808	„ 2095a	„	8¼×3	7	8	„	„ II. 2. Sūtras 2–5
6809	„ „ b	„	„	49 (8–51)	6 or 7	„	„ II. 2. Sūtras 5–15
6810	„ 2096	„	10½×4½	33	9	„	„ II. 1.
6811	„ 2098	„	12×4	131	8 or 9	„	„ II. 2.
6812	S. S. 28	Palm leaf.	12½×1⅛	105	„	Grantha.	„ II. 1—2; Sūtras 3.

॥ भाट्टरहस्यम् ॥

6813. BHĀṬṬARAHASYAM.

Burnell's Catalogue No 2072. Page 85. Right column.

Substance—Paper. Size—12×6½ inches. Sheets—126. Lines– 11 to a Page. Script—Devanāgarī. No. of Granthas —2770. Author—Khaṇḍadeva. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः ।

स्मृत्वा स्मृत्वा पुराराति तत्प्रसादावलम्बनात् ।
रहस्यं भाट्टतन्त्रस्य विशदीकर्तुमीश्महे ॥
यज्ज्ञानान्न्यायसाहस्री स्फुटीभवति तत्त्वतः ।
तद्रहस्यं खण्डदेवः प्रकाशयितुमुद्यतः ॥

तत्र द्वादशलक्षण्यां धर्माधर्मावेव जैमिनिनानुष्ठानोपयोगितया विचारितौ ॥

End:

तदेव लिङ्गसंख्याव्यतिरिक्तसुबर्थमात्रस्य सिद्धो भावनान्वयः ॥

नवीनानां नानामननविशदानामयमहो
सुयुक्तीनां पुञ्जैरिह विरचितः कोपि जगति ।
महात(न)र्कैस्तर्कग्रथिततमसज्ञाततमसां
सुधांशुर्मीमांसा मतकुमुदपूरस्य जयतु ॥

Colophon:

इति श्रीखण्डदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः सम्पूर्णः ॥

Subject: Bhāṭṭarahasya. Pariccheda. I

Remarks:—The Ms. is in good condition.

This is another work of Khaṇḍadeva referred to above. The work has been published by the Sudarśana Press, at Kāñcipuram, Madras.

BHĀṬṬARAHASYA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6814	B. L. 2078	Paper.	$9\frac{3}{4} \times 8\frac{1}{2}$	157	7	Devanāgarī.	Incomplete; wants beginning; available to the end.
6815	„ 9557	Palm leaf.	$18\frac{1}{2} \times 1\frac{3}{4}$	61	10 or 11	Grantha.	„ Wants end
6816	J, L. 100	Paper.	$10\frac{1}{8} \times 4\frac{3}{4}$	12	9	Devanāgarī.	A fragment from the beginning.
6817	„ 2	„	18×5	91	11	„	Incomplete ;Pariccheda I only.
6818	S. S. 26 a	Palm leaf,	$18\frac{3}{4} \times 1\frac{1}{2}$	69	8	„	„ wants end.

DETAILED REMARKS
on the
MSS. IN THE ABOVE TABLE.

6814 After the colophon is given:

निजशिष्येण गिरिणा स्वगुरुप्रीत्यर्थं संपादितं। अत्र सन्देहो नास्ति ।

A portion of Nārāyaṇabhaṭṭa's Antyeṣṭipaddhati is found at the end.

6817 On the title page is given:—

‘ गङ्गाधरदीक्षितानामिदं पुस्तकमिदमिति ज्ञेयम् । ’

6818 The other work contained herein is Prāmāṇyavāda.

॥ भाट्टदीपिका ॥

6819. BHĀṬṬADĪPIKĀ.

S. S. Collection No. 144.

Substance—Palm leaf. **Size**—13¾ × 2 inches. **Leaves**—314 (leaf No. 311 is missing): **Lines**—12-14 to a Page. **Script**—Grantha. **No. of Granthas**—1100. **Author**—Khaṇḍadeva. Incomplete. Printed.

Beginning:

विश्वेश्वरं नमस्कृत्य खण्डदेवस्सतां मुदे ।
तनुते तत्प्रसादेन संक्षिप्तां भाट्टदीपिकाम् ॥

इह खलु निखिलपुमर्थानर्थसाधनधर्माधर्मौ सांगोपाङ्ग-वेदाध्ययनैकसमधिगम्यविचारमन्तरेण न भाव्यायालमिति तदर्थप्रदर्शनाय परमकारुणिको भगवान् जैमिनिराचार्यः

* * *

षोडशलक्षणीमभ्यार्हितां विद्यां प्रकटीचकार । अधिकरणं तु वेदवत्षडङ्गम् । यदाहुः—

"विषयो विशयश्चैव + प्राभ्रोऽधिकरणं विदुः" इति ॥

प्रयोजनं चेति क्वचित्पाठः । संगतिस्तु प्रसङ्गादिभेदाद्बहुविधा । तत्रेदमाद्यमधिकरणं "अथातो धर्मजिज्ञासा ।"

* *

End:

ननु क्वापि ब्रह्म...स्तोत्रप्रगाथस्तदेवं पञ्चसुमास्सुबार्हताः प्रागाथा आप्यन्त इति लिङ्गद्वयोः प्रग्रथने उपपद्यते । न तु त्रिचगाने क्रियमाणे भाष्यकारलेखनादष्टोत्तरशतद्वयसंख्याकानामृचां पञ्चप्रगाथसम्पादकदशकन्यूनत्वादष्टनवत्यधिकशतावशिष्टानां.... ॥

Colophon: Page 308.

इति भाट्टदीपिकायां नवमस्य प्रथमः पादः

Subject: Bhāṭṭadīpika—I-IX. 2

Remarks: —The Ms. is in good condition. Between pages 310 & 312 there are 5 loose leaves dealing with Mīmāmsā. At the end there are some loose leaves. One of them gives the first few sūtras of Jaimini. This Ms. abruptly ends in the middle of II pāda of IX Adhyāya.

A leaf at the beginning gives—

धरणीमण्डलेऽस्मिन्का माधुर्यं वहते भृशं ।
अत्रोत्तरं यत्र....त् मालती क्षुत्तरस्य तत्(?) ॥

கிருஷ்ணசிவன் பெண்டு பெழுதினமானது. பார்திவ வருஷம் ஆணி மீ ஆதித்யவாரம்.

Bhāṭṭadīpikā of Khaṇḍadeva is a commentary on the Adhikaraṇasūtras of the Mīmāṃsā. Khaṇḍadeva has written only from the II Pāda of the I Adhyāya.

The work has been edited by Mr. A. Mahādeva Śāstri in the Mysore Government Oriental library Series: Nos. 35, 40, 46 49. It has also been edited by Mahāmahopādhyāya Anantakṛṣṇaśāstri with Śambhubhaṭṭīya in the Nirṇayasāgara Press.

BHĀṬṬADĪPIKĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6820	B. L. 2071	Paper.	12×6½	107	12 to 14	Devanāgarī.	Incomplete; I. 2—III. 5
6821	„ 2069a	„	11×5	16	14	„	„ I. 2-4
6822	„ „ b	„	„	16	14	„	„ II. 1-4
6823	„ „ c	„	„	63	„	„	„ III. complete; 1-8.
6824	„ 2070	„	10½×5½	125	10	„	„ „ „
6825	S. S. 81	Palm leaf.	12¾×1⅜	208	9-12	„	„ From the beginning (I.1) to
6826	N. S. 58	Paper.	12½×4¾	101 (16+20+65).	12	„	„ I. 2—III. 8.
6827	J. L. 249	„	11¼×4¾	16	11	„	„ II. 1-2; Sūtra 27
6828	S. S. 88	Palm leaf.	17×1	143 (120+23)	8	Grantha.	„ VI. 1—IX. 1 & II. 2.

BHĀṬṬADĪPIKĀ (Contd).

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6829	B. L. 2067	Paper.	9×4	67	12–13	Devanāgarī.	Incomplete; IX. Up to the 4th pāda.
6830	„ 9556	Palm leaf.	15½×1½	165 (217–381)	6–8	Grantha.	„ X.
6831	S. S. 30	„	12½×1⅓	83	13–14	„	„ XI, XII & VII & VIII.

DETAILED REMARKS
on the
BHĀṬṬA DIPIKĀ MSS. IN THE ABOVE TABLE.

6821 This Ms. has this verse at the beginning—

नन्दहस्तमवलम्ब्य पाणिना
मन्दमन्दमरविन्दलोचनः ।
सञ्चरन् कनककिङ्किणीरवैः
सम्ततं मम तनोतु मङ्गलम् ॥

6826 This Ms. is dated Samvat 1857 (i.e.) A. D, 1800.

6829 On the title page is given—

'भाट्टदीपिका केशवस्य'

॥ भाट्टदीपिकाव्याख्या—प्रभावली ॥

6832. BHĀṬṬADĪPIKĀVYĀKHYĀ—PRABHĀVALĪ.

Burnell's Catalogue No. 2066a. Page 88. Right column. **Substance—Paper. Size—12×5½ inches. Sheets—111. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Śambhubhaṭṭa.** Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः ॥
अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ॥
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥

यो वेदशास्त्रार्णवपारदृश्वा
यज्ञादिकर्माचरणेऽतिदक्षः ।
सदाशिवाराधनशुद्धचित्तः
तं बालकृष्णं पितरं नमामि ॥

श्रीखण्डदेवं प्रणिपत्य सद्गुणं(रुं)
मीमांसकध्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थं तत्कृतौ
प्रभावलीटिप्पणमातनोम्यहम् ॥

यद्यप्यत्र गुरोः कृतावपि मयाप्युद्भाव्यते काचना
सम्भूतिस्तदपि प्रचारचतुरे नैषा पुरोभाषिता ।
किन्तु क्ष्मातिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादराः
मद्वाक्यं परिहृत्य तत्कृतिमलंकुर्वन्त्विवयं मे मतिः ॥

अत्र यद्यपि बलाबलाधिकरणसमाप्तिपर्यन्तं स्वकृतेन कौस्तुभग्रन्थेन व्याख्यातार्था भाट्टदीपिका भवतीत्यतस्तदन्तं विहाय टिप्पणं कर्तव्यमित्याज्ञा पूज्यपादानामासीदिति तदन्त ग्रन्थ टिप्पणं कर्तुं न युक्तम् । तथापि तदसंग्रहीतार्थानां मूलाक्षरारूढत्वज्ञापनाय लोकोपकाराय च कौस्तुभदर्शितमार्गेणैवादितष्टिप्पणमारभते । तत्र व्याख्यास्यमानार्थवादाधिकरणे यदुपोद्घातत्वेनावश्यापेक्षितं तत्किञ्चिदादौ निरूप्यते । तत्र ताव-

त्पूर्वचरणे अथातो धर्मजिज्ञासेति शास्त्रारम्भसूत्रेण प्रमाणस्वरूपसाधनफलैस्साङ्गासैर्विचारयिष्यमाणः सकलो धर्माधर्मप्रमेयरूपश्शास्त्रार्थः प्रतिज्ञातो महर्षिणा जैमिनिना ॥

End:

अध्यायार्थमुपसंहरति । तदेवमिति नामधेयस्याविध्यर्थवादमन्त्रसामीप्येऽपि निरूपणक्रममादाय स्मृत्याचारयोस्तदपेक्षया प्राथम्येनोपादानं मानाधीनत्वेन मेयसिद्धेरावश्यकस्य प्रमाणनिरूपणस्योत्तरत्र निरूपणे हेतुत्वसूचनद्वारा वक्ष्यमाणाध्यायार्थां शिष्योपरमनिरासार्थं प्रतिजानीते अतः परमिति । स्वरूप....नस्योक्ताभ्यां प्रमाणलक्षणाभ्यामेव सिद्धे रुत्तरविचारवैयर्थ्यं परिहर्तुं भेदादिनेत्युक्तम् । आदिपदेन विनियोगप्रयोगाविधिविषयत्वादिरूपान्तरस्यापि ग्रहः ।

गम्भीरार्थपदेऽध्याये यदकार्षं नु टिप्पणम् ।
तत्साधनं गुरुकृपा न तु मे बुद्धिवैभवम् ॥

Colophon:

इति श्रीपूर्वोत्तरमीमांसापारावारीणधुरीण श्रीखण्डदेवान्तेवासि कविमण्डन शम्भुभट्टविरचितायां भाट्टदीपिकाप्रभावल्यां प्रथमस्य चतुर्थः पादः । समाप्तश्चायमध्यायः ॥

Subject: Bhāṭṭadīpikāvyākhyā—Prabhāvaḷī. I Adhyāyā complete.

Remarks:—The Ms. is in good condition.

Śambhubhaṭṭa says that he finished his commentary on the

Bhāṭṭadīpikā, in Samvat 1764 or A. D. 1707. He was the pupil of Khaṇḍadeva and had the title Kavimaṇḍana. He was the son of Bālakṛṣṇakavimaṇḍana.

The work has appeared in the Nirnaya Sagar Edition of the Bhāṭṭadīpikā. He is the author of a Metrical summary of the Adhikaraṇas of Mīmāmsā by name Pūrvamīmāmsādhikaraṇasaṅkṣepaḥ.

BHĀṬṬADĪPIKĀVYĀKHYĀ—PRABHĀVALĪ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6833	B. L. 2066b	Paper.	12×5¼	131	11	Devanāgarī.	Incomplete; II Adhyāya complete.
6834	„ „ c	„	„	349	„	„	„ III „ „
6835	„ „ d	„	„	116	10	„	„ IV „ „
6836	„ „ e	„	„	88	„	„	„ V „ „
6837	„ „ f	„	„	69	8	„	„ VII „ „ The VI is thus missing.
6838	„ „ g	„	„	20	10	„	„ VIII „ „
6839	„ „ h	„	„	40	15	„	„ XII „ Chap. IX, X & XI are thus missing.

BHĀṬṬADĪPIKĀVYĀKHYĀ—PRABHĀVALĪ (Contd.)

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6840	Ms. Not 13960 noticed by Dr. Burnell.	Paper.	8¼×6½	62 (101-162)	20	Grantha.	„ Up to the end of chap. II.

DETAILED REMARKS
on the
BHĀṬṬA DĪPIKĀ—PRABHĀVALĪ MSS.
IN THE ABOVE TABLE.

6838 The colophon of this Ms. which represents the last Chapter of the work has these verses on the date of the composition of this work and of the demise of Khaṇḍadeva:—

गुरूपदेशाच्च विभावनाभिः
निर्णीय मूलार्थमतिश्रमेण ।
कृतं मया टिप्पणमेतदार्यै-
स्संशोधनीयं गुणदोषविद्भिः ॥ १ ॥

न यस्य शास्त्रेऽस्ति गतिर्न बुद्धेः
कुशाग्रता नो बुधसंगतिश्च ।
अथापि सोऽहं प्रचकार टीकां
गुरुप्रसादैकसमाश्रयेण ॥ २ ॥

जानन्तु मूलार्थमथाक्षिपन्तु
स्वच्छन्दमन्ये च समर्थयन्तु ।
तथापि यः श्रीगुरुसेवनाप्त-
तत्त्वार्थवक्ता विरलस्स कोऽपि ॥ ३ ॥

अधीतिकाले कथितं प्रमेयं
यत्पूज्यपादैर्लिखितं मया तत् ।
अतिक्रमस्तेन चिरन्तनानां
जातोऽपि नासौ मम दोषकारी ॥ ४ ॥

श्रीबालकृष्णकविमण्डनसूनुशम्भोः
श्रीखण्डदेव चरणांबुजसेवकस्य ।
एषा कृतिर्विविधदोषयुतापि दृश्या
मूलार्थशोधनकरीति सदाशयानाम् ॥ ५ ॥

प्रभावली हार्दतमोविनाशिनी
मीमांसकानां स्पृहणीयदर्शना ।
श्रीपार्वतीवल्लभपादपद्मयो-
र्नीराजनार्थं भवतादियं मम ॥ ६ ॥

यः खण्डदेवनामासीत् श्रीधरेन्द्राभिधां गतः ।
स गुरुर्मे विजानातु टीकाकृति परिश्रमम् ॥ ७ ॥

वेद ऋतु मुनि वसुभिः (1764) गणिते वत्सरे शुभे ।
ज्येष्ठे कृष्णे रुद्रतिथावियं टीका समापिता ॥ ८ ॥

वर्षे नेत्र द्वि सप्त द्विजयति गणिते (Samvat 1722) मासि...
वारे जैवे प्रभाते सकलपितृतिथौ प्रोष्ठपद्याः परस्यां ।
काश्यां श्रीब्रह्मनाले निरुपमचरितः खण्डदेवाभिधानः
प्राप्तः श्रीब्रह्मभावं विबुधवरगुरुः ब्रह्मवर्यो यतीन्द्रः ॥ ९ ॥

इति श्री + समाप्ता चेयं प्रभावलीटीका ।

6840 This Ms. is on modern paper, and in the form of a modern note book.

॥ तन्त्रशिखामणिः ॥

6841. TANTRAŚIKHĀMAṆIḤ.

Burnell's Catalogue No. 9597. Page 84. Left column. Substance—Palm leaf. Size—14½×1¾ inches. Leaves—43. Lines—9-10 to a Page. Script—Grantha. No. of Granthas—2500. Author—Rājacūdāmaṇidīkṣita. Incomplete. Not Printed.

Beginning:

अभ्युदये कालापराधादिज्या चोदना स्याद्यथा पञ्चशरावे ॥

पूर्वत्र द्रव्यदेवतात्मकयागान्तरङ्गभूतद्रव्यापचारनिमित्तकप्रायश्चित्ताधिकाराश्चिन्तितः । इह तु बहिरङ्गकालाद्यपराधनिमित्तप्रायश्चित्ताधिकाराश्चिन्त्यत इति पादान्तरत्वमानन्तर्यं च ध्येयम् । दर्शस्यामावास्यायामग्न्यन्वाधानवत्सापाकरणव्रतोपायनवेदिकरणसायंदोहादीनि कानिचिदङ्गानि कर्तव्यानि प्रतिपदि त्वितराण्यङ्गानि प्रधानानि च कार्याणीति स्थितिः । तत्र यदि कश्चिच्चतुर्दश्यामेवामावास्याभ्रमादग्न्यन्वाधानादिकं कुर्यात्तत्रैवं प्रायश्चित्तं श्रूयते । "यस्य हविर्निरुक्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान्विभजेद्ये मध्यमा स्युः तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानि द्रायप्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तां विष्णवे शिपिविष्टाय श्रिते चरुमिति ।

End:

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भेदः स्यात् ।

पूर्वस्मिन्नध्यायषट्के उपदेशात्मकप्रमाणव्यापाराश्चिन्तितः उत्तरस्मिन् अध्यायषट्के अतिदेशात्मकप्रमाणव्यापाराश्चिन्तयिष्यते । ततश्चेत्थमर्थं कुर्यादित्येकमर्थं विधाय तद्वत्कुर्यादित्यर्थान्तरं विधातव्यमित्युपदेशपूर्वत्वादतिदेशस्य षट्कयोर्हेतुहेतुमद्भावसङ्गतिः । ननु सर्वपृष्ठायां किं सकृदुत्तरार्धत्वात्स्विष्टकृतेव देयं उत कर्मभेदात्प्रतिकर्म तत्तदवधानस्योत्तरार्धादवदेयमित्यदिष्टसकृदवदानरूपार्थस्तृतीये चिन्तित इति कथं पूर्वषट्के उपदेशविचार इत्युक्तमिति चेन्न । सर्वपृष्ठायां हि नातिदेशविचारः किंतूत्तरार्धात्स्विष्टकृतेऽवद्यतीत्युपदेशः किं प्रधानावदानस्योत्तरार्धावधानं विधत्ते? किं वा कृतकरस्य द्रव्यस्योत्तरा.... ॥

Colophon: (Sheet No. 43).

इति षष्ठस्याध्यायस्याष्टमः पादः ।

समाप्तश्चाध्यायः ॥ हरिः ओम् ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

सर्वस्य प्रकृतेर्यस्मात्समग्रगुणसम्पदः ।
काङ्क्षितानि लभन्तेऽन्ये तमीडे सोममव्ययम् ॥

अस्ति गोविन्दयज्वेन्द्रनागमाम्बातपःफलम् ।
श्रीवेङ्कटेश्वरमखी सर्वतन्त्रस्वतन्त्रधीः ॥

येनेष्टं साग्निचित्याप्तवाजपेयादिभिर्मखैः ।
कृतं साहित्यसाम्राज्यं नाम काव्यमनुत्तमम् ॥
व्यतानि शुल्बमीमांसा तथा कर्मान्तवार्तिकम्
टुप्टीकायाः कृता टीका वार्तिकाभरणाभिधा ॥
प्रतिष्ठापितचोलक्ष्माजानेस्तस्य नियोगतः ।
चूडामणिर्वितनुते यज्वा तन्त्रशिखामणिम् ॥
गोविन्ददीक्षितचिरन्तनभाग्यराशेः
श्रीवेङ्कटेश्वरमखीशितुराज्ञया मे ।
तन्त्रार्णवं तरितुमाहितसाहसस्य
सांयात्रिकीभवतु तत्करुणाकटाक्षः ॥
श्रीवेङ्कटेश्वरमखिप्रणीतं प्रविविक्षुभिः
वार्तिकाभरणांभोधिं नौरियं क्रियतां कृतिः ॥
श्रीमन्मान्यशाकस्याब्दे (1551) हायने चेश्वराभिधे ।
चूडामणिः कलयते यज्वातन्त्रशिखामणिम् ॥
श्रीरामचन्द्रचरणारविन्दाभ्यां नमः ॥

Subject: Tantraśikhāmaṇi.

Remarks:—The Ms. is in good condition.

The author of Tantraśikhāmaṇi, Rājacūḍāmaṇi Dīkṣita, is the same as the author of Kāvyadarpaṇa, Kamalinīkalahamsa, Rukmiṇīkalyāṇa etc. He was the son of Ratnakheṭa Śrīnivāsa Dīkṣita. For detailed information about him and his contemporary kings and poets vide, introduction to the edition of his Rukmiṇī Kalyāṇa, published at Adyar, Madras,

His other Mīmāṃsa work is a commentary on the Śāstra dīpikā and it is described later.

At the end of the colophon above, the date of the composition of this work is given— धीमन्मान्ये शकस्याब्दे (i.e.) Śaka 1559 corresponding to A. D. 1637, the year in which Nīlakaṇṭha Dīkṣita wrote his Nīlakaṇṭha Vijaya Campū.

The Tantraśikhāmaṇi is a commentary on the Vārttikābharaṇa of Veṅkatesvara Dīkṣita andit is available here only from the 6th Adhyāya.

॥ भाट्टचिन्तामणिः ॥

6842. BHĀṬṬACINTĀMAṆIḤ.

Burnell's Catalogue No. 2068 a. Page 83. Right column. Substance—Paper. Size—11½×5 inches. Sheets—27. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Gāgābhaṭṭa. Complete. First Adhyāya only, Printed.

Beginning:

श्रीमहागणपतये नमः ॥

विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ॥

विधेः प्रामाण्यं निरूप्य धर्मप्रमाणनिरूपणप्रसङ्गादर्थवादादिप्रामाण्यं निरूप्यते । विध्यर्थवादमन्त्राणामिति । वार्तिकस्य विधिपदनामधेयपरं स्तुतिस्तुत्यसंबन्धप्रामाण्यप्रतिपादनपर मर्थवादकल्प्यविधिपरं वा व्याख्येयम् । नन्वस्तु स्ववाच्यप्रवर्तनाविषयभावनाविशेषणीभूतयागादाविष्टानिष्टसाधनताबोधेन विधिनिषेधयोर्धर्मा-

धर्मप्रामाण्यम् । वायुर्वै क्षेपिष्ठा देवतेत्यर्थवादानां तु सत्यप्यपौरुषेयत्वे न तथा प्रामाण्यं सम्भवति तदनवगतेः । नानधिगतार्थगन्तृत्वरूपप्रामाण्यसम्भवः । तदर्थस्य लोकावगतेः । नाप्यबाधितार्थः प्रजापतिरात्मनो वपामुदखिददित्यादावसत्वात् । वाक्यार्थमर्यादया इष्टसाधनप्रमाजननासम्भवात् । अनुपपत्तिज्ञानाभावेन लक्षणाध्याहाराद्यसंभवाच्च दूरापेतं धर्मप्रामाण्यमिति चेत् लक्षितप्राशस्त्यप्रकारकेष्टसाधनयागादिविशेष्यकशाब्दप्रमितिजनकत्वेन प्रामाण्यसंभवात् ॥ शाब्दप्रवृत्तौ प्रवर्तनाज्ञानस्येव शास्त्रज्ञानस्यापि हेतुताया बहुक्षीरादिवाक्यजन्यप्रवृत्तौ क्लृप्तत्वात् । अध्ययनविधौ प्रयोजनवदर्थज्ञानजनकत्वेन स्वाध्यायस्य भाव्यत्वान्नयोपपत्तेः ॥

End:

अर्थाद्वा कल्पनैकदेशत्वात् ॥

अर्थवादवदेव विधेयनिष्ठयोरपरतयापि सन्दिग्धोद्देश्यार्थनिर्णयः यथा '' स्रुवेणावद्यति, स्वधितिनावद्यति, हस्तेनावद्य त्यञ्जलिना सक्तून् जुहोति ' इत्यादौ स्रुवादिनिष्ठसामर्थ्येन घृतमांसपुरोडाशावदानानामुद्देश्यत्वम् । न च प्रमाणान्तरावगतवस्तुसामर्थ्यापेक्षत्वे वेदस्याप्रामाण्यापत्तिरिति वाच्यम् । शक्तिग्रहादि च तदपेक्षत्वे बाधकाभावात् शाब्दसामर्थ्यस्य आर्थसामर्थ्यानुरोधव्याचित्वात् ।

अत्र च न तत्तद्वाक्यमध्याहृताष्टतादिपदकम् विधायकम् । कल्पितवाक्यान्तरं वेति अर्थात्सामर्थ्यात् कल्पनानिर्णयः एकत्वात्तत्कल्पितपदस्य वैदिकत्वादिति सूत्रार्थः ॥

Colophon:

विश्वामित्रकुलध्वजः समभवद्यो भट्टनारायणः
तद्वंशस्य करीरता भजति यो विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालनात्
तस्य ग्रन्थ इहाभवत्प्रथमकोंऽशो भाट्टचिन्तामणौ ॥

इति गागाभट्टकृत भाट्टचिन्तामणौ प्रथमाध्यायस्य
चतुर्थः पादः ॥

प्रथमाध्यायः समाप्तः ॥

Subject: Bhāṭṭacintāmaṇi, an independent commentary on the Sūtras of Jaimini; I Adhyaya,

Remarks: —The Ms. is in good condition.

Gāgābhaṭṭa, the author of the Bhāṭṭacintāmaṇi, is also called Viśveśvara. He is the son of Dinakarabhaṭṭa, the author of a commentary on the Śāstradīpikā. Kāyasthadharmapradīpa is one among his many other works. He performed the Coronation ceremony of Śivaji in 1674. vide, introduction to the Nirṇaya Sindhu, Nirṇayasāgar edition.

The above work, Bhāṭṭacintāmaṇi is available in print up to the Tarkapāda, having been published by the Chowkhāmba Press, Benares.

BHĀṬṬACINTĀMAṆI.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6843	B. L. 2068b	Paper	11½ × 5	33	12	Devanāgarī.	Incomplete: II Adhyāya only.
6844	,, ,, c	,,	,,	44 (out of 66, 20-41 are missing)	,,	,,	,, III ,, ,,
6845	,, ,, d	,,	,,	22	10	,,	,, IV ,, ,,
6846	,, ,, e	,,	,,	18	10-11	,,	,, V ,, ,,
6847	,, ,, f	,,	,,	84	11	,,	,, VI ,, ,,
6848	,, ,, g	,,	,,	10	12	,,	,, VIII ,, ,, Thus Chap. VII is missing.
6849	,, ,, h	,,	,,	27	11	,,	,, IX ,, ,,
6850	,, ,, j	,,	,,	48	11	,,	,, X ,, ,,
6851	,, ,, k	,,	,,	20	11	,,	,, XI ,, ,,
6852	,, ,, l	,,	,,	17	11-12	,,	,, XII ,, ,,

DETAILED REMARKS

on the Bhāṭṭacintāmaṇi Mss.

IN THE ABOVE TABLE.

6844 After the colophon this additional verse is seen.

सूनोरियं दिनकरस्य कृशापि वाणी
वेणी च चित्तजनुषो हृदि सन्निखाता ।
चेतश्चमत्कृतिविधौसविकासभावे
भावे तथा दिनकरस्य सुतो विदध्यात् ॥

6851 This additional verse is seen at the end of the work in this Ms.—

उदन्वतो हा बत गर्जनाभयात्
सुधां सुधानो विबुधास्त्यजन्ति ।
विज्ञापयामीह कृतांजलिर्मे
क्रुधा बुधा न त्यजतां सुधामिमाम् ॥

6852 This Ms representing the last chapter of the work has these additional verses at the end.

समस्तसुकृतास्थितिस्समभवद्यदीयस्थितौ
प्रयातमनुयातवान् स्वपुरतोऽपि विश्वेश्वरः ।
तमद्य धिषणाबलालपितघोषणप्राक्रियं
भजेम गुरुविक्रमं दिनकरं तमीशात्मकम् ॥

इति श्री + द्वादशाध्यायस्य तुरीयश्चरणः ।
अध्यायश्च समाप्तः ।

सिद्धान्तसूत्राणि तथैव लिङ्गा-
न्यव्याकृतान्याकर एव यानि ।

तेषामिहार्थास्स्फुटमेव गम्या-
स्तदर्थमत्रैव धियं कुरुध्वम् ॥

श्रीजानकीनायक ते प्रसादा-
दासादितो बालकखेल एषः ।
आस्ते ममैषा विषयेषु नाशा
तिष्ठत्यहो ते पददर्शनाशा ॥

॥ तन्त्रसिद्धान्तदीपिका ॥

6853. TANTRASIDDHĀNTADĪPIKĀ.

Burnell's Catalogue No. 2099. Page 85. Right column. Substance—Paper. Size—12×6½ inches. Sheets—243. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—8260. Author—Appayyadīkṣita III. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ।

" अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥"

अखण्डसच्चिदानन्दखण्डचन्द्रशिखण्डिकम् ।
उमया मिश्रितात्मानं परमात्मानमाश्रये ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् तस्मादनित्यमुच्यते । 'वायव्यं श्वेतमालभेत भूतिकामो वायुर्वैक्षेपिष्ठा देवता वायुमेवस्वेन भागधेयेनोपधावति स

एवैनं भूतिं गमयति भवत्येवातिक्षिप्रा देवतेत्याहुस्स एनमीश्वराप्रदह इत्येतमेव सन्तं वायवे नियुत्वत आलभेत ' इत्यादि श्रूयते। तत्र वायव्यं श्वेतमित्याद्यर्थवादानां पूर्वपादान्त्याधिकरणेन वेदावयवत्वाद्विध्युद्देशवत्प्रसक्तं प्रामाण्यमाक्षिप्य समाधीयते । तत्रार्थवादा विध्युद्देशवल्लिङाद्यभावेन धर्माधर्मयोः स्वयं तावन्नप्रमाणानि। नाप्येतमेव सन्तमित्यादि विधिभिराकांक्ष्यन्ते येन तदेकवाक्यतया प्रमाणानि स्युः। प्राशस्त्यपदेन विवक्षितस्य बलवदनिष्टाननुबन्धित्वस्य निरर्थवादस्थले क्लृप्तशक्तिकेन लिङ्गादीनां प्रकृत्योपाधिकत्वाविशेषात् इष्टसाधनत्ववदर्थाच्छब्दतो वा लाभसम्भवे विधीनामपि निराकाङ्क्षत्वादेतेन स्वाध्यायविधिवशात् पुरुषार्थोपाधिकत्वासिध्यर्थमर्थवादाः प्राशस्त्यं लक्षयन्तः प्रमाणानि स्युरित्यपास्तम् ॥

End:

ननु च भूतोपयोगिपुरोडाशकपालं सर्वत्रापि सुलभमिति चेन्न । वर्तमानसम्बन्धिपुरोडाशकपालस्यैवाङ्गत्वेन विधिसम्भवेऽन्यस्यानङ्गत्वमिति न तद्ग्रहापत्तिरित्याद्याकर एव स्फुटम् । पशावनालम्भादग्नीषोमीयं पशुमालभेतेति प्रकृत्य श्रुतं शकृत्संप्रविध्यति लोहितंनिरस्यति इति तथा हृदयस्याग्रेऽवद्यतीत्यादि च । तत्र पशोर्हृदयादि शकृदादि च प्रयोजकं उत शकृदपि न प्रयोजकमिति वि-

श्रयोरपि प्राण्यन्वयवत्वात् अवयव्यपेक्षायां सन्निधानाविशेषात्पशुरुभाभ्यां संबध्यते प्रयुज्यते चेति प्राप्ते… ।

Colophon: Sheet No. 230.

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ श्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्माणधुरंधर महाव्रतयाजि श्रीमदप्पय्यदीक्षित सोदर्या श्रीमदाच्चादीक्षितपौत्रेणालंकारतिलकाद्यनेक प्रबन्धनिर्मातुरप्पय्यदीक्षितस्य पुत्रेण भूमिदेवीनन्दनेन श्रीमदप्पय्यदीक्षित(तेन) विरचितायां तन्त्रसिद्धान्तदीपिकायां तृतीयस्याध्यायस्याष्टमः पादः ।

तृतीय: समाप्त: ॥

Subject: Tantrasiddhāntadīpikā. I. 2—III.8.

Remarks:—The Ms. is in a fairly good condition.

There can be no doubt about the authorship of this work Tantrasiddhāntadīpikā, when the colophon is read. The traditional story that Bhaṭṭojīdīkṣita, the grammarian and pupil of the great Appayyadīkṣita I wrote it, has little foundation. The author of this work is Appayyadīkṣita III, alias Cinnappayya, brother of the famous poet Nīlakaṇṭhadīkṣita, and adopted-son of his own paternal uncle, Appayyadīkṣita II. Thus the author is a grandson of Āccāndīkṣita, brother of Appayyadīkṣita I. vide 'Tantrasiddhāntadīpikā by N. Aiyāswami Śastry, pp. 247-250 Vol. II. Journal of Oriental Research, Madras.

The work is a reply to the critics of Appayyadīkṣita I and the author seems to have written another Mīmāṃsā work called 'दुरूहशिक्षा' ।

॥ नयविवेकव्याख्या—दीपिका ॥

6854. NAYAVIVEKAVYĀKHYĀ—DĪPIKĀ.

Burnell's Catalogue No. 2098a. Page 84. Left column.

Substance—Paper. Size—12½ × 5 inches. Sheets—102. Lines—11-12 to a Page. Script—Devanāgarī. No. of Granthas—5500. Author—Varadarāja. First Adhyāya only. Complete. Not printed.

Beginning;

श्रीवेदव्यासाय नमः ॥

प्रणताज्ञानसन्दोहध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं हरिं सारस्वतप्रदम् ॥ १ ॥

यन्नामग्रहमात्रेण क्षीयन्ते विघ्नहेतवः ।
तमेकदन्तं वन्दे.................... ॥ २ ॥

यत्पादपङ्कजद्वन्द्वनिरन्तरनिषेवणात् ।
विद्यानिधिश्शिष्यगणो नमामस्तं सुदर्शनम् ॥ ३ ॥

नमामि पितरौ वृद्धानपि कल्याणचेतसः ।
यत्प्रसादेन मूर्खोऽपि भवेद्वाचस्पतेः समः ॥ ४ ॥

नमामि जैमिनिमुनिं भाष्यकारप्रभाकरौ ।
नाथं भवं निबन्धॄंश्च चन्द्रादीन्समुपास्महे ॥ ५ ॥

......कापगातीरे कीटाब्धिकुलभूषणम् ।
यज्ञद्रोणात्समभवत्प्रणतार्तिहराभिधः ॥ ६ ॥

तस्मात्समभवत्प्राज्ञो देवराजो बहुश्रुतः ।
ततः श्रीरङ्गनाथाख्यो विपश्चित्सत्तमोऽजनि ॥ ७ ॥

तत्सूनुना वरदराजबुधाग्रिमेण
  व्याख्यायते नयविवेक इति प्रबन्धः ।
तत्सम्प्रदायमहिता नयदीपिकेति
  ख्याता तदीयकृतिरादरणीयभावा ॥ ८ ॥

तत्र त्रिपाद्यां गम्भीरं भवदेव समीरितम् ।
अहं नयविवेकं तं व्याचक्षे दुर्ग्रहं परैः ॥ ९ ॥

महान्तं यत्नमास्थाय कर्तुं शक्यं विधान्तरं ।
तथापि सम्प्रदायोक्तदुर्लभस्सम्प्रकाश्यते ॥ १० ॥

अनेकविधदोषेण दुष्टा यद्यपि मत्कृतिः ।
अदोषयन्तु तां सन्तः कृपाबहुलचेतसः ॥ ११ ॥

अवज्ञां येस्माकं विदधति जना केचिदपि ते
  विजानन्ते प्रायः स्वमतिपरिणामावधि कियत् ।
न तानुद्दिश्येयं कृतिरपि तु मत्तुल्यमहिमा
  जनिष्यत्येकोऽपि स्वकृतगुरुसेवाहततमाः ॥ १२ ॥

तत्र प्रथमपादोक्तस्य सर्वग्रन्थसाधारणतया सुगमत्वात्तत्र गुरुणा ग्रन्थस्संक्षिप्त इति तदीयगम्भीराशयविवृतये स्वेन तत्र प्रपञ्चितं त्रिपाद्यां वाद्यन्तराप्रसिद्धवाक्यवृत्तिविषयत्वान्न्यायानां तत्सुखावगत्युन्मुखशिष्यव्युत्पत्तये विस्तरप्रधानो गुरुग्रन्थ इति तदभिप्रायमात्रकथनाय

तदर्थप्रतिपादकाय स्वग्रन्थ इति श्रोतृमनस्समाधानमाह त्रिपाद्यामिति—

विनियोगसमुत्थाप्रामाण्यनिरसरूपार्थैक्यपादकाङ्क्षिपादीति समाधाननिर्देशः द्वादशलक्षणीतिवत्। ननु स्वत एव गुरुमतस्य निरवद्यव्यक्तत्वे च स्वकृतिर्व्यर्थेत्याह— सुग्रहमिति ॥

End:

ननु शक्तेरशक्तेरशाब्दस्वरूपतया न शाब्दानुष्ठाननियामकत्वमित्यत्राह— योग्येति ।

अशाब्दस्वरूपत्वेऽपि शक्तेरन्वयहेतुत्वं लोकसिद्धं योग्यान्वयव्युत्पत्तेः । अतश्शक्तिसाहचर्याद्व्यवसितोन्वयः । अतः संहतस्यावदाने हस्तः द्रवद्रव्यस्य स्रुवः कठिनेऽस्य स्वधितेः अतः शक्तितो व्यवसितं शास्त्रमिति स्थितमप्रामाण्यमित्यर्थः ।

अध्यायार्थमुपसंहरति-- अत इति ।

इत्थं त्रिपाद्यां भवनाथभाव-
निरन्तराभ्यासनिरस्तमोहः ।
प्रकाशयन् दीपिकयानवद्य-
मभीष्टदाय्यत्रिकुलोत्थवर्यः ॥

Colophon:

इत्यात्रेयस्य सुदर्शनाचार्यशिष्यस्य श्रीरङ्गराजाध्वरिसूनोः

वरदराजस्य कृतौ नयविवेकदीपिकायां प्रथमाध्यायस्य
चतुर्थः पादः ॥

Subject: Nayavivekavyākhyā—Dīpikā. I. ii-iv.

Remarks:—The Ms. is in a decaying condition.

Nayaviveka is the work of Bhaṭṭanātha, a commentary on the Adhikaraṇasūtras, according to the Prābhākara School. Varadarāja has commented upon it. He belongs to the Kītāmbikula and Ātreyagotra. He gives his geneology thus—

Yajñadroṇa.
|
Praṇatārtihara.
|
Devarāja.
|
Varadarāja.

In the introductory verses to some Mss. he mentions one Sudarśana as his guru This Varadarāja is different from the author of the Kusumañjali Bodhinī, who was the son of one Rāmadeva.

NAYAVIVEKAVYĀKHYĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6855	B. L. 2098b	Paper.	12½×5	86	12	Devanāgarī.	Incomplete; II. 1-2
6856	,, ,, c	,,	,,	136	11	,,	,, III. 1-5 and a portion of the 6th pāda.
6857	,, ,, d	,,	,,	48	11	,,	,, IV. 1.
6858	,, 2094	,,	13×5	42	12	,,	,, III. vi.-viii.
6859	,, 9582	Palm leaf.	17½×1¼	175	7	Grantha.	,, I-iv to II-ii.
6860	,, 9583	,,	16½×1	148	6-9	,,	,, I-ii—II-i.
6861	,, 9584	,,	17×1	175	9-8	,,	,, I. iv & II i-iii.

॥ शास्त्रमालावृत्तिः ॥

6862. ŚĀSTRAMĀLĀVṚTTIḤ.

Burnell's Catalogue No. 2078. Page 84. Left column. Substance—Paper. Size—11×4¾ inches. Sheets—19. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—500. Author—Anantabhaṭṭa. Incomplete. Not printed.

Beginning:

सूर्यवंशावतंसाय दशस्यन्दनसूनवे ।
जग(द्धारा)पहाराय जानकीपतये नमः ॥

मीमांसानलिनीभानुं नत्वा श्रीकमलाकरम् ।
तत्सूनुना त्वनन्तेन शास्त्रमाला विविच्यते ॥

कमलाकरभट्टाख्यैः
श्रीतातपादैः कृते तु शास्त्रमालाख्ये ।
ग्रन्थे वृत्तिः क्रियतेऽ-
नन्तेन तत्सूनुना विशदा ॥

अथातो धर्मजिज्ञासा ॥

ननु स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ स्वाध्यायस्य कर्मोत्पन्नतव्यप्रत्ययेन साध्यत्वावगतेः पारायणाद्युपयुक्तत्वात् अक्षरग्रहणमेव भाव्यम् । ततश्च विचारायोगा... रम्भं शास्त्रमत आह—

स्वाध्यायो व्यर्थधीहेतुः न विचारं विना भवेत् ।
तदर्थं शास्त्रमारभ्यं जिज्ञासासूत्र ईरितम् ॥

न तव्यप्रत्ययेन स्वाध्यायस्य भाव्यत्वं सम्भवति। तथात्वे अपुरुषार्थसाध्यकभावनायां विधेरप्रवर्तकत्वापत्तेः। कर्मोपयुक्तार्थता....र्थत्वे संभवत्यदृष्टार्थत्वायोगात् यो तेन तव्यप्रत्ययेनसाध्यत्वोक्तावपि सक्तूनितिवत् करणत्वे लक्षणा। रेवतीवारवन्तीयवद्भावनाविशिष्टभावनाविधिरयमिति पितृचरणाः।

End:

अनुषङ्गो ॥ अत्रापि यजुःपरिमाणज्ञानार्थमनुषङ्गविचारः। ननूपसत्प्रकरणे 'याते अग्नेऽचाशया तनूर्वर्षिष्ठो गह्वरेष्ट'इत्यनन्तरं पवित्रस्य 'याते अग्नेरजाशया' 'याते अग्ने हराशया'इति मन्त्रद्वयस्याध्याहारेणैव शेषपूरणम्। न तु तनूरित्यस्य पूर्वस्यानुषङ्गेण।

* * *

आद्यस्यान्ते पाठदर्शनेन उत्तरयोरप्याकांक्षावेलायां अवैरूप्येणान्त एव पाठात् तेनानुषङ्गयुक्तयोरेव मन्त्रत्वम्। एवं शेषिभूतमन्त्रद्वयस्याकांक्षया... ।

Subject: Sāstramālāvṛṭṭi.

Remarks:—The Ms. is in a fairly good condition. On the title page is given,

कमलाकरपुत्रानन्तभट्टप्रेषितमिदं पुस्तकम् नीलकण्ठ
दीक्षितस्य शास्त्रमालाव्याख्यानं। मीमांसाविषये प्रथमाध्यायस्य
पत्राणि ॥

From the above we learn that the Ms. belonged to the famous Nilakaṇṭha Dīkṣita to whom, the author sent it himself for favour of review. Thus Anantabhaṭṭa, son of the famous Kamalākarabhaṭṭa was a younger contemporary of Nīlakaṇṭha Dīkṣita. Thus the author flourished in the latter half of the 17th century. His cousin, Gāgābhaṭṭa, alias Viśveśvara, performed the coronation of Śivāji in 1674 A. D.

The above work is a commentary by Anantabhaṭṭa, on the Śāstramālā which is itself a commentary on the Sūtras of Jaimini, by his father, Kamalākarabhaṭṭa. This Vṛtti of Ananta is also called Jyotsnā.

॥ शास्त्रमालावृत्तिः ॥

6863. ŚĀSTRAMĀLĀVṚTTIḤ.

Burnell's Catalogue No. 2077. Page 83. Left column.

Substance—Paper. Size—11×4 inches. Sheets—110 (92-201). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—3000. Author—Anantabhaṭṭa. Incomplete. Not printed.

Beginning:

......ध्यत्वमित्याह ॥

स्वर्गादीनि फलानि स्युः न यागे साधनानि तु ।
तेनाधिकारकर्तृत्वापत्तेः षष्ठे विचार्यते ॥

फलार्थित्वात्स चाधिकारस्तिर्यक्बधिरपङ्गुमूकदेवादीनामप्यशक्याज्यावेक्षणादित्यागेन फलकामित्वात् प्रधानतास्य प्रवृत्तेश्च स्यादित्याशङ्क्याज्यावेक्षणादीनां क्रत्वङ्गानां

पुरुषाङ्गत्वाभावेन तैर्विना प्रधानमात्रात्फलानिष्पत्तेः । तिरश्चां तु प्रधानमात्रेऽप्यसामर्थ्याद्देवानां त्वात्मोद्देश्येन त्यागाभावात्काम्ये यावज्जीवप्रधानावश्यकत्वाभावात् सर्वाङ्गानुष्ठानसमर्थानामेव मनुष्याणामधिकार इत्याह—

"तिर्यक् बधिरमूकादेर्नाधिकारोऽस्ति कर्मसु" ॥

॥ लिङ्गविशेषनिर्देशात् ॥

End:

प्रस्तुत्वादार्त्विज्यं विरोधे आर्त्विज्यं बलीय इत्युक्तम् । तत्प्रसङ्गादार्त्विज्यस्य कर्तारश्चिन्त्यन्ते । तत्रार्त्विज्यविद्वत्वात्त्रयोऽपि(?)वर्णाः कुर्युः । न च याजनादि त्रयं ब्राह्मणस्यैवेति नियमात् ब्राह्मणस्यैवार्त्विज्यमिति वाच्यं । नियमस्य पुरुषार्थत्वेन तदुल्लङ्घने क्षत्रियादेः स्वातन्त्र्येण दोषसत्वेऽपि क्रत्ववैगुण्यात्...मार्त्विज्यमित्याशङ्क्य यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति क्रतुं प्रक्रम्यैवार्त्विज्यांगत्वेन ब्राह्मणानामिदं हविरिति लिंगात् । रामायणेऽपि—

"क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य... ।" तिलिङ्गात् ।

"राजयाजक याज्यस्य विनश्यति यथा हविः"

इति महाभारतोक्तेश्च ब्राह्मणानामेवार्त्विज्यं नान्येषामित्याह ।

'आर्त्विज्यं ब्राह्मणानां स्यान्नान्येषामितिनिश्चयः ॥

Colophon:

सर्वतन्त्रस्वतन्त्राणां कमलाकरयज्वनाम् ।
अखण्डपाण्डित्यजुषां शास्त्रमाला कृतौ कृती ॥ १ ॥
वृत्तिं उद्योत्स्नां सुविशदां तत्सुतोऽनन्तसंज्ञकः ।
बालबुद्धिप्रबोधार्थमकरोत्प्रीतये सताम् ॥ २ ॥
अनन्तविबुधेनात्र कमलाकरसूनुना ।
योऽसौ श्रमः कृतस्तेन प्रीयतां रघुनन्दनः ॥ ३ ॥

इति श्रीमज्जगद्गुरुमीमांसककमलाकररामकृष्णभट्टसूरिसूनुकमलकरभट्टात्मजानन्तभट्टकृतायां शास्त्रमालावृत्तौ
द्वादशोऽध्यायः ॥

Subject: Sāstramālāvṛtti VI. 2-XII. 4.

Remarks:—The Ms. is in a fairly good condition.

॥ शास्त्रमालावृत्तिः ॥

6864. ŚĀSTRAMĀLĀVṚTTIḤ.

Burnell's Catalogue No. 2079. Page 84. Left column. Substance—Paper. Size—10×4 inches. Sheets—54 (102-155). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Anantabhaṭṭa. Incomplete. Not printed.

Beginning:

...दानीं अतिदेशापवादः। यदेकया जुह्वया हविर्होमं कुर्यादित्यत्र दर्व्या होमः गुणविधिरित्याशङ्क्य त्वग्निलया

मूलदण्डया रश्वा दर्व्या जुहोतीत्यनेन प्राप्तत्वात्प्रख्यान्यायेन नामधेयं दर्विहोमशब्दः । तत्रापि लौकिकानां स्थालीपाकादीनां कर्तरि दार्विहोमिक इति प्रयोगात्तेषामेव नामेत्याशङ्क्य वैदिकेऽपि वास्तुहोमे प्रयोगापाते तमपि नाम तत्रापि यजुत्पत्तीनां चतुरवत्तं जुहोतीति होमत्वात्तन्नामत्वमाशङ्क्य यागाद्धोमस्य भेदाज्जुहोत्युत्पत्तीनामेवाग्निहोत्रादीनां नामेत्याह ‘ तत्प्रख्यत्वाद्दर्विहोमः संज्ञा ’। सा वैदिकेष्वपि जुहोतीनामेव साम्यात् तस्मिन् सोमः प्रवर्तेताव्यक्तत्वात् दर्विहोमेष्वव्यक्तत्वात्सोमधर्मातिदेश इत्याशङ्क्य यागहोमयोर्भेदान्न सोमधर्माः । नाप्यग्निहोत्रनारिष्ठादिधर्माः । नारिष्ठाङ्गेध्मादीनां त्र्यंबकहोमे सम्भवदर्शनात्तेन तेऽपूर्वा एवेत्याह ‘ अपूर्वास्तेन सम्मताः ’।

End :

उपांशुयाज एव ॥

किमुभयत्र स्यादुत पौर्णमास्यामेवेति चिन्त्यते । तत्रोपांशुयाजमन्तरा यजतीत्यविशेषेण पुरोडाशद्वयलक्षिते काले विधाना दुभयोश्चपर्वणोः पुरोडाशद्वयसत्त्वादुभयोपांशु यागः स्यात् ।

* * *

तत्र चान्तराळविधिनैवोपलक्षण्यानयतायतः पौर्णमासी कालसिद्धावपि प्राधान्यार्थं कालविधेः स्वीकार्यार्थत्वाद्दर्श-

नीत्वर्थत्वे तु परिसंख्यापत्तेः पौर्णमास्यामेवोपांशुयाग इत्याह—

तावद्भूताकालविधेः पौर्णमास्यां भवेत्तु सा ।

.... ॥

द्विपुरोडाशा स्यात् ॥ पौर्णमास्यामेवोपांशुयाग इति स्थिते चिन्त्यते । तत्रैकपुरोडाशायामन्तरालगुणालाभेन वैगुण्याद्विपुरोडाशायामेवोपांशुयाग इत्याशङ्क्य अन्तराशब्देन पुरोडाशद्वयोपलक्षितकालोक्त्या पुरोडाशद्वयाभावेऽपि शङ्खवेलायामागन्तव्यमितिवत्तदुपलक्षितकालानपायादसोमयाजिनोऽपि उपांशुयाजः पौर्णमास्यां स्यादित्याह ।

'उपलक्ष्यानपायाच्च सोमात्प्रागपि स स्मृतः'।

Colophon:

इति भट्टकमलाकरात्मजानन्तभट्टकृतायां शास्त्रमालावृत्तौ दशमाध्यायस्याष्टमः पादः ॥

Subject: Śāstramālāvṛtti; IX & X.

Remarks—The Ms. is in good condition.

॥ शास्त्रमालावृत्तिः ॥

6865. ŚĀSTRAMĀLĀVṚTTIḤ.

Burnell's Catalogue No. 2080. Page 84. Left column. Substance—Paper. Size—11 × 4¾ inches. Sheets—28. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—Anantabhaṭṭa. Incomplete. Not printed.

Beginning:

·· नाङ्गान्यप्येकस्मिन् प्रयोगेऽभ्यसितव्यानीत्याशङ्क्य शास्त्रीय एव षोडशिग्रहणादौ प्रयासगौरवेण फलगौरवांगीकारात्सांगप्रधानस्य फलसामग्रीत्वेनैकैकस्य तदभावाच्च न शास्त्रीयेण प्रयासभूम्ना फलभूयस्त्वमित्याह 'अङ्गानां च सकृत्कृतिः बहुवचनेन'। 'वसन्तायकपिञ्जलानालभेते'त्यत्र बहुवचनस्य द्वित्वाधिकसर्वसंख्यावाचित्वेन चतुष्ट्वादेरपि शास्त्रीयत्वाच्छास्त्रीयप्रयासाधिक्येन फलभूयस्त्वमित्याशङ्क्यैकादेया पड्देया इतिवद्विशेषाणामशाब्दत्वेन बहुत्वस्य सामान्यवाचित्वात्।

End:

सत्रे गृहपतिरसंयोगात् ॥

सत्रे जनादयः संस्कारा गृहपतेरेव भवन्त्युत सर्वेषामिति चिन्त्यते। तत्र गृहशब्देन कर्मोच्यते तस्य सर्वेऽपि त्वामित्यापलय(?) इति कस्यचिद्विशेषसंज्ञा व्यर्था। तेन तस्यैव फलभूयस्त्वनिमित्ता संस्कारा नान्येषामित्याशङ्क्य गृहपतिसमाख्यायाः आर्त्विज्यपदार्थकरणनिमित्तत्वात्

* * *

रामायणेऽपि

"क्षत्रियो याजको यस्य चण्डालस्स विशेषतः।
कथं सदसि भोक्तारो हविस्तस्य सुरेव च ॥" इति लिंगात्
'राजयाजकयाज्यस्य विनश्यति यथा हविः'

इति महाभारतोक्तेश्च 'ब्राह्मणानामेवार्त्विज्यं नेतरेषा'मित्याह—

आर्त्विज्यं ब्राह्मणानां स्यान्नान्येषामिति निश्चयः ॥

Colophon:

सर्वतन्त्र + रघुनन्दनः ।

इति शास्त्रमालावृत्तौ द्वादशोऽध्यायः । समाप्तश्चायं निबन्धः ।

Subject: Śāstramālāvṛtti; XI and XII.

Remarks:—The Ms. is in good condition.

॥ शास्त्रदीपिका ॥

6866. ŚĀSTRADĪPIKĀ.

Burnell's Catalogue No. 2040a. **Page** 82. **Left column.** Substance—Paper. Size—9½×4 inches. Sheets—92. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—9036. Pārthasārathimiśra. Incomplete. Printed.

Beginning:

श्रीवेदव्यासाय नमः ।

लक्ष्मीकौस्तुभवक्षसं मुररिपुं शंखासिकौमोदकी
हस्तं पद्मपलाशताम्रनयनं पीताम्बरं शार्ङ्गिणम् ।
मेघश्याममुदारपीवरचतुर्बाहुं प्रधानात्परं
श्रीवत्साङ्कमनाथनाथममृतं वन्दे मुकुन्दं मुदा ॥

शबरस्वामिनं नत्वा भट्टाचार्यं च जैमिनिम् ।
कुमारिलमतेनाहं करिष्ये शास्त्रदीपिकाम् ॥

अथाथो धर्मजिज्ञासा ॥

अनेन सूत्रेण प्रारिप्सितस्य श्रोतृप्रवृत्तिसिद्धये धर्मज्ञानप्रयोजनता कथ्यते ।

End:

यथाह ।

इति प्रमाणत्वमिदं प्रसिद्धमुक्त्वेह धर्मे प्रतिचोदनायाः ।
अतः परन्तु प्रविभज्यवेदं त्रेधा ततो वक्ष्यति तस्य योऽर्थः ॥

Colophon:

इतिश्रीपार्थसारथिमिश्रकृतौ शास्त्रदीपिकायां प्रथमाध्यायस्य
प्रथमः पादः ॥

Subject: Śāstradīpikā; I. 1.

Remarks:—The Ms. is in good condition.

The Śāstradīpikā of Pārthasārathimiśra is a gloss on the Sūtras of Jaimini. The work has many commentaries.

The Śāstradīpikā has been published by the Nirṇayasāgar Press, Bombay, with Somanātha's commentary.

The only commentary upon the Śāstradīpikā from the very beginning is the Yuktisnehaprapūraṇī otherwise called Siddhāntacandrikā by Rāmakṛṣṇabhaṭṭa, who has also added a Gūdhārthavivaraṇa to his Siddhāntacandrikā. These, up to the end of Pāda 1 Ādhyāya 1 have been printed in the edition referred to above. This Pārthasārathimiśra is the author of many works on Mīmāmsā besides this like Nyāyaratnākara, Nyāyaratnamālā and Tantraratna.

ŚĀSTRADĪPIKĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6867	B. L. 2040b	Paper.	10½×4½	98	12	Devanāgarī.	Incomplete; I. ii—II. iv.
6868	,, ,, c	,,	10½×4½	65	,,	,,	,, III Adhyāya complete.
6869	,, ,, d	,,	,,	22	,,	,,	,, IV ,, ,,
6870	,, ,, e	,,	,,	15	,,	,,	,, V ,, ,,
6871	,, ,, f	,,	,,	31	,,	,,	,, VI ,, ,,
6872	,, ,, g	,,	,,	9	,,	,,	,, VII ,, ,,
6873	,, ,, h	,,	,,	7	,,	,,	,, VIII ,, ,,
6874	,, ,, j	,,	,,	29	,,	,,	,, IX ,, ,,
6875	,, ,, k	,,	,,	54	,,	,,	,, X ,, ,,
6876	,, ,, l	,,	,,	20	,,	,,	,, XI ,, ,,
6877	,, ,, m	,,	,,	17	,,	,,	,, XII ,, ,,
6878	,, 9541	,,	17×1	390	5-9	Telugu.	,, I. i—IV. iv.

ŚĀSTRADĪPIKĀ (Contd.)

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6879	B. L. 9543	Palm leaf.	17½×1	254	5-6	Grantha.	Incomplete. I. ii—X. ii.
6880	„ 9544	„	17×1	104	8-10	„	„ I. ii—III. iii.
6881	„ 9548	„	20×1¾	28	11	Telugu.	„ I. ii—II. i.
6882	„ 6257	Paper.	9½×4¼	34	12	Devanāgarī.	„ I. ii-iv.
6883	„ 9545	Palm leaf.	16×1½	114	6	Telugu.	„ I. i-ii.
6884	„ 2045	Paper.	10×4¼	10	11	Devanāgarī.	„ I; A fragment.
6885	„ 2046	„	10½×4¼	42	10	„	„ I. ii—II. iv,
6886	„ 2047	„	11×5	84 (11-94)	17	„	„ I. iv—III. viii,
6887	„ 2041	„	11¼×4½	86	12	„	„ II complete.
6888	„ 2052	„	8½×3	29	6	„	„ „ Incomplete.
6889	„ 2057 I	„	8¼×2¾	4	6	„	„ II; fragment.

6890	„	„ II	„	8×3	6	12	„	„ „ „
6891	„	2060	„	$11\frac{1}{2} \times 5$	42	10-12	„	„ „ complete.
6892	J. L.	602	„	$10 \times 5\frac{1}{4}$	80	9	„	„ „ „
6893	B. L.	9547	Palm leaf.	$18\frac{1}{2} \times 1\frac{1}{2}$	55 (45-99)	7-8	Grantha.	„ „ i—III. ii
6894	„	2048	Paper.	$10 \times 4\frac{1}{4}$	22	13	Devanāgarī.	„ III. i—iii
6895	„	2050	„	„	78 (125-202)	10-11	„	„ III. ii—vii
6896	„	2059	„	10×5	41	15-17	„	„ III. Complete
6897	„	9546	Palm leaf.	$15\frac{1}{2} \times 1\frac{1}{4}$	81 (157-237)	8	Grantha.	„ III. vi—VIII. iii.
6898	„	2049	Paper.	$10 \times 4\frac{1}{2}$	30	10 or 11	Devanāgarī.	„ IV; complete.
6899	„	2058	„	$10\frac{1}{2} \times 5\frac{1}{2}$	128	16-18	„	„ IV. i—X. viii,
6900	S. S.	141	Palm leaf.	$16\frac{1}{2} \times 2$	97	10-15	Grantha.	„ IV. i-VIII, iv
6901	B. L.	9542	„	$18\frac{1}{2} \times 1$	224	5	Telugu.	„ V. i—XII. iv
6902	J. L.	601	Paper.	$11 \times 4\frac{1}{4}$	57 (188-205)	10	Devanāgarī.	„ IX. iv—X. viii.
6903	B. L.	2054	„	$9\frac{1}{2} \times 4\frac{1}{4}$	105	8	„	„ X; Complete.

ŚĀSTRADĪPIKĀ (Contd.)

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6904	B. L. 2055	Paper.	10½×5	26	16-17	Devanāgarī.	Incomplete; XI & XII; complete.
6905	„ 2051	„	8½×8	24	6-8	„	„ Fragmentary
6906	Ms. No. 15565 Not noticed by Dr. Burnell	Palm leaf.	15×1¼	21	6-7	Grantha.	„ „
6907	J. L. 175	Paper.	9½×4½	11 (16-28)	10	Devanāgarī.	„ begins in the middle of the commentary on I. iii. 4 and ends in the middle of the commentary on I. iii. 11.

DETAILED REMARKS
on the
ŚĀSTRADĪPIKĀ MSS. CONTAINED IN THE ABOVE TABLE.

6879 On the title leaf is given:—

'शास्त्रदीपिका नीलकण्ठस्वामी'

6884 On the title page is given;—

'पुस्तकमिदं तुलजाराजस्य ।'

Dr. Burnell notes this Ms. as a copy of Somanātha's commentary.

6885 Do. Do. Do.

6886 After the colophon is given—

'सदारा मोहमित्येतत् तत्त्वतः प्रवदन्ति ये ।
न ते संसारिणो नूनं राम एव न संशयः ॥'

6894 The scribe has given at the beginning some Kārikas, not belonging to the work.

॥ शास्त्रदीपिकाव्याख्या—मयूखमालिका ॥

6908. ŚĀSTRADĪPIKĀVYĀKHYĀ—MAYŪKHAMĀLIKĀ.

Burnell's Catalogue No. 2042a. Page 88. Left column. Substance—Paper. Size—12½ × 5 inches. Sheets—24. Lines—25 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Somanātha. Incomplete. Printed.

Beginning:

आविष्करोतु विबुधैरभिनन्दनीयां
वाचं स कोपि मम वल्लवसार्वभौमः ।
वंशोऽपि यत्परिगृहीततया बिभर्ति
वाचालतां त्रिभुवनैकविमोहयित्रीम् ॥

अधिगत्य कलामखिलामग्रभवाद्वेङ्कटाद्रियज्वगुरोः ।
वचनैरनतिप्रचुरैर्व्याकुर्वे शास्त्रदीपिकां विशदाम् ॥

विबुधाः प्रणम्य मूर्ध्ना बहुधा वः प्रार्थये कृतावस्थाम् ।
अर्पयत दृशं सूक्ष्मां निन्दत परतोऽभिनन्दत वा ॥

परिलिखतः किञ्चिदपि प्रकृतिर्भवति प्रमाद इति ।
अन्विष्य गुणगणानप्यभिनन्दत वीतमत्सरा विबुधाः ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

ननु अर्थवादादेः प्रामाण्यविचारस्य धर्मविचारात्मकत्वाभावात् कथं शास्त्रसङ्गतिरित्याशङ्क्य शास्त्रार्थप्रदर्शनपरप्रथमसूत्रार्थकथनेनं शास्त्रसङ्गतिं तावद्दर्शयति ॥ अथात इति ॥

End:

॥ नामधेये गुणश्रुतेः स्यात्० ॥ * *

मत्वर्थलक्षणादोषो नास्तीत्याक्षिप्यतेऽधुना ॥

* * *

॥ व्या ॥

वाजपेयशब्दस्य गुणविधित्वे सत्यैष्टिकविध्यन्तप्राप्त्या सप्तदशदीक्षो वाजपेय इति दीक्षोपसदादिदर्शनमनुपपन्नम् स्यादिति लिङ्गदर्शनोपन्यासार्थं तदुदाहरणादिति ॥

Subject: Śāstradīpikāvyākhyā known as Mayūkhamālikā I. 2 to 4.

Remarks:—The Ms. is in good condition. This Ms. as also the next two contain the text of Śāstradīpikā also.

On the title page is given:—

हे पुस्तक + काशीदेशाहून + आणिलें अस्सें ॥

Somanātha, the author of this commentary on the Śāstradīpikā was the son of Sūrabhatta. He was an Āndhra Brahmin of the Nittala family. He was pupil of his elder brother Veṅkaṭādriyajvan.

The Mayūkhamālikā comments only from the II pāda of the I Adhyāya. It has been published with the Śāstradīpikā by the Nirṇayasāgara Press, Bombay.

ŚĀSTRADĪPIKĀVYĀKHYĀ—MAYŪKHAMĀLIKĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6909	B. L. 2042b	Paper.	12½×5	32	18-24	Devanāgarī.	Incomplete; II Adhyāya complete.
6910	„ „ c	„	„	27	28	„	„ III. i—iv.
6911	„ 2044	„	11×4	105	8	„	„ VI. i—viii.
6912	„ 2048	„	„	164	9-10	„	„ VII—IX.
6913	„ 2081	„	10×4½	49	20-22	„	„ III. i—iv.
6914	„ 9550a	Palm leaf.	16×1	167	8	Grantha.	„ II i—III. iv.
6915	„ 2057 III	Paper.	9½×3	6	12	Devanāgarī.	„ I-ii 1 A fragment.
6916	„ 9551a	Palm leaf.	16½×1¾	26 (49-74)	10	Grantha.	„ IV i—iii.
6917	„ „ b	„	„	43	„	Devanāgarī.	„ IV iii—V. iv.
6918	S. S. 154a	Śrī tāla.	16½×2	58 (45-97)	10-15	Grantha.	„ II.

DETAILED REMARKS
on the
MAYŪKHAMĀLIKĀ MSS. IN THE ABOVE TABLE.

6909 On the title page is given

'हे पुस्तक + काशीदेशाहून + आणिलें अस्सें ।'

6910 Do. Do. Do.

6912 On the title page is given—

'प्रतिनिधिपुस्तकसंग्रह रामायणघेवूण श्रीपत्याचार्यान्ती शेषाचार्यी सदिलेंते पुस्तक सोमनाथिय ।'

6914 The other work contained herein is Appayya Dīkṣita's Śāstradīpikāvyākhyā. (Lines 1-61)

6918 The other work contained herein is Jaiminīya Nyāyamālāvistāra.

॥ शास्त्रदीपिकाव्याख्या ॥

6919. SĀSTRADĪPIKĀVYĀKHYĀ.

Burnell's Catalogue No. 2056. Page 86. Left column. Substance—Paper. Size—9×4 inches. Sheets—18 (37-54). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—216. Author—? Incomplete. Not printed.

Beginning:

....दित इति तु गौणः प्रयोगः। चन्द्रोदयस्य नित्यत्वान्निमित्तत्वानुपपत्तेर्हविरित्यपि विवक्षितं। एवं स्थिते वि-

चार्यते। ये मध्यमा इत्यत्र किं नैमित्तिकं कर्मान्तरं विधीयते किं वाप्रकृतेषु द्रव्येषु देवतान्तरसंयोगो विधीयते ।

End:

अस्मत्पक्षे तु पूर्वदेवतापनयविधानस्य मध्यमादिवाक्यापेक्षितदेवतान्तरे संयोगविधानार्थत्वान्नादृष्टार्थतेति ।

तस्मात्रेधावाक्यस्य तण्डुलवि...... ।

Subject: Śāstradīpikāvyākhyā.

Remarks:—The Ms. is in a fairly good condition.

Though the margin of the I sheet says that this Ms. represents Śāstradīpikā, it seems to be only a commentary thereon by an unknown author for on sheet 49, we find Somanātha, a commentator of Śāstradīpikā quoted and mentioned by name—

‘ अत्र सोमनाथदीक्षिताः ॥ ’

Dr. Burnell leaves this as an unidentified fragment with the remark that it represents some notes culled out from Pārthasārathi and Somanātha.

॥ शास्त्रदीपिकाव्याख्या—मयूखावली ॥

6920. SĀSTRADĪPIKĀVYĀKHYĀ—MAYŪKHĀVALĪ.

Burnell's Catalogue No. 9552. Page 83. Left column.

Substance—Palm leaf. Size—16×1¼ inches. Leaves—75. Lines—8 to 10 to a Page. Script—Grantha. No. of Gran-

thas—2520. Author—Appayyadīkṣita. Incomplete. Not Printed.

Beginning :

……………………………… तुरगान्
नयत्याशुग्रन्थां महिततर शास्त्रेषु विषमान् ।
अधीतै वा…यासहृदय…………
….व्याख्यामुद्रां मनसि कलये तां पशुपतेः ॥

गुरुभिरुपदिष्टभावां व्याकुर्वे शास्त्रदीपिकामनघाम् ।
आ……लघुभिर्वाक्यैः प्रसन्नगंभीरैः ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् ।
(तस्मादनित्यमुच्यते) ॥ ……अध्ययनानन्तरं अतोऽध्ययनस्य प्रवर्तकत्वधर्मस्य……श्रेयस्साधनस्य जिज्ञासाविचार…………मेयकप्रमाणं तस्य यत् स्वरूपं साधनं फलं……………………………।

… * * *

अर्थवादा…क्रतौ किमायतमित्याशङ्क्याह—
तेनेति ॥

* * *

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात्— स्मृतिप्रामाण्यविचारस्य प्राभाकरोक्तसङ्गतिदूषणार्थमर्थवादाधिकरणोक्तां स्वाभिमतां सङ्गतिं….पितुमध्यायार्थकथनपूर्वकं वृत्तमनुवदति । अ—र्थलक्षणिक इति । द्वितीये अर्थ-

वादादेरिति सिद्धमित्यनुषङ्गः । अर्थवादादेरपि महावाक्यरूपचोदन.. ।

चोदनाज्ञाया वा प्रथमपाद एव सिद्धं प्रामाण्यं धर्मप्रमित्युपयोगाभावादिशङ्कानिराकरणेन द्वितीयपादे प्रतिष्ठापितमित्यर्थः । एवं क....स्तस्येति न....यस्यापि चोदनान्तर्गतत्वात् प्रथमपाद एव प्रामाण्यं सिद्धम् । नामधेयपादे तु धर्मप्रत्ययक्रोडीकृतनामधेयत्वरूपप्रकारविशेषव्युत्पादनमात्रमित्याशयेन....स्तस्येत्युक्तम् । वैदिकपरिगृहीतेष्विति स्मृतीनामपि विशेषणम् । स्मृतिप्रामाण्यविचार...स्वमते चोदनाप्रामाण्यसिद्ध्यर्थत्वाभावेऽपि संगमयितुं तदभावासिद्धवत्...करोति । यद्यपीति । तर्हि न प्रमाणाध्यायसङ्गतिः । द्वितीयसूत्रे चोदनाया एव प्रामाण्यप्रतिज्ञानादित्याशङ्कायामाह । तथापीति । यद्यपि गुणविधिनामधेयविचारवत् धर्मप्रत्ययोपात्तप्रकारविशेषविचारोय.... स्मृतिप्रामाण्यपर्यवसायि वेदस्य प्रत्यक्षावगतिरेव धर्मप्रमित्युपयोगे प्रकारो न भवति । किन्तु स्मृतिलिङ्गतत्समान ...विषयवेदा...ज्ञानजन्यानुमितिरपीति प्रकारविशेषव्युत्पादनेन स्मृतीनामपि वेदमूलतया प्रामाण्यसिद्धेः । अनेन रूपेण स्मृतिप्रामाण्यविचारसङ्गतेः कथं लक्षणक इत्ये.... ल....युक्तमिति प्रथमपादे रूपितत्वाच्च । तथापि यमुप्रत्ययप्रकृतिभूतेन किमंशेन प्रथमसूत्रे विचार्यत्वेन प्रतिज्ञाते

धर्मे यत्राङ्गत्वप्रमाणं संभवति त... प्रामाण्यप्रतिज्ञापरताया अपि चोदनासूत्रेणास्य दर्शितत्वात् प्रधानभूतचोदनाप्रामाण्यप्रतिज्ञातेन तद्....तिविशेषोपायतया वा तदं....कालिङ्गक्रमसमाख्यानात् काम्ययुक्त...मिति तृतीयाध्यायाधिकरणे 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम' इत्यारभ्य समाम्नातेष्वैन्द्राग्नादि.... विशेषे...स्यादिलिङ्गक्रमेण काम्ययाज्यानुवाक्याकाण्डसमाख्याने प्रदेशान्तरे समाम्नातानाम् 'इन्द्राग्नीरोचनादिव' इत्यादि मन्त्राणां विनियोगः। न तु क्रमसवा........कर्ममात्रे लिङ्गेन विनियोगः। लिङ्गस्य करत्वपूर्वसामान्यसम्बन्धप्रमाणसापेक्षत्वात्। काम्येष्टिषु क्रमसमाख्यावत् कर्मान्तरेषु तथा भूतप्रमाणाभावात् इति....दिति भावः। नन्वष्टम्यां कर्तव्यस्याष्टकाश्राद्धस्याङ्गतया सप्तम्यां रात्रौ कर्तव्येष्टकाहोमे या....नामन्त्रस्य विनियोजकं स्मृतिवाक्यमस्ति....जुहोतीत्येवं रूपमित्याशङ्क्य दूषयति न स्मृतिवाक्यमिति। स्मृत्यप्रामाण्यपूर्वपक्षवादिना स्मृतिवाक्यं प्रमाणतयोदाहर्तुमयुक्तमित्यर्थः। ननु तर्हि...न्यसम्बन्धप्रमाणान्तराभावेऽप्यगत्यात्र लिङ्गमेव सामान्यसंबन्धापादनपूर्वकं विशेषविनियोजकं स्यात्। न हि वैदिको रात्रिदेवत्यो होमः। कश्चिदेत...न्वयाहोऽस्ति....मासान्न्यायं निर्वृणुयात् पुरुषमेधे रात्रौ कृष्णं पिङ्गाक्षमिति विहितस्य पशुयागस्य पर्यग्निकरणान्तोत्सर्गविधानेन होमप-

र्यन्त...वात् । न...ण्यादिष्वहोरात्रो...स्वाहेत्यादि मन्त्रकहोमसद्भावेऽपि तेषां रात्रिमात्रदेवत्यत्वाभावादुत्पत्तिशिष्टमन्त्रान्तरावरोधाच्चागत्यन्तराभावे च मन्त्रमन्त्रलिङ्गादेव सामान्यसंबन्धस्यापि सिद्धेरभ्यासेन सङ्ख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वादिति दशमाध्यायाधिकरणे ग्रन्थकृतैवाङ्गीकृता । तत्र...नु ब्रूयात्प्रतिष्ठाकामस्येत्यादि सामिधेनी विवृद्धिश्रवणे दर्शपूर्णमासप्रकरणाम्नाताभ्यः प्रवोवाजीया........ नामाग्नेयीनामृचा...आगमं कार्य इत्यधिकरणार्थं समाप्य किं पुनरागम्यमानानामृचां कर्मसंबन्धे प्रमाणे लिङ्गं हि सामान्यतः क्रतुसंबन्धप्रमाणमपेक्ष्य द्वारविशेषमात्रेण...शङ्कामुद्भाव्य एकविंशत्यादि सङ्ख्याविधानसामर्थ्यादगत्यायाः काश्चिदग्निलिङ्गा ऋचोदाशतयीभ्य आगमयितव्या इति समाहितमित्याशङ्क्याग्निः षष्ठ....योजकम् । अतो लिङ्गमात्रेण विनियोगे नैतदुदाहरणमित्यस्वारस्यं यद्यपीत्यनेन ध्वनितम् फलवदङ्गत्वेनेति ॥

End:

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥

आकृत्यधिकरणस्य व्याकरणाधिकरणेन सङ्गतिं दर्शयति । व्याकरणमिति । भवादिशब्दास्साधव इत्युक्तं तत्प्रसङ्गाच्चेषामर्थश्चिन्त्यते । इमेगा अत्र....वर्त्यमानस्य

लोकवेदाधिकरणस्य आवृत्त्यधिकरणेनोपोद्घातासङ्गतिरिति द....ष्टमिति दर्शयितुं तर्कासिद्ध्यर्थमाह तत्र यदिति । एवञ्च सोपोद्घात............ ❀

इति प्रथमं गोशब्दो न दृष्टस्तत्र व्यक्त्यन्तरे कथं… …….. प्रयोग उपपद्यत इति… ॥

Colophon: (Leaf No. 30)

शास्त्रदीपिकामयूखावल्यां

प्रथमाध्यायस्य द्वितीयः पादः ॥

Subject: Śāstradīpikāvyākhyā otherwise known as Mayūkhāvaḷī I. 2 to 8.

Remarks:—The Ms. is in a decaying condition.

This commentary, Mayūkhāvaḷī on the Śāstradīpikā, is by the famous Appayyadīkṣita and comments only from the second pāda of the first Adhyāya.

Dr. Burnell has described this Ms. wrongly as a copy of Somanātha's commentary.

This great polymath whose date is traditionally fixed between 1556 & 1628 A. D. [See Mr. Y. Mahāliṅgaśāstri, in the Journal of Oriental Research, Madras Vol. III.] has written works in many branches of knowledge. This work is a commentary on Śāstradīpikā.

His other Mīmāmsā works are the Upakṛamaparākrama, dealing with the comparative strenth of the beginning and the end, and Vidhirasāyana, a disquisition on the nature of injunction. It is said that his contemporaries Gopāla and Śaṅkara Bhaṭṭa criticised Appayyadīkṣita's Vidhirasāyana in their works Vidhirasāyanabhūṣaṇa(?) and Vidhirasāyanadūṣaṇa respectively. (vide Dr. Keith's Karmamīmāmsā)

Śrī Appayya Dīkṣita was a great Vedāntin besides being an ardent Mīmāmsaka and Śaiva. He performed almost all the sacrifices that an āstika was to do. For further particulars of his life vide. Mr. A. V. Gopālāchar's life of Appayya Dīkṣita—printed as introduction to Vol. II. of the Yādavābhyudaya by the Śrī Vānī Vilas Press.

॥ शास्त्रदीपिकाव्याख्या— मयूखावली ॥

6921. ŚĀSTRADĪPIKĀVYĀKHYĀ— MAYŪKHĀVALĪ.

Burnell's Catalogue No. 9550. b. Page Left column.

Substance— Palm leaf. **Size**—$15\frac{3}{4} \times \frac{3}{4}$ inches. **Leaves**—101 (45-145). **Lines**— 8 to a Page. **Script**—Grantha. **No. of Granthas**—3000. **Author**—Appayyadīkṣita. Incomplete, Not Printed.

Beginning:

........सङ्गतिप्रदर्शनाय सूत्रार्थकथनम् । बुद्धाद्यागमतद्विहितचैत्यवन्दनस्वरूपतत्साधनफलानि * *

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ।

* * *

उक्तसमाम्नायैदमर्थ्यं तस्मात् ॥ ननु यथाभाष्यं गुणविधिनामधेयविचार एत प्रस्तूयतां किमर्थं वार्तिके ततः प्रागुद्भिदादिपदनां प्रामाण्याप्रामाण्यविचारोऽपि प्रवर्तित इत्याकाङ्क्षायां प्रमाणलक्षणसङ्गत्यर्थमित्याह

उद्भिदादिशब्दानिति । प्रमाणलक्षणासङ्गतमिति स्वातन्त्र्येणेति शेषः । प्रथमाधिकरणनिर्णीतप्रामाण्यनिर्वाहकप्रकारकविशेषविषयतया तच्छेषत्वेन गुणविधिनामधेयविचारस्य सङ्गततायां व्यर्थमेवपदम् । पश्चाद्गुणविधिनामधेयविचार इति वक्ष्यमाणत्वात्तथैवोद्भिदधिकरणमारभ्य तस्य प्रवर्तयिष्यमाणत्वाच्च केचित्त्वाहुः ।

पूर्वं प्रमाणरूपाभ्यां पादेनाद्यस्य निर्णयः

इति वार्तिकेन प्रथमं धर्मस्य प्रमाणमुखेन लक्षणात्मकस्वरूपमुखेन वा...ध्यायस्य एकेन पादेन निर्णय इत्युक्तत्वात्प्रथमपाद एव प्रतिज्ञातचोदनाप्रामाण्यविचारः समाप्त । त्रिपाद्या...स्मृत्यादिप्रामाण्यप्रकाररूपं विषयान्तरमिति वार्तिककारस्याभिप्रायः प्रतीयते । अतः स्वातन्त्र्येण प्रकारचिन्तैव त्रिपाद्यामिति तेषां मतम् । गुणविधिनामधेयचिन्तार्थत्वेन प्रथमं प्रवर्तितवता वार्त्तिककृतैव निरस्तमित्याह ॥ तदनेनेत्यादिना ॥ स्मृतिपादासङ्गतिप्रसङ्गादपि तेषां मतं न युक्तमित्याह ॥ न च युक्त इति ॥ यदि स्यात् प्रमाणनिरूपणं शाक्यागमादितदाभासविवेचनसहितं चोदनासूत्रेण प्रतिज्ञातमध्यायार्थ इति नोच्येत चोदना...वेदस्याप्रामाण्यं प्रतिज्ञातं तत्प्रथमपाद एव समापितमित्युच्येत । तदा स्मृत्याचारतदाभासविवेचनाय प्रवृत्तस्य स्मृतिपादस्यासङ्गतिःस्यादि-

त्यर्थः ॥ न हि तत्रेति ॥ यद्यपि वेदस्य प्रत्यक्षावगतिरेवाप्रामाण्यप्रकारः किन्तु स्मृत्यादिलिङ्गकानुमितिरपीति प्रकारविशेषनिरूपणार्थत्वमपि स्मृतिपादस्य वक्तुं शक्यम् । स्मृतिपादारम्भे कथं लक्षणक इति थमुप्रत्ययसहितभाष्यानुवादेन तादर्थ्यमपि ग्रन्थकृतैव सूचितञ्च । तथापि तत्र स्वातन्त्र्येण प्रकारनिरूपणं नास्तीत्यत्र तात्पर्यम् । तत्स्वातन्त्र्यनिराकरणप्रस्तावाच्चतः कृत्स्नोऽप्यध्यायः सापवादधर्मप्रमाणनिरूपणार्थ एव । तच्छेषत्वेन परं तत्र तत्र प्रकारविशेषनिरूपणमिति स्वमतमुपसंहरति ॥ तस्मादिति ॥ पूर्वप्रमाणरूपाभ्यामिति वार्तिकन्तु धर्मप्रामाण्ये चोदनाया अर्थवादादीनाञ्च व्यवधानाव्यवधानरूपप्रधानोपसर्जन एव सत्वात्प्रधानप्रामाण्यनिरूपणस्य प्रथमपाद एव कृतत्वाभिप्रायम् । न तु प्रथमपाद एव प्रामाण्यविचारस्य समाप्तत्वाभिप्रायम् । चोदनासूत्रे निर्दिष्टो यः प्रमाणपरिग्रहः स...प्रकारः स आद्येन लक्षणेन प्रपञ्चित इति बृहट्टीकोक्तेरित्यभिप्रेत्याह तत्र चोदनैवेत्यादिना । वार्तिकदर्शितमुपोद्घाताधिकरणं प्रस्तौति ॥ तादिहेति ॥ उद्भिदाधिकरणेषु यानि प्रत्यक्षविषयवाक्यानि तानि सर्वाण्यत्रोदाहरणानीत्याह ॥ संभवतीति ॥ उद्भिदादीनां विध्यर्थवादमन्त्रान्यतमरूपेण धर्मप्रमित्युपयोगाभावमाद्यश्लोकसंगृहीतं विवृणोति ॥ न तावदिति ॥ उत्तमेति ॥ 'स्योनं ते सदनं करोमि'

इत्यादिषूत्तमपुरुषः 'यत्ते ग्राविण्णा चिच्छिदुस्सोमराजन्' इत्यादिष्वामन्त्रणम् 'बर्हिरसि देवंगमम्' इत्यादावस्यन्तता 'इषेत्वा' इत्यादौ त्वान्तता आदिशब्देन 'य इमं यज्ञमवन्येय यज्ञपतिं वर्धानि' इत्यादिमन्त्रश्रुतायज्ञपतिवृद्ध्याशीरादयो गृह्यन्ते । 'चत्वारि शृङ्गा त्रयो अस्य पादा' इत्यादीनामुत्तमपुरुषाद्यभावेऽपि मन्त्रप्रसिद्धिमात्रेण मन्त्रतागुणस्याप्रसिद्धत्वादिति । उद्भिद्बलभिदादिनामकस्य यज्ञसाधनतार्हस्य कस्यचिद्गुणस्य रूढ्या योगेन वा...कप्रसिद्ध्यभावादित्यर्थः । मत्वर्थलक्षणावाक्यभेदतत्प्रख्योपमानानुपपत्तयः स्युः । क्रमेणोद्भिदधिकरणादिचतुष्टये ग्रन्थकृतैव स्पष्टीकरिष्यन्ते । उद्भिदादिपदानामुक्तरीत्या मन्त्रार्थवादत्वासंभवेऽपि स्वाध्यायविधिसिद्धपुरुषार्थपर्यवसायित्वलाभाय गुणविधानेन नामधेयतया वा प्रामाण्यमवश्यं वक्तव्यमिति सिद्धान्तयति ॥ सकलस्यैवेति ॥ ननु द्वारविशेषानिर्धारणेनाध्ययनविधिमहिम्ना सामान्यप्रामाण्यसमर्थनमर्थवादप्रस्ताव एव कृतं किमर्थमिह पुनस्तत्समर्थनमित्याकांक्षायामाह ॥ तदेतादिति ॥ विशेषविचारायेति ॥ गुणविधानेन नामत्वेन वा केनचित्प्रकारेण निर्धारणं विशेषविचारः । तदर्थं पुनरुपस्थाप्यते तदभावे हि स्वतन्त्रे यः प्रकारविशेषचिन्तेति शङ्का स्यात्तत्सत्त्वे प्रथमाधिकरणसमर्थितावश्यंभावप्रामाण्यप्रतिष्ठा-

सिद्ध्यर्थत्वेन तच्छेषता स्फुटीकृता भवतीति भावः । अपि वा नामधेयः स्यात् ॥

End:

॥ अर्थाद्वा ॥ वाक्यशेषस्याव्यवस्थितार्थनिर्धारणोपायत्वेऽभिहिते यत्र स्रुवेणावद्यतीत्यादौ वाक्यशेषो न संभवति तत्र कथं व्यवस्थितस्यार्थस्य...मिति अपेक्षायां तत्रापि विधेयसामर्थ्यसनाथाद्विधेर्निर्धारणे त्येवं विधान्तरेण विध्युपयोगव्युत्पादनादनन्तरसङ्गतिरध्यायसङ्गतिश्चेति दर्शयन् विषयविचारा...... ।

Colophon: (Leaf No. 101)

इति शास्त्रदीपिकामयूखावल्यां प्रथमस्याध्यायस्य
तृतीयः पादः ॥

Subject: Śāstradīpikāvyākhyā, Mayūkhāvaḷī; 1. 2—4,

Remarks:—The Ms. is in a decaying condition. Dr. Burnell has not noticed this work. The Ms. is in fact tied up with another. The first work is Somanātha's Mayūkhamālikā.

॥ शास्त्रदीपिकाव्याख्या—कर्पूरवर्त्तिका ॥

6922. ŚĀSTRADĪPIKĀVYĀKHYĀ—KARPŪRAVARTTIKĀ.

Burnell's Catalogue No. 9519. Page 183. Left column. Substance—Palm leaf. Size—17 × 1⅛ inches. Leaves—272. Lines—5 to a Page. Script—Grantha. No .of Granthas—

8000. Author—Rājacūḍāmaṇidīkṣita. Incomplete. Not printed.

Beginning:

श्रीमानङ्घ्रिसरोजन(?)स्त्रिजगतां कामाभिपूर्तिक्षमो
वामार्धेन समृद्धतामुपनयन् कामावलेपश्रियाम् ।
भूमा कश्चन कृत्रिमेतरवचस्सीमाभिगम्याकृतिः
श्यामा कामुकशेखरो भवतु वश्श्यामारुणः श्रेयसे ॥

श्रीः ॥ श्रुतिप्रमाणाशेषत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ।

ननु यथा पूर्वस्मिन् षट्के अग्निहोत्रादिप्रकृतिविषय उद्भिदादिविकृतिविषयश्च विचारःकृतस्तथोत्तरस्मिन्नपि षट्के इष्टकादिविकृतिविषयस्तथा प्रयाजानां किमाग्नेयादिषु तन्त्रत्वमुत नेति प्रकृतिविषयश्च विचारः करिष्यते । ततश्च कथं षट्कयोः भेदः कथं वानयोः पौर्वापर्यमित्यतआह—पदङ्गेति ॥ यद्यपि प्रकृतिविकृतिविषयकविचार उभयत्रापि तुल्यस्तथापि पूर्वस्मिन् षट्के उपदेशरूपप्रमाणव्यापारश्चिन्तितः उत्तरस्मिंश्च षट्केऽतिदेशरूपप्रमाणव्यापारश्चिन्तयिष्यत इति विचार्यप्रमाणव्यापारभेदात् षट्कयोर्भेदः तद्वत्कुर्यादि......स्यर्थमिदं...दिष्युपदेशाधीनंसिद्धत्वाच्चादानन्तर्यं चेति भावस्तत्र न पठ्यमानो ग्रन्थसन्दर्भ उपदेशस्तथा सति विश्वजिति

फलस्यौपदेशि...पत्तेः । किंतु...संबन्धमनादृत्य धर्माणां प्रकारस्य वा प्रत्यायकं प्रत्यक्षमानुमानिकं वा शास्त्रं तदुपदेशोऽतिदेशश्चाकरणवाग्रे(?) लक्षयितव्य इति ध्येयम् ॥

End:

मनोतायां तु वचनादविकारः स्यात् ॥

याज्यादिव द्विकृतिषु मनोताया अविकारः स्यादित्युत्थितेः सङ्गतिः ।

ननु प्रकरणादेव मनोतायाः प्रकृतार्थासिद्धे नेदं वचनमस्याः प्रकृत्यर्थतार्थं किंतु विकृतिषु ह प्रतिषेधार्थमेवेति कथं पूर्वपक्ष इत्यत आह—नत्र पशोरिति ॥

वस्तुतस्त्वस्य वचनस्य प्रदेशान्तरे श्रुतत्वेन मनोतासम्भवस्य विधिशेषत्वासंभवादित्यपि द्रष्टव्यम् ।

नन्वेवमपि ज्योतिष्टोमप्रकरण एवाम्नाते स्वनियाग्रेयव...... ।

Colophon: (Leaf No. 249)

इति श्रीदान्तिद्योतिदिवाप्रतीपाक्ष विश्वजिदतिरात्रयाजि रत्नखेट श्रीनिवासदीक्षितस्य कामाक्षिगर्भसंभवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु कर्पूरवार्तिकाख्यायां शास्त्रदीपिकाव्याख्यायां दशमस्याध्यायस्य तृतीयः पादः ॥

Subject: Śāstradīpikāvyākhyā otherwise known as Karpūra-

varttika VII. 1 to X. iv.

Remarks:—The Ms. is in a fairly good condition.

The author of this commentary on the Śāstradīpikā is the same as the author of the Tantraśikhāmaṇi vide. notes under No. 6841.

Rājacūḍāmaṇi also comments only from the II Pāda of Adhyāya 2.

The Ms. has been transcribed in the library vide. T. V, No. 412

॥ शास्त्रदीपिकाव्याख्या—कर्पूरवर्त्तिका ॥

6923. ŚĀSTRADĪPIKĀVYĀKHYĀ—KARPŪRAVARTTIKĀ.

Burnell's Catalogue No. 2058. Page 83. Left column. Subtance—Paper. Size—10½×4¼ inches. Sheets—58 (3-60). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Rājacūḍāmaṇidīkṣita. Incomplete. Wants beginning. Printed.

Beginning:

...घनत्व कृत इत्यर्थः । निष्फलत्वादिति साक्षात्फलान्वयाभावादित्यर्थः ।

* *

॥ द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥

अवघातादीनामदृष्टार्थत्वापत्त्या यथासंयोगं व्यवस्थायामपि स्फ्यादीनां यथा सामर्थ्यमनियमेऽप्यदृष्टार्थत्वा-

भावान्न व्यवस्थायां प्रमाणमित्युत्थानात्संगतिः

स्फ्यश्चेति ॥

'स्फ्यश्च कपालानि चाग्निहोत्रहवणी चार्कं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला च' इत्यनुक्रम्येत्यर्थः

तथेति ॥ 'कपालेषु श्रपयति' अग्निहोत्रहवण्यां हवींषि निर्वपति, 'शूर्पेण विविनक्ति' 'कृष्णाजिनमधस्तादुदूखलस्या वस्तृणाति' 'शम्यायां दृषदमभ्यादधाति' 'उलूखलमुसलाभ्यामवहान्ति' 'दृषदुपलाभ्यां पिनष्टि' इत्येतेषामादिशब्देन ग्रहणम् ॥

End :

आज्याच्च सर्वसंयोगात् ॥

शूर्पाणीति नन्वत्र कथं पादभेदः । कथं वा पूर्वपादानन्तर्यं । कथं वानुष्ठानचिन्तात्मिकायाःशेषकार्यकर्तव्यताचिन्तायाः शेषाध्यायसंगतिरित्याशङ्क्य पूर्वपादान्ते चतुर्धाकृतपुरोडाशार्पणस्य शेषप्रतिपत्तिरूपभक्षणार्थतारूपेण न तत्प्रसङ्गाच्छेषकार्याणि हृदयमागतान्युपांशुयाजाज्या अपि कर्तव्यानि न वेत्यस्मिन् पादे चिन्त्यते

* * *

* न तावदाद्यः । ध्रौवस्याज्यस्य पश्चाद्भावपुरोडाशशेषप्रतिपत्त्यर्थस्विष्ट.... ॥

Colophon:

इति श्री........प्रदीपाङ्कविश्वामित्रवंशमुक्ताफललक्ष्मीभवस्वामि
भट्टस...खसर्वतन्त्रस्वतन्त्राद्वैतविद्याचार्यप्रतिदिनप्रबन्धपरमेश्वर-
षड्भाषा सार्वभौमसाग्निचित्यसर्वक्रतुविश्वजिदतिरात्रयाजिसत्यमं-
गलरत्नखेटश्रीनिवासदीक्षिततनयस्य श्रीमदर्धनारी-
श्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचू-
डामणिदीक्षितस्य कृतौ शास्त्रदीपिकाव्याख्यायां तृतीयाध्यायस्य
चतुर्थः पादः ।

Subject: Śāstradīpikāvyākhya otherwise known as Karpūravarttika III 1 to 5.

Remarks:—The Ms. is in a fairly good condition.

॥ शास्त्रदीपिकाव्याख्या—दिनकरभट्टीया ॥

6924. ŚĀSTRADĪPIKĀVYĀKHYA—DINAKARABHAṬṬĪYĀ.

Burnell's Catalogue No. 2076. Page 88. Right column.
Substance—Paper. Size—10 × 4½ inches. Sheets—56
Lines—8 to 9 to a Page. Script—Devanāgarī. No. of
Granthas—1500. Author—Dinakara. Incomplete. Not
printed.

Beginning:

श्रीगणेशाय नमः ।

उन्मूलयन्विरुद्धयन्साधयन्वा विधान्तरैः ।
जीर्णाश्रयं दिनकरो नवमे वक्ति साम्प्रतम् ॥

यज्ञकर्मप्रधानं तद्धि चोदनाभूतं । तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् । विशेषातिदेशस्येह हेतुत्वात्तदूहश्चिन्त्यते । स च त्रिविधः मन्त्रोहः सामोहः संस्कारोहश्चेति । यद्यपि साम्नो मन्त्रत्वऋगक्षराभिव्यक्तिजनकत्वेन संस्कारकर्मत्वं चास्ति तथापि तदूहस्य न्यायान्तरसाध्यत्वाद्भाष्यादौ पृथगुक्तिः । ऊहश्च प्राकृतप्रयोगस्यान्यथाभावः । स च द्विविधोन्यसंबन्धरूपो विकाररूपश्चेति । अवघातादिसंस्कारोहस्य नीवारादिसंबन्धरूपत्वात् । मन्त्रोहस्य सूर्यादिपदप्रक्षेपरूपत्वेन एकधैकधेत्यावृत्त्यादिरूपत्वेन च मन्त्रविकाररूपत्वात् । सामोहस्योत्तरग्रन्थपठितर्गक्षरसंबन्धरूपत्वेनायीभावादिविपर्यासरूपत्वेन चोभयरूपत्वात् । प्राभाकरास्तु संस्कारोऽपि विकारभेदः कारकभेदेन क्रियायां विकारादित्याहुः ॥

End:

आज्यसंस्थाप्रतिनिधिः स्याद्द्रव्योत्सर्गात् ।

* * *

उत्सृजतेस्त्यागवाचित्वेन व्यापारोपरमपरत्वे लक्षणापत्तेः प्राजापत्येषु त्वाज्येनेति वाक्यस्याप्यवाक्यबुद्धपशुद्रव्यकत्वेन विरोधवत्त्वान् ब्रह्मसाम्न्यालमत इत्युत्कर्षविधेरुत्पत्तिवाक्यबुद्धपशुद्रव्यकत्वेन विरोधाभावादुत्सृजतेः व्यापारोपरमे लक्षणेति वैषम्यम् । शेषसंस्थापेति

मन्दौ तु पूर्वयागः पर्यग्निकरणान्ताङ्गविधिना समाप्तोऽपि सन्नेष इवावभासते। आज्ययागे न च तदुत्तरंभाविना-तत्समाधिरिव भासत इति गौणौ ॥ आज्यं पात्नीवतं कुर्यादिति वाक्यार्थोऽपि आज्येनेति तृतीयासंस्थापयति संबन्धादुपपन्ना ॥

Colophon:

सोमेश्वरप्रपौत्रो नारायणशर्मणः पौत्रः ।
श्रीरामकृष्णसूनुः दिनकरशर्माकरोदमुं ग्रन्थम् ॥
इत्युमारामकृष्णसुतदिनकरकृते भाट्टदिनकरे
नवमस्याध्यायस्य चतुर्थ पादः ॥

विद्वत्प्रभुवरश्रीमद्विनायकतनूभुवः ।
प्रभोर्वसन्तरायस्य ग्रन्थ एष प्रवर्धताम् ॥

Subject: Śāstradīpikāvyākhyā I—IX. iv.

Remarks:—The Ms. is in a fairly good condition. On the title page is given,

नीलकण्ठदीक्षितस्य नवमाध्याय दिनकरभट्टीयम् ।

Dinakarabhaṭṭa, the author of this commentary on the Śāstradīpikā is the son of Rāmakṛṣṇabhaṭṭa and the brother of Kamalākarabhaṭṭa, the author of Nirṇayasindhu and other works. He is the father of Gāgābhaṭṭa alias Viśveśvara, the author of the Bhāṭṭacintāmaṇi (No.6842). Dinakara flourished in the 17th century.

ŚĀSTRADĪPIKĀVYĀKHYĀ—DINAKARABHAṬṬĪYĀ.

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
3925	J. L.	612	Paper.	11×5	107	9	Devanāgarī.	Incomplete; III. i—viii
6926	,,		,,	12×5	25 (20-44)	11-12	,,	,, IV. i—iv.
6927	,,	611	,,	11×4⅓	47	11	,,	,, IX.
6928	,,	,, b	,,	10¾×4⅓	81	12	,,	,, X.
6929	,,	,, c	,,	10½×4½	28	11	,,	,, XII.

DETAILED REMARKS

on the

ŚĀSTRADĪPIKĀVYĀKHYĀ – DINAKARABHAṬṬĪYĀ

MSS. CONTAINED IN THE ABOVE TABLE.

6925 The title page has—

"भाट्टदिनकरतृतीयाध्यायो गाम्भीरेः ।"

Do चतुर्थाध्यायो Do

6927 On the title page we read—

गम्भीरराजात्मजपुस्तकं । भास्करपुस्तकं । इदं पुस्तकं रङ्गअब्बुभट्टगोस्वामिनाम् ।

6928 Do. Do.

6929 The last chapter represented by this Ms. contain these following verses in the colophon—

B. T. रामेश्वरप्रपौत्रो नारायणशर्मणः पौत्रः ।
श्रीरामकृष्णसूनुः दिनकरशर्माकरोदमुं ग्रन्थम् ॥ १ ॥

न्यायार्कांशुसहस्रसञ्चरणवानाचार्यवाक्छायया
युक्तो द्वादशलक्षणोबुधमनःपद्मप्रकाशोद्यतः ।
धर्माणां प्रतिपादकः श्रुतिगणप्रोतो जयंस्तेजसा
दस्मान् संप्रति भूतले दिनकरो भाट्टस्समुज्जृम्भते ॥ २ ॥

ज्योतिष्टोममुखैर्मखैर्मुनिवराः कृच्छ्रेण वाञ्छन्ति यं
स्वर्गं जेतुमनास्सुरास्तमपि यो निर्मातुमैच्छत्स्वयम् ।
यो रामाय समस्तमस्त्रनिचयं प्रादादमेयौजसे
विश्वामित्रमहामुनिर्विजयते वंशस्य नः कारणम् ॥३॥

विश्वामित्रमुनीश्वरान्वयसुधासिन्धौ सुराणां द्रुमः
श्रीरामेश्वरनामधेय उदभूदाम्नायशाखोज्ज्वलः ।
नानाशास्त्रफलैः समस्तवसुधावृन्दारकाणां परं
सन्तोषं जनयन् रघूद्वहलसत्सेवालतालिङ्गितः ॥ ४ ॥

श्रीरामेश्वरतस्ततस्समभवत् श्रीभट्टनारायणः
शास्त्राम्नायपरायणः खलमतध्वान्तैकविद्रावणः ।
काश्यां पातकिविद्रुतं भगवतो विश्वेश्वरस्याचलं
लिंङ्गं भोग्यवशात्सुखाय जगतां संस्थापयामास यः ॥ ५ ॥

नारायणस्यात्मज आविरासीत्
सरामकृष्णोऽर्चनदृष्टरामः ।
पराजितो वागधिपोऽपि येन
विद्यानवद्यप्रतिभाधिकेन ॥ ६ ॥

दिनकर इति रूढस्तत्सुतो ग्रन्थमेनम्
मतियुतसुखबोध्यं सर्ववक्तव्ययुक्तम् ।
असृजदथ समर्थानन्दसच्चित्स्वरूपे
रघुपतिपदपद्मे जन्मसार्थक्यमाप ॥ ७ ॥

After the colophon, we read in this Ms.—

पुस्तकमेतत् भास्कररायस्य स्वं ।

On the title page we have—

सूनुर्गंभीरराजस्य भारतीत्युपनामवान् ।
भट्टि दिनकरग्रन्थमकरोत्स्वत्वसंहितम् ॥
इदं पुस्तकं रङ्गभट्टभट्टगोस्वामिनाम् ।

॥ शास्त्रदीपिकाव्याख्या—प्रभामण्डलम् ॥

6830. ŚĀSTRADĪPIKĀVYĀKHYĀ—PRABHĀMAṆḌALAM.

Burnell's Catalogue No. 9553. Page 83. Left column. Substance—Palm leaf. Size—15 × 1½ inches. Leaves—294. Lines—5 to a Page. Script—Telugu. No. of Granthas.—6000. Author—Yajñanārāyaṇa. Complete. First Adhyāya only. Not Printed.

Beginning:

शीव.. सम्बन्धिवीचीनिचय
खचितघनैः पूर्णविंबाभ....
...यमधृतकलङ्का तत्प्रभा......
द्रीकलापः ।

वन्देऽस्मत्प्रपितामहं तिरुमलश्रीयज्वराजं तथा
यज्ञेशं च पितामहं स्वपितरं श्रीकोण्डुभट्टारकम् ।

तच्छिष्यानुजनिं पितृव्यतिलकं श्रीलक्ष्मणार्यं गुरुं
ज्येष्ठं श्रेष्ठगुणान्वितं तिरुमलाख्यानं वरं यज्वनाम् ॥

कदळिकपोतमहेशप्रीतिपरिप्राप्तभारतीश्रीकान्
श्रीचरकूरि कुलेन्दूनन्यानपि नौमि पुरुषधौरेयान् ॥

नुत्वेह गौतमात्स्वातनयोलंकारनाटकादिकरः ।
वेदान्तशब्दतर्कग्रन्थकृदाभाति जगति यज्ञेशः ॥

प्रभिन्नतमसं शास्त्रदीपिकार्थप्रकाशनम् ।
प्रभामण्डलनामानं प्र...यंसोऽहमारभे ॥

आम्नायस्य क्रियार्थत्वात् ॥ तत्रास्मिन्नध्याये करिष्यमाणार्थवादमन्त्रस्मृतिनामधेयविचारस्य संगतिं कथयितुं प्रथमसूत्रवृत्तार्थं कीर्तयति । अथातो धर्मजिज्ञासेत्यत्रेति । अथातो धर्मजिज्ञासेत्यत्र धर्मो जिज्ञास्यत्वेन विचार्यत्वेन प्रतिज्ञात इत्यस्य या जिज्ञासा शो(?)मस्य विचारे लक्षणाप्रकारस्तु प्रथमसूत्रव्याख्याने सम्यगस्माभिरुपपादितो द्रष्टव्यः। ननु कैः धर्मो विचार्यत इत्यत्र.... प्रमाणतः प्रमाणं च स्वरूपं च साधन च फलं च प्रमाणस्वरूपसंबन्ध सफलानि । तैर्धर्मे किं प्रमाणम् ॥

End:

शिष्याणां सुखग्रहणार्थं वृत्तं वर्तिष्यमाणं चार्थं कारिकायां...ष्यादर्शयति— सोमार्थेति । 'औदुम्बरो यूपो भवति' इत्यादिर्विधिशब्दार्थः यद्वा विधिश्चोदना तथापि च नामादिभिर्युतो नामादिचतु...ष्वं यात्मको वेदश्च तद्वेदेति वेदं रूपमूलमिति स्मृतिः। मन्वादि स्मृतिश्च तद्वतीत्यनेन बाह्यस्मृतिव्यावर्तिता यद्वा तद्वद्वेदवदिति दृष्टान्तः निरस्तदोषं चरितमाचारश्चेह धर्मे प्रमाण इति सिद्धम् ॥ परं तु द्वितीयाद्यध्यायेषु तद्भेदप्रकारः तद्भेदप्रयोगेति क्वचित्क्वचित्पारप्रयोगश्चतुर्थाध्यायार्थः संहृतः ॥ विनियोगश्शेषत्वं क्रमस्याप्युपलक्षणं फलम् ॥ फलकामाद्यधिकारः आदिशब्देन नामान्यातिदेशादयोगृ-

ह्यन्ते करिष्यत इति शेषः ॥

Colophon:

उच्चैरात्मसमानदेशिकमुखप्रोदर्णिवर्णावलीं
केचित्कीरवदुद्गिरन्ति विबुधंमन्यास्सदाडंबरम् ।
किं तैः पारकदन्धन प्रकोमभिः(?)श्रीयज्ञनारायणः
सुत्वेको(?)सरहस्यवाक्यसरणिं व्याख्याति षड्दर्शनमि ॥

इति श्री सकलपण्डितमण्डलाखण्डलचरुकूरिकोण्डुभट्टोपाध्यायतनयेन पितामहश्रीयज्ञेश्वरभट्टोपाध्यायशिष्येण काश्यपगोत्रबह्वृचाग्रेसरेण तिरुमलयज्वप्रियसोदरेण गंगांबिकेयेन श्रीयज्ञनारायणदीक्षितेन विरचिते शास्त्रदीपिकाव्याख्याने प्रभामण्डलव्याख्याने प्रथमस्याध्यायस्य

चतुर्थः पादः ।

अध्यायश्च समाप्तः ।

Subject: Śāstradīpikāvyākhyā otherwise known as Prabhāmaṇḍala. 1 i—iv.

Remarks:—The Ms. is in good condition.

The Prabhāmaṇḍala of Yajñanārāyaṇa like other commentaries, comments only from the second pāda of the I Adhyāya of the Śāstradīpika. This Yajñanārāyaṇa belonged to, Carukūrikula, Kāśyapagotra and Ṛkśākhā. He gives his geneology thus—


Tirumalayajvan.
Yajñeśa=Sarvāmbikā.
Koṇḍubhaṭṭāraka
(Gaṅgāmbikā)
Lakṣmaṇārya.
Tirumalayajvan
Yajñanārāyaṇa.

He was the pupil of his grandfather Yajñeśa. The Lakṣmaṇārya refered to above as the author's uncle is none other than चेरुकूरि लक्ष्मीधर, the author of the Advaitamakaranda etc., and who in his Sanyāsāśrama, had the name Rāmānandāśramin. Vide 4269. Vol. VIII. This Lakṣmīdhara was a court poet of Tirumalarāya of Āravīdu dynasty of Vijayanagar. He is the author of many works chief of which may be mentioned, Śrutirañjanī, a commentary on Gīta-Govinda, Abhīṣṭārthadāyinī a commentary on Jayadeva's Prasannarāghavā, and Ṣaḍbhāṣācandrikā, a Prākṛt Grammar. The village Carukūru is situated in Guntur District. In his Śrutirañjanī he gives a geneology of his patron Tirumalarāya.

॥ शास्त्रदीपिकाव्याख्या—प्रभामण्डलम् ॥

6931. ŚĀSTRADĪPIKĀVYĀKHYĀ—PRABHĀMAṆḌALAM.

Burnell's Catalogue No. 9554. Page 83 Left column.

Substance—Palm leaf. **Size**—15 × 1½ inches. **Leaves**—205. **Lines**—5-6 to a **Page**. **Script**—Telugu. **No. of Granthas**—6000. **Author**—Yajñanārāyaṇadīkṣita. **Complete.** Second Adhyaya alone. **Not printed.**

Beginning;

पतन्ति शश्विरोगंगापूरेऽवटफलावली
तयोः प्रवालमालेव धार्यमाणध्विनोध्रुमाम्(?)।
श्रीपितामहयज्ञेशगुर्वनुग्रहचोदितः
व्याकरोम्यहमध्याये द्वितीयेशास्त्रदीपिकाम् ॥

भावार्थाः कर्मशब्दाः ॥ द्वितीयाध्यायस्य शास्त्रसंगतिं कथयितुं प्रथमाध्यायसिद्धमर्थं अनुपपत्तिं प्रथमयति । धर्मस्य प्रमाणं धर्मप्रमाजनकं प्रामाण्यमित्यर्थः । क्वचित्पुस्तके प्रथमाध्याये धर्मो वेदस्य प्रामाण्यमिति पाठः । तदा वेदपदं स्मृत्याचारसामर्थ्यानामुपलक्षणमिति बोध्यं प्रथमेऽध्याये प्रामाण्यं विविच्य दर्शयति— प्रथमे पाद इति ।

चोदनायाः....ति प्रामाण्यं निरूपितमिति शेषः । अनुषङ्गो वात्रिपाद्यामिति तत्राप्यर्थवादाधिकरणे अर्थवादप्रमाणं मन्त्राधिकरणे मन्त्रप्रामाण्यं त्रिस्मृतिपादे स्मृत्याचारप्रामाण्यं नामधेयपादे नामधेयवाक्यशेष सामर्थ्यानां प्रामाण्यमुक्तमिति विवेकः ।

End:

क्वचिद्गुणभेदाद्भेदं निरस्यति । एवमिति । एकस्मिन्नपि करण्यध्येतृभेदे न द्वयोरुत्पत्तिविध्योः संभवादिति भावः । अधिकरणार्थमुपसंहरति— तस्मादिति ॥ ❀ शिष्याणां सुखबोधार्थं लक्षणार्थं वक्ष्यमाणलक्षणार्थं च कारिकया परिगृह्णाति । शब्दान्तरेति । ससंख्यैः शब्दान्तराभ्यासगुणैः नाम्नादूरेण प्रकरणान्तरेण च सहसा पदादित्रयाणामयं भेदः नादितः तस्मिन्नध्याय इति शेषः । ततः परं तृतीध्याये एषां भिन्नानां कर्मणां विनियोगचि-

न्ता करिष्यत इति योजना ॥

Colophon:

इति श्रीसकल + शास्त्रदीपिकाव्याख्याने प्रभामण्डलाख्याने
द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

Subject: Śāstradīpikāvyākhyā otherwise known as Prabhāmaṇḍala. Adhyāya II.

Remarks:—The Ms. is in a fairly good condition.

॥ शास्त्रदीपिकाव्याख्या—प्रभामण्डलम् ॥

6932. ŚĀSTRADĪPIKĀVYĀKHYĀ—PRABHĀMAṆḌALAM.

Burnell's Catalogue No. 9555. Page 83. Left column.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—91 (160-250). Lines—7 to a Page. Script—Grantha. No. of Granthas—2000. Author—Anubhavānandayati. Incomplete. Not printed

Beginning:

....क्तसर्वा एव देवताः प्रीणाति इति मस्तु(?)दधिभवं मण्डं निष्पकं शिरसि... ।

❋ ❋

अहीनवत्पुरुषधर्मस्तदर्थत्वात् ॥ पूर्वाधिकरणे श्रुत्या सह प्रकरणस्य विरोधाविरोधौ चिन्तितौ । अधुना लिङ्गवाक्याभ्यां तस्य तौ चिन्त्येते । संगतिश्चात्रापवादिकीत्यभिप्रेत्य विषयं दर्शयति--दर्शपूर्णमासयोरिति

'प्राणो वै दक्षोऽपानः क्रतुः तस्माज्जञ्जह्यमानो ब्रूयां मयि दक्षक्रतुः' इति 'प्राणापानावेवात्मन् धत्ते सर्वमायुरेति' इति। इदमुदाहरणमुपलक्षणम् ज्योतिष्टोमप्रकरणगतस्य तीर्थे स्नाति तीर्थमेव समानानां भवतीत्यादेः । गात्रविनामेन विदारितमुखपुरुषो जंजह्यमान इत्युच्यते । पूर्वाधिकरणे ये पक्षा उपन्यस्ताः पुरुषमात्रधर्माः क्रतुयुक्तपुरुषधर्माः शुद्धधर्मा इति त एवात्रापि विचार्यत्वेनानुवर्तन्त इत्याह—तत्र संशय इति ॥

End:

सोम इति सोमलतेत्यर्थः । श्रुत्या सोमेन यजे....नुतावताकथमंगानां यागार्थत्वमेव न संस्थार्थत्वं तत्राह—तत्संस्कारार्थ इति । सोमद्रव्यसंस्कारार्थ इत्यर्थः । तद्वारत्वाद्यागीय....किंच प्रकरणावि........................सिन संस्थानां दीक्षणीयाद्यग्राहकत्वामित्याह....सर्वे चेति सिद्धान्तमुपसंहरति । तस्मादिति उक्त्यादि....विशेषात्स ...समानं दीक्षणीयाद्यंगविधानं येषां ते तथोक्ता इति पूर्वपक्षसूत्रार्थः ।

ये...पराक्रमः पुरा लोकपालनपरो (महा) नटः ।
अष्टपादस्तरभो महानभूत षष्ठपाद इह तस्य चिन्तितः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीकृष्णानन्दपूज्यपादशिष्य

श्रीमदनुभवानन्दविरचिते शास्त्रदीपिकाप्रभामण्डले

तृतीयाध्यायस्य षष्ठः पादः ।

प्रकरणविशेषादसंयुक्तं प्रधानस्य ।

चिदंबरेश्वराय नमः ।

Subject: Śāstradīpikāvyākhyā otherwise known as Prabhāmaṇḍala; III. 1-6.

Remarks:— The Ms. is in a much decaying condition.

The author of this commentary on the Śāstradīpikā is an Advaitic Sanyāsin, Anubhavānandayati, pupil of Śrī Kṛṣṇānandayati the author of the Vedāntic work Siddhāntasiddhāñjana. Anubhavānandayati must have flourished in the latter half of the 17th century.

॥ जैमिनीयन्यायमाला सविस्तरा ॥

6933. JAIMINĪYANYĀYAMĀLĀ SAVISTARĀ.

Burnell's Catalogue No. 2068. Page 85. Right column, Substance—Paper. Size—11 × 4¾ inches. Sheets—308 (Sheets 161, 162 & 228 are missing out of 310). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—11000. Author—Mādhava. Complete. Printed.

Beginning:

श्रीसरस्वतीविनायकाभ्यां नमः ॥
वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननम् ॥

स खलु प्राज्ञजीवातुः सर्वशास्त्रविशारदः ।
अकरोज्जैमिनिमते न्यायमालां गरीयसीम् ॥
तां प्रशस्य सभामध्ये वीरः श्रीबुक्कभूपतिः ।
कुरु विस्तरमस्यास्त्वमिति माधवमादिशत् ॥

End:

आर्त्विज्यं किं त्रिवर्णस्थं विप्रयोग्येव वाग्रिमः ।
विद्यावत्वान्न तद्युक्तं ब्राह्मणस्यैव तत्स्मृतेः ॥

विप्रक्षत्रियवैश्यानामधीतवेदानां विद्यावत्वादार्त्विज्यमस्तीति चेन्न ।

* * *

तस्माद्विप्रस्यैवार्त्विज्यं ॥

देवानां स्थितिकृत्पुरो हरिहरोऽभूत्सूत्रकृज्जैमिनिः
तद्भाष्यं शबरोऽभ्यधाद्वदितवांस्तद्विस्तरं माधवः ।
सोयं नित्यकलत्रपुत्रजनकप्रज्ञाधिपत्यस्थिति-
दीर्घायुस्सहबन्धुभिर्विजयतामाचन्द्रमातारकम् ॥

Colophon:

इति श्रीमात्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिमाधवविरचिते जैमिनीयन्यायमालाविस्तरे द्वादशाध्याये चतुर्थः पादः ।

समाप्तो द्वादशाध्यायप्रसङ्गः ॥

Subject: Jaiminīyanyāyamālāvistara. I. 1. to XII. 4.

640

Remarks:—The Ms. is in a fairly good condition. The readings in this Ms. agree completely with those of the Ānandāśrama edition of this work.

The Jaiminīyanyāyamālā in verse and its vistara in prose, form a summary of the doctrines of the Mīmāmsā School. This work belongs to the 14 th century A. D.

This work has been published as No. 24 in the Ānandāśrama Sanskṛt Series. This Mādhava is the father of Bhaṭṭa Someśwara :the author of Nyāyasudhā a commentary on Tantravārttika.

21 Mss. more representing the same work are described in a table below.

JAIMINĪYANYĀYAMĀLĀ WITH VISTARA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6934	B. L. 2062	Paper.	10×4¼	448	8-9	Devanāgarī.	Complete.
6935	„ 2061	„	10×4	505	9	„	„
6936	„ 2075	„	13×5	321	10 or 11	„	„
6937	„ 9558	Palm leaf.	16½×1½	225	5-6	Telugu.	Incomplete; I. 1—VI. 8.
6938	„ 9560a	„	„	210	8-9	„	„ „ „
6939	„ „ b	„	„	43 (39-81)	5	„	„ I. ii. 2—II. i. 14.
6940	„ 9562	„	15½×1⅛	116	9-11	Grantha.	„ I. 1—III. 8.
6941	„ 2101	Paper.	12½×5	141	„	Devanāgarī.	„ „ „
6942	„ 2065	„	12×5	62	9	„	„ I. i. 1—II. i. 15
6943	„ 9566	Palm leaf.	16×1½	12 (5-16)	8	Telugu.	„ I. iv. 17—III. v. 14.
6944	„ 9559	„	16¼×1½	156	5-6	„	„ VII. 1—XII. iv. 16.

JAIMINĪYANYĀYAMĀLĀ WITH VISTARA (Contd.)

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
6945	B. L. 2064	Paper.	10×4	80 (373-552)	9	Devanāgarī.	Incomplete. IX i. 2—XII. iv. 16.
6946	,, 9563	Palm leaf.	12×1	110 (11-120)	5-6	Grantha.	,, X. vii. 9—XII. iv. 16.
6947	,, 9561	,,	16¼×1¼	185	5-7	Telugu.	,, VII. 1—XII. iv. i.
6948	S. K. 35	Paper.	10×4½	94	7	Devanāgarī.	,, I Adhyāya only.
6949	,, 36	,,	,,	64	,,	,,	,, IV ,, ,,
6950	,, 37	,,	9¾×4½	53	6	,,	,, V ,, ,,
6951	,, 38	,,	9½×4½	73	7	,,	,, VI ,, ,,
6952	,, 39	,,	9¾×4½	32	,,	,,	,, IX ,, ,,
6953	S. S. 154b	Palm leaf.	16½×2	61	10-14	Grantha.	,, VI. i—IX. iv. 15.
6954	,, 50	Paper.	10½×4	75 (88-162)	10-12	Devanāgarī.	,, III. i—IV. i.2.

DETAILED REMARKS
on the
MSS. OF JAIMINĪYANYĀYAMĀLĀ WITH VISTARA IN THE ABOVE TABLE.

6934 After the colophon is given—

‘ उमापतिपण्डितानामयं ग्रन्थो नित्यमस्तु परोपकाराय ’।

6935 After the colophon is seen—

‘ —श्रीनिवासपण्डितानाम् ।’

6941 On the title page is given—

हे पुस्तक + काशीदेशाहून + आणिलें अस्सें ।

6948 On the title page is given—

‘ ग्रहपाति दीक्षितानां भाट्टसाराध्यायाः ।’

6953 The other work contained herein is Somanātha's Mayūkhamālikā

॥ न्यायरत्नमाला ॥

6955. NYĀYARATNAMĀLĀ.

Burnell's Catalogue No. 2088. Page 85. Right column. Substance—Paper. Size—10½ × 4½ inches. Sheets—92. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—3000. Author—Pārthasārathimiśra. Complete. Printed.

Beginning:

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम् ।
ब्राह्मं सर्वमसर्वं सदसद्वन्दे हरिं विभुम् ॥ १ ॥

मीमांसार्णवसम्भूतैः कुमारस्वामिनोद्धृतैः ।
न्यायरत्नैरहं मालां संग्रथ्नामि मनोरमाम् ॥ २ ॥

तत्र स्वाध्यायविध्यर्थः [प्रर्थ] प्रथमं तावदुच्यते ।
आचार्यदृष्टिमाश्रित्य प्रतिपक्षनिरासतः ॥ ३ ॥

तत्र तावदिमं केचित्पूर्वपक्षं प्रचक्षते ।
आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ॥ ४ ॥

End:

तस्मात्सिद्धः काम्यनित्यविशेष इति—
पार्थसारथिना सम्यग्विशेषः काम्यनित्ययोः ।
आचार्यमतमाश्रित्य न्यायलेशः प्रदर्शितः ॥

Colophon:

इति यज्ञात्मसूरिसुत पार्थसारथिविरचितायां न्यायरत्नमालायां नित्यकाम्यविवेकः ॥

भुवनत्रयविख्यातः श्रीमद्यज्ञात्मनन्दनः ।
तत एव श्रुतं प्राप्य विश्रुतः पार्थसारथिः ॥

शके १७६९ वर्षे कालयुक्तनामाब्दे श्रावणकृष्णबुधौ तृतीयप्रहरे
अमृतवेला(यां)काशक्षेत्रे वासुदेवपितलेन लिखितम् ।
समाप्तः । सुखं भवतु ।

Subject: Nyāyaratnamālā.

Remarks:—The Ms. is in a very good condition. On the title page is given,

इदं पुस्तकं भैरवदेवज्ञात्मजगंगाधरदैवज्ञस्य न्यायरत्नमाळा

Alternate sheets are sulphurated.

This Ms. is dated śaka १७६९, corresponding to A. D. १७१७

This work, Nyāyaratnamālā, is a comprehensive treatise on the principles of Mīmāmsā according to the Bhāṭṭa School. It is an epitome of the Tantravārttika.

This work has been published in the Chowkāmbā Sanskrit Series. For other details see remarks under No.

॥ न्यायरत्नमाला ॥

6956. NYĀYARATNAMĀLĀ.

Burnell's Catalogue No. 9534. Page 85. Right column.

Substance—Palm leaf. Size—14½ × 1½ inches. Leaves—133. Lines — 4 to 8 to a Page. Script—Telugu. No. of Granthas—3000. Author—Pārthasārathimiśra. Incomplete. Printed.

Beginning:

ओम् ।

नमः परमकल्याण नमस्ते विश्वमंगल ।
वासुदेवाय शान्ताय यदूनां पतये नमः ॥

आनन्दममृतम्० Same as No. 6955.

End.

तौ कार्यमिति पदार्थ ...न्यनयोपकारस्याभिधानानियोगस्य एवोपादानांग...

Subject: Nyāyaratnamālā.

Remarks :—The Ms. is in a fairly good condition.

॥ न्यायरत्नमाला ॥

6957. NYĀYARATNAMĀLĀ.

Burnell's Catalogue No. 9565. Page 85. Right column. Substance—Palm leaf. Size—17 × 1¼ inches. Leaves—104. Lines—5 to 6 to a Page. Script—Grantha. No of Granthas—3000. Author—Pārthasārathimiśra. Incomplete. Printed.

Beginning—Same as No. 6956.

End:

यथा पिण्डपितृयज्ञे नियोज्यः तथा च प्रकृतावुपकारः विकृतावपि कल्पयितव्योपकारस्य भवत्यौपदेशिकत्वमिति केचित् । तदयुक्तम् । उपकारभेदात्स्यादुपकारविशेषधीः ।

पूर्वमेव त्वपेक्षा स्यात्पदार्थेष्वपि समासा उपकारकपदार्थविशेषाधीनतासिद्धिरुपकारविशेषः न तथापि तेषु विशेषरूपेण निरूपयितुं शक्यते भवितव्यं केन चिदुपकारेणेत्यपेक्षामात्रमेव ॥...

Colophon: Nil.

Subject: Nyāyaratnamālā.

Remarks:—The Ms. is in a decaying condition.

॥ न्यायरत्नमालाव्याख्या—नायकरत्नम् ॥

6958. NYĀYARATNAMĀLĀVYĀKHYĀ—NĀYAKARATNAM.

Burnell's **Catalogue No. 12333.** **Page 85.** Right **column.** Substance—Paper. Size—12¼ × 6½ inches. **Sheets—23.** Lines—30 to a **Page.** Script—Devanāgarī. **No.** of **Granthas—8450.** Author—Rāmānujācārya. **Complete. Not** printed.

Beginning:

श्रीगणेशाय नमः ।

सम्यङ्नयाञ्जनसमेधितमस्तदोष-
 माम्नायसंज्ञमनुशास्ति विशुद्धचक्षुः ।
मानान्तरानधिगतं खलु रत्नतत्त्वं
 तत्त्वान्तरं च पुरुषोत्तमसंज्ञितं तत् ॥ १ ॥

आम्नायान्तिमसीमनि स्फुरति यः सद्भावनागोचरः
 स्वे स्वे कर्मणि यः प्रशास्ति पुरुषं योग्याधिकारक्रमात् ।
आदत्ते विविधोपकारमखिलैः यागैरशेषाङ्गिणां
 साक्षाद्वि...रवेद्यते विधिरयं नानावताराश्रयः ॥ २ ॥

अविभक्तविभक्तमार्गयो-
 र्मतयोर्भट्टगुरूपदिष्टयोः ।
उभयोरपि पार्थसारथिः
 प्रथितो था(ता)थमतेऽभियोगवान् ॥ ३ ॥

अस्य स्वभावमपरीक्षकदुष्प्रवेश-
माचार्यतन्त्रमधिकृत्य हृदप्रकाशम् ।
न्यक्कृत्य पार्थरथसारथिरन्यतन्त्रं
सत्प्रीतये ग्रथितवान्नयरत्नमालाम् ॥ ४ ॥

गुरुतन्त्रनियन्त्रितोऽन्वहं
वहमानानिह पार्थसारथेः ।
विवृणोमि मतान्तराश्रितां
स्थिरभावां नयरत्नमालिकाम् ॥ ५ ॥

प्रारिप्सितस्य ग्रन्थस्य प्रत्यूहोपशान्तये सर्वोत्कृष्टां श्रुतिशिरस्समधिष्ठितां स्वेष्टदेवतां नमस्यति । आनन्दमिति ॥ आनन्दं निरतिशयसुखरूपममृतमित्युक्तस्वभावं ज्ञानं संविद्रूपं । अजमुत्पत्तिरहितं । अनेन नित्यत्वमपि सूचितं । साक्षिणं सर्वदा सर्ववस्तुसाक्षात्कारिणं । साक्षाद्द्रष्टरि(च) संज्ञायामिति हि व्याकरणानुशासनं । ईश्वरं सर्ववस्तुनियन्तारं सर्वं सर्वप्रपञ्चात्मकं । सर्वं सर्वज्ञत्वादिगुणयोगात्स्वतः सर्ववस्तुविलक्षणं । सदसत्तु, सदसदात्मकं नित्यानित्यवस्त्वात्मकमिति यावत् । एतच्च सर्वमित्यस्य विवरणं । विभुं व्यापिनं ब्रह्म श्रुतिषु बहुशो ब्रह्मणा वाच्यं । हरिं पुरुषोत्तमं नारायणं वन्दे प्रह्वीभवामीत्यर्थः ॥

End:

इदानीमाकाङ्क्षासंभवाच्च न वाक्यभेद इत्याह । साकाङ्क्षत्वाच्चेति । तदेव दर्शयति भवति हीति । किमर्थमित्याकाङ्क्षेति । अत एव श्रुतमपि फलं कल्प्यत इत्यर्थः । प्रकारभेदाभावे तु भवत्येव वाक्यभेद इत्याह समानेति । तत्र प्रतिनिमित्तं प्रतिफलं च वाक्यपरिसमाप्तेः प्रतिनिमित्तं प्रतिफलं च कर्मावृत्तिर्भवतीत्यर्थः । ननु निमित्तस्योद्देश्यत्वमङ्गीकृत्यैव प्रकारभेदादिभिर्वाक्यभेदपरिहारो मण्डनाचार्यवचनविरुद्ध इत्याशङ्कामनूद्य परिहरति यत्त्विति । प्रासङ्गिकं समापयति । अलमिति । सिद्धान्तमुसंहरति । तस्मादिति । अधिकरणं निगमयति । पार्थसारथिमिश्रेणेति ।

Colophon:

इति रामानुजाचार्याधिरचिते न्यायरत्नमालाव्याख्याने नायक(न्याय)रत्ने प्रकरणं संपूर्ण(र्ति)मगमत् ॥ यादृशं पुस्तकं प्राप्तं तादृशं लिखितं मया ।

Subject: Nāyakaratnamālāvyākhyā Nyāyaratnam.

Remarks:—The Ms. is in good condition. There is a transcript copy of this in this library.

On the title page is given—

हें पुस्तक + आणिलें असें ॥

There is no doubt as to the identity of Rāmānujācārya the author of this commentary on Pārthasārathi's Nyāyaratna-

mālā with the author of the Tantrarahasya, published as No. 24, in the Gaekwad's Oriental Series and also in Bombay. The author is a follower of the Prābhākara School, The Tantra Rahasya is a work of the Prābhākara School but this present work of the author is a commentary on a work of the Bhāṭṭa School-vide introductory verse No. 4, Further: the verse, found as No. 2, above.

"आम्नायान्तिमसीमनि स्फुरति यः—"

is found as the last verse of Tantrarahasya.

This author, Rāmānuja, lived on the banks of the Godavari. He is "not older than the 18th century and is later than Khaṇḍadeva and Anantadeva, who all lived at the close of the 17th century A. D," His place is given as Dharmapuri.

॥ मीमांसान्यायप्रकाशिका ॥

6959. MĪMĀMSĀNYĀYAPRAKĀŚIKĀ.

Burnell's Catalogue No. 2102. Page 85. Left column. Substance—Paper. Size—11½×5½ inches. Sheets—47. Lines—13 to 14 or a Page. Script—Devanāgarī. No. of Granthas—1475. Author—Āpadeva. Complete. Printed.

Beginning:

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥

अनन्तगुणसंपन्नमनन्तभजनप्रियम् ।
अनन्तरूपिणं ध्याये गुरुमानन्दरूपिणम् ॥

इह खलु परमकारुणिकेन भगवता जैमिन्यृषिणा

अथातो धर्मजिज्ञासेत्यादिना द्वादशसु अध्यायेषु धर्मो विचारितः ।

End:

श्रीसदाशिवार्पणबुद्ध्या क्रियमाणस्तु निश्रेयसहेतुः ।

न च तदर्पणबुद्ध्यानुष्ठाने प्रामाणाभावः—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यासि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

इति स्मृतेः । अस्याष्टकादिस्मृतिवत् प्रामाण्यादित्यन्यत्र विस्तरः ॥

काहं मन्दमतिः केयं पद्धतिर्भाट्टनिर्मिता ।
तस्माद्भक्तेर्विलासोयं श्रीसाम्बगुरुपादयोः ॥

ग्रन्थरूपो मदीयोऽयं वाग्व्यापारस्सुशोभनः ।
अनेन प्रीयतां देवो साम्बः श्रीभक्तवत्सलः ॥

इति श्रीमदनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशसंज्ञकं मीमांसाप्रकरणं समाप्तम् ।

रामचन्द्रपदद्वन्द्वं नत्वा मीमांसदीपिका ।
बालकृष्णेन यतिना लिखिता शिवतुष्टये ॥

यादृशं + विद्यते ॥

Subject: Mīmāmsānyāyaprakāśa.

Remarks:—The Ms. is in a fairly good condition.

Āpadeva flourished in the beginning of the 17th century A. D. His Nyāyaprakāśa is almost the only popular and first learnt manual of Mīmāmsā. He had two sons, Ānantadeva and Jīvadeva. The former commented upon his father's work in his Bhāṭṭālaṅkāra. Āpadeva's father, Anantadeva was a Vedantic writer.

The work has been printed in the Nirṇayasāgar Press.

॥ मीमांसान्यायप्रकाशिका ॥

6960. MĪMĀMSĀNYĀYAPRAKĀŚIKĀ.

J. L. Collection No. 941.

Substance—Paper. Size—9×4 inches. Sheets—14. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—1475. Author—Āpadeva. Incomplete. Printed.

Beginning—Same as No. 6959,

End:

यद्यपि विकृतेः कथंभावाकाङ्क्षा प्राकृतैरेवाङ्गैः शाम्यति तथापि यत्र प्राकृतानाङ्गानुवादेन धर्मविधानं तत्र.... यावन्न निवर्तते । अतो विधदेशकाङ्क्षौ....

Subject: Mīmāmsānyāyaprakāśikā.

Remarks—The Ms. is in a fairly good condition.

॥ मीमांसान्यायप्रकाशिका ॥

6961. MĪMĀMSĀNYĀYAPRAKĀŚIKĀ.

J. L. Collection No. 942.

Substance—Paper. Size—9×4 inches. Sheets—22(26-48). Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—1475. Author—Āpadeva. Incomplete. printed

Beginning:

....निवेशनीयः । एवं संयोगादिना साध्यनिर्णयदशायां संयुक्तसंयोगादिना अनुमित्युत्पत्तये संयोगादिसंसर्गकसिद्धिप्रतिबन्धतावच्छेदककोटौ संयोगादिपर्याप्तसांसर्गिकविषयताकत्वं निवेशनीयम् ।

End, colophon and subject—Same as No 6959.

Remarks:—The Ms is in a fairly good condition. On the title page

'रङ्गभट्टभट्टगोस्वामिनाम्'

॥ मीमांसान्यायप्रकाशिका ॥

6962. MĪMĀMSĀNYĀYAPRAKĀŚIKĀ.

Burnell's Catalogue No. 9585. Page 85. Right column.

Substance—Palm leaf. Size —16×1½ inches. Leaves—49. Lines— 6 or 7 to a Page. Script—Telugu. No. of Granthas—1475. Author—Āpadeva. Complete. Printed.

Beginning:—Same as No. 6959.

End, colophon and subject—Same as No. 6959.

Remarks:—The Ms. is in decaying condition.

॥ मीमांसान्यायप्रकाशिका ॥

6963. MĪMĀMSĀNYĀYAPRAKĀŚIKĀ.

Burnell's Catalogue No. 9586. **Page** 85. Left column.

Substance—Palm leaf. Size—15 × 1½ inches. Leaves—64. Lines—5 to a Page. Script—Telugu. No. of Granthas—1475. Author—Āpadeva. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6959.

Remarks:—The Ms. is in a fairly good condition.

॥ मीमांसान्यायप्रकाशिका ॥

6964. MĪMĀMSĀNYĀYAPRAKĀŚIKĀ.

N. S. Collection No. 55.

Substance—Paper. Size—9¾ × 4¼ inches. Sheets—54. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1475. Author—Āpadeva. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 6959.

Remarks:—The Ms. is in a fairly good condition. After the colophon is seen the following letter:—

भक्तिरसायन(नं) मधुसूदनस्वामिकृताध्यायचतुष्टयं अवश्यं कृपयान्वेषणं कृत्वा लेखनं करणीयम् । तथा मधुसूदनस्वामिकृत वेदस्तुतिटीका तथा गौडपादभाष्यस्य टीका आनन्दगिरी, तथा विष्णुसहस्रनामभाष्यटीका आनन्दगिरी, चतुर्णां सत्वे चतुर्णामेव । अन्यथा भक्तिरसायनस्य वेदस्तुतिटीका-

यास्तु अवश्यमेव विक्रमपुरस्थश्रीधनीगिरिस्वामिनं प्रति प्रेषणाय मौल्यं तु निर्णीय मद्धस्ते पुस्तकं दास्यते । तद्धस्तादेवाङ्गीकरणीयम् ॥

This letter mentions the following works:—

Madhusūdanasarasvati's—Bhaktirasāyana in 4 chapters.
,, Vedastutiṭīkā.
Ānandagiri's Gauḍapādabhāṣyaṭīkā.
and ,, Viṣṇusahasranāmabhāṣyaṭīkā.

The mention of the last work of Ānandagiri is a proof about the genuineness of Srī Saṅkara's Bhāṣya on the Viṣṇusahasranāma about which some are sceptical.

॥ मीमांसान्यायप्रकाशिकाव्याख्या—भाट्टालङ्कारः ॥

6965. MĪMĀMSĀNYĀYAPRAKĀSIKĀVYĀKHYĀ—BHĀṬṬĀLAṄKĀRAḤ.

Burnell's Catalogue No. 6273. Page 88. Right column. Substance—Paper. Size—11¾×4 inches. Sheets—9. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Anantadeva. Incomplete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

दध्नो मन्थनकाम्यया व्रजवधूं कुम्भे वदासिञ्चतीं
सस्नेहं दधि देहि मह्यमधुनेत्यूचे रमेशो यथा ।

ओमित्युक्तिपुरस्सरं निजकरे तस्यार्पणं कुर्वती
प्रत्युक्तिः कुरु कार्यमस्ति शमिति श्रीशस्य सा पातु नः ॥ १ ॥

अनल्पजल्पोत्थितदोषदुष्टां
पुनः पुनस्तद्वचनेतिहृष्टाम् ।
श्रीस्वामिसञ्जातगिरिद्युनद्यां
निजां गिरं सम्प्रति मज्जयामः ॥ १ ॥

आचारानुमितश्रुत्या मङ्गलफलत्वेनावगतविघ्नध्वंसाद्यन्यतरादुद्दिश्य कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति श्लोकाभ्यां ॥ य इति ॥ मात्रशब्दः कार्त्स्न्यवाची । 'मात्रं कार्त्स्न्येवधारणे' इत्यमरोक्तेः । यावन्तो यदीयाः कृपालेशाः पुरुषार्थप्राप्तिहेतुभूताः तत्फलोपहिता इति यावत् । ननु सर्वेऽपि धर्मादिचतुष्टयार्थिनः ते च यदि कृपालेशविषयतां गताः तदानीं विषयसम्पूर्णकृपाया अप्रसिद्धेः तल्लेशानां पुरुषार्थप्रापकत्वोक्तेः असङ्गतिरित्याशङ्क्योक्तं—भक्तेति । भक्तिः प्रकृते कीदृशी । भगवति निरुपाधिप्रीतिः । तथा च– "या प्रीतिः अविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतस्सा मे विषयात्मापसर्पतु ॥" इति प्रार्थयन्तं प्रह्लादं प्रति भगवतोक्तं—

"भक्तिर्मयि तवास्तीह भूयोऽप्येवं भविष्यति ।"

तद्वन्तो भक्ताः । तेषु वत्सलः । 'वत्सांसाभ्यां कामबले'

इति वत्सपदान्मत्वर्थीयोलच् । ततश्च स्नेहवानित्यर्थः अन्यस्नेहवाचित्वेनादृष्टेपि वत्सशब्दो लजन्तवृत्तौ स्नेहमभिधत्ते । तथा प्रतीतेः । सूत्रान्तर्गत कामशब्दस्य व्याख्यातृभिस्तादर्थ्याङ्गीकरणाच्च । यश्च यदीयस्नेहविषयः सन् दुःखित्वेन तद्बुद्धिस्थो भवति स तदीयकृपाविषय इति भक्तानां पूर्णकृपाविषयत्वं द्योत्यते । यद्वा कामशब्दो लोके इच्छासामान्यवाचितया प्रसिद्ध इति निरुपाधिपरदुःखहानेच्छात्मककृपावाचित्वेनैवाभ्युपेया । ततश्च शब्दशक्त्यैव तेषां तद्विषयत्वलाभः । यद्यपि वदिरभिवादनस्तुत्योर्वाचकः तथापि प्रणतिविशेषपूर्वकाशीर्वचनात्मनोऽभिवादनस्य प्रकृतेऽसंभवात् स्तुतिपरतया व्याख्येयः ॥

अनन्तरूपिणामिति ॥ अनन्तसंज्ञामित्यर्थः । संज्ञायाः अर्थानुसारितामाह । अनन्तगुणेति । अनन्तस्य गुणाः अनन्ता वा गुणाः तैः सम्पन्नस्तं । कथं तादृशगुणवतालाभोऽभूदतोऽनन्तभजनाप्रियामिति ॥

End:

प्रकृतलिङ्गर्थस्वरूपमाह— वेद इति ॥ स इत्यनुषङ्गः । पुरुषाभावान्निर्मातुरभावात् ॥

* * *

अथ दृष्टान्तदृष्टजन्यज्ञानवत्कर्त्रसंभवे हेतुप्रभवात् कर्तृसामान्यासिद्धिः नित्यज्ञानवन्तमाक्षिप्य पर्यवस्यतीत्युच्ये-

त । तर्हि उष्णाग्निनियतेन हि मे दृश्यमानेन तृणविकारेण जाताग्निधीप्रत्यक्षविरोधात् । उष्णाग्न्यसम्भवेऽनुष्णाग्निमाक्षिप्य पर्यवस्येत् । तस्मान्नित्यज्ञानवज्जगत्कर्तृसिद्धामिच्छाद्भिरुचितस्यैव वेदापौरुषेयत्वं स्वीकार्यम् ॥

Subject: Mīmāmsānyāyaprakāśikāvyākhyā—Bhāṭṭālankāra.

Remarks:—The Ms. is in good condition.

Dr. Burnell has mistaken this work for Gaudapādīyabhāṣyaṭīkā of Ānandagiri.

Anantadeva, son of Āpadeva, is the author of this commentary on his father's work. His commentary is called Bhāṭṭālankāra. He has written another work called Smṛtikaustubha where he says that he is the protege of Bāj Bahadur, a chieftain of Kūrmācala (1644-1664 A D.) Thus Anantadeva should have flourished in the 17th century A. D.

॥ मीमांसान्यायप्रकाशिकाव्याख्या—भाट्टालङ्कारः ॥

6966. MĪMĀMSĀNYĀYAPRAKĀŚIKĀVYĀKHYĀ—BHĀṬṬĀLANKĀRAḤ.

N. S. Collection No. 56.

Substance—Paper. Size—10×4½ inches. Sheets—60 (96-155). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author—Anantadeva. Incomplete. Not printed.

Beginning:

...पि लक्षणयोपस्थापकत्वसंभवात् । "तद्धितेन चतुर्थ्यार्वे" ति चतुर्थ्या एव शिष्योपन्यासो निस्तात्पर्यकः स्यात् । किं च यदग्नये च प्रजापतये चेत्यादौ होमसमभिव्याहाराच्चतुर्थ्या तदन्वयार्हकारकलक्षणा युक्ता अपनीतदेवताकप्रकृतयागानां देवतान्तरसंबन्धविधिपरे ये मदयमास्तानग्नये दात्र इत्यादौ च । तथा दानप्रकरणाम्नाते अग्नये पवमानायाष्टाकपालं निर्वपेदित्यादौ तु न याग इति समभिव्याहारो न वा प्रकृतयागग्रहणमिति कथं चतुर्थ्या देवतात्वलक्षणसिद्धिः ।

End

न च ज्ञापकस्येन्द्रियादेरिव कथं कारकत्वमिति शङ्क्यम् । अवघातादेरिव ज्ञापकानामपि केषां चिद्धर्मं प्रति नियमविधिता तादर्थ्यावगमात् । तावता च प्रकृतहेतुतानिर्वाहात् । एवं नाखिलवेदस्य धर्ममूलत्वासंभवः । धर्मं बोधयतामपि श्येनादिवाक्यानां निषधानां च पारायणं ब्रह्मयज्ञादि निर्वर्तनद्वाराऽधर्मप्रतीकारकत्वात् । प्रायश्चित्तविध्यपेक्षितनिमित्तसमर्पकत्वेन विद्वद्वाक्यवत्परंपरया धर्मप्रमोपयोगाच्च । संभवति....शाखाविप्रकर्णिमूलश्रुतिविदामपि मन्वादीनां ताद.... ॥

i. **Subject:** Mīmāmsānyāyaprakāśikāvyākhyā otherwise known as Bhāṭṭālankāra.

Remarks :—The Ms. is in a fairly good condition The script on the last page is very much obliterated.

॥ मीमांसान्यायप्रकाशिकाव्याख्या—भाट्टालङ्कारः ॥

6965. MĪMĀMSĀNYĀYAPRAKĀŚIKĀVYĀKHYĀ—BHĀṬṬĀLAṄKĀRAḤ.

J. L. Collection No. 12.

Substance—Paper. Size—10 × 4½ inches. Sheets—66 (51-155). Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—2925. Author—Anantadeva. Incomplete. Wants beginning. Not printed.

Beginning:

....यामगृहीतोसि इन्द्रवायुभ्यां त्वा जुष्टं गृह्णामि । उपयाम॰ मित्रावरुणाभ्यां त्वा जुष्टं मित्यादिभिर्मन्त्रैः सम्भवत्प्राप्तिकेषु ग्रहणेषु च विधयः श्रूयन्ते । न च प्रतिप्रकरणमाम्नातानामीदृशानेकविधानां वैय्यर्थ्यं शक्यं वक्तुं प्रत्येकमभ्युदयशिरस्कप्राप्तिफलकत्वमपि युक्तं । अनेकादृष्टकल्पनागौरवात् प्राप्तस्याप्यभ्युदयशिरस्कविधिसम्भवे च विहितस्य विधानायोगेन कर्मान्तरकल्पनायाः काप्यनुदयापत्तेः । ईदृशवेदप्रस्थानमहिम्नैव चाकरे तत्तत्संभवत्प्रयोजनान्तराणामपि विधीनां मंत्राद्याम्नानान्यथानुपपत्तिलभ्यविधिकार्यविधित्वमङ्गीकृत्य सिद्धान्तवर्णनं दृश्यते ।

End:

अन्यत्र विस्तर इति—

दध्नो नन्विह मंथनेन सकलं नेयं दिनं किन्त्वया
देयं मे नवनीतमम्ब गिरामित्याहरन्त्या गिरेः ।
गोप्या सङ्कुटितं झटित्यथ करेनैजेर्पितं सादरं
दृष्ट्वा तं स हसन्सदा वसतु सच्चित्ते यशोदाशिशुः ॥

Colophon:

इति श्रीमदगणितगुणसीमानिस्समिनिखिलविद्याविद्योतमानश्रीमदापदेवसूरिवरसूनोरनन्तदेवस्य कृतौ न्यायप्रकाशटीकायां भाट्टालङ्काराख्यायां द्वितीयपरिच्छेदस्समाप्तिमगमत् ॥

स्वीयेयं हृदये निधाय सुधिया भूयः प्रकाशान्विता
नानैतद्धृततर्कयन् मणिमयात्कुर्युर्भयार्तान्पराम ।
तन्त्रं भाट्टमनेकदोषतमसो मोक्षेण स्वच्छाप्रभं
येनाकारि मुदे स भाट्टविषयालङ्कार आस्तां सताम ॥

ओं नमाशिवायेति । यादृशमिति न्यायान्नदोषो मृग्यस्तार्किकैरलम् ।
हरिर्जयतामजस्रं लेखकपाठकानामनुवेलम् भास्कररायस्येदं पुस्तकम् ॥

Subject: Mīmāmsānyāyaprakāśikāvyākhyā otherwise known as Bhāṭṭālaṅkara.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

श्रीमद्गम्भीरराजभारतीदीक्षितानामिदम् ॥

इदं पुस्तकं रङ्गभट्टभट्टगोस्वामिनाम् ॥

॥ भाट्टनयोद्योतः ॥

6968. BHĀṬṬANAYODYOTAḤ.

Burnell's Catalogue No. 2074. Page 84. Left column. Substance—Paper. Size—12×6¼ inches. Sheets—240. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—7125. Author—Nārāyaṇa. Complete. I to XI Adhyāyas only. Not printed

Beginning:

श्रीगणेशाय नमः ॥

गुरूनानम्य संवीक्ष्य खण्डदेवकृतिं तताम् ।
कुर्वे भाट्टनयोद्योतं बालानां सुखक्लृप्तये ॥

आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥

“ वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति ” इत्याद्यर्थवादानां विधिप्रतिषेधवादेवा कर्तृस्मरणाभावादौ पौरुषेयत्वे पूर्वाधिकरणेन सिद्धे सम्प्रति तद्वदेव धर्माधर्मयोः प्रामाण्यमस्ति न वेति विचार्यते । तत्र विधिप्रतिषेधवाक्याभ्यां स्वशक्त्या साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविषयका विधिप्रतिषेधयोः प्रतिपादनादर्था च विधिप्रतिषेधयागादिनिष्ठसाधनत्वाक्षेपाद्युक्तं तयोरनिष्टसाधनरूपधर्माधर्मप्रमाजनकत्वम् । अर्थवादानां तु शक्त्या सदसद्रूपसिद्धार्थबो-

अद्वैतब्रह्मराद्धान्तिकसकलपुराणेतिहासोपक्लृप्ता-
माता साम्राज्यपीठीमनघजनमनश्शङ्करी शाङ्करी नः ॥

7035 On the title page is given—

हे पुस्तक + शरभोजिमहाराज + काशीदेशाहून + आणिलें अस्सें ।

7041 The other work contained herein is a fragment of an anonymous commentary on the Brahmasūtras.

7045 The other work contained herein is Tattvavivekavyākhyā.

॥ ब्रह्मसूत्रभाष्यव्याख्या—पञ्चपादिका ॥

7048. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—
PAÑCAPĀDIKĀ.

Burnell's Catalogue No. 9813 b.

Substance—Palm leaf. Size —18½ × 1¼ inches. Leaves—41 (105-154). Lines—8 to a Page. Script—Telugu. No. of Granthas—2400. Author—Śrī Padmapāda. Complete. Printed.

Beginning:

अनाद्यानन्दकूटस्थज्ञानानन्दसदात्मने ।
अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥

नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥

नमाम्यभोगिपरिवारसम्पदं
निरस्तभूतिमनु(मु)मर्धविग्रहम् ।
अनुग्रहायन्मृदितकाललाञ्छनं
दिनाविनायकमपूर्वशङ्करम् (?) ॥

यद्वक्त्रमानससरःप्रतिलब्धजन्म-
भाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुत्र(न्मुख)विनीतविनेयभृंगा
स्तान् भाष्यवित्तरगुरून्प्रणमामि मूर्ध्ना ॥

वेदादिवृन्तभारेण गरिमाणं बिभर्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्या श्रद्धयारभे ॥

युष्मदस्मद्गोचरयोरित्यादि अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इत्यन्तं भाष्यम् ।

End:

कथमिदानीमस्य प्रामाण्यमित्याशङ्क्याह ॥ देहात्मप्रत्यय इति ॥ यथा देहे विशिष्टजातीये तद्व्यतिरिक्तस्याहं कर्तुः अहंमानसंबन्धः कल्पितोपि स्वनिबन्धने लोकशास्त्रव्यवहारे यथावगतित्वहेतुस्तथायं कल्पितोप्यलौकिकात्मकप्रतिपत्तेः प्राक्प्रमाणे निश्चिते प्रत्ययोत्पादनात् बाधानुपलब्धेश्चेति ॥

श्रीवेङ्कटेशाय नमः ॥

Colophon: (Leaf No. 138)

इति तृतीयं वर्णकं समाप्तम् ॥

Subject: Pañcapādikā a commentary on the Brahmasūtrabhāṣya of Śaṅkara by Padmapādacārya 1-9 Varṇakas.

Remarks:— The Ms. is in a fairly good condition.

This work is printed in Chowkhāmba Sanskrit series. The author is one of the famous four disciples of Śri Śaṅkara and this work is the earliest of the commentaries on Śaṅkara's Brahmasūtrabhāṣya.

॥ ब्रह्मसूत्रभाष्यव्याख्या—पञ्चपादिका ॥

7049. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—PAÑCAPĀDIKĀ.

Burnell's Catalogue No. 6247. Page 87. Left column. Substance—Paper. Size—11½×4 inches. Sheets—25. Lines—12 to a page. Script—Devanāgarī. No. of Granthas—200. Author—Śrī Padmapāda. Incomplete. Printed.

Beginning:

अनन्तगुणसन्दोहसरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥ १ ॥
नमः श्रीगणनाथाय विघ्ननाशाय ते नमः ।
लिखामि सूत्रभाष्यस्य व्याख्यां पादस्य पञ्चिकाम् ॥

(अनाद्या)

Same as No. 7048.

End:

एवं सूत्रस्यादित्वेन कारणेन सूत्रतया विषयप्रयोजनं तत्सिद्धिकरं चाविद्याख्यं बन्धं तत्सामर्थ्यावगमादापाद्य तत्र सूत्रसामर्थ्यं दर्शयितुं प्रतिपदव्याख्यामारभते ।

Colophon:

इति पञ्चपादिकायां प्रथमवर्णकं समाप्तम् ॥

Subject: Brahmasūtrabhāṣyavyākhyā known as Pañcapādikā: I Varṇaka only.

Remarks:— The Ms. is in good condition. On the title page is given.

हे पुस्तक श्रीमन्तराजेश्री शरभोजिमहाराजसाहेबयांच कारकर्दीत काशीदेशाहून खरीदीकरून अणिलें अस्सें ।

॥ ब्रह्मसूत्रभाष्यव्याख्या—पञ्चपादिका ॥

7050. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—PAÑCAPĀDIKĀ.

Burnell's Catalogue No. 6245. Page 87. Left column. Substance—Paper. Size—11½ × 4 inches. Sheets—28. Lines—18 to a page. Script—Devanāgarī. No. of Granthas—1000. Author—Śrī Padmapāda. Incomplete. Printed.

Beginning:

श्रीगुरुगणपतिदेवेभ्यो नतिरियम्। ओं सिद्धैव ननु ब्रह्मजिज्ञासा। अथातो धर्मजिज्ञासेति सकलवेदार्थस्य विचारितत्वात्। ब्रह्मज्ञानस्य चोदनालक्षणत्वेन धर्मस्वरूपत्वात्। अतः सिद्धैव ब्रह्मजिज्ञासा। अभ्यधिकाशङ्काभावादिति। अत्र केचिदभ्यधिकां शङ्कां प्रदर्शयन्ते। ब्रह्मजिज्ञासां पृथगारभते। केयमत्राभ्यधिकाशङ्का चोदनालक्षणोऽर्थो धर्म इति ब्रुवतां(तो) विधेः प्रामाण्यं दर्शितम्।

End—Same as No. 9813 b.

Colophon:

इति श्रीपञ्चपादिकायां नवमो वर्णकस्समाप्तः ॥

श्रीपञ्चपादिकाचार्यैः कृतं विवरणं खलु ।

बालकृष्णेन मुनिना लिखितं ज्ञानसिद्धये ॥ १ ॥

चतुस्सूत्री ॥

Subject: Pañcapādikā. Varṇakas 2-9 Catussūtrī.

Remarks:—The Ms. is in an excellent condition. On the title page is given:

हे पुस्तक श्रीमन्तराजेश्री शरभोजिमहाराजशाहेबयांच कारकर्तीत

काशीदेशाहून खरीदीकरून आणिलें अस्सें ।

॥ पञ्चपादिकाव्याख्या— विवरणम् ॥

7051. PAÑCAPĀDIKĀVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 6246. Page 87. Left column. Substance—Paper. Size—11¾ × 4 inches. Sheets—108 (27+17+38+26). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—4550. Author—Prakāśātmayati. Complete. Printed.

Beginning:

पालने विमलसत्त्ववृत्तये
जन्मकर्मणि रजोजुषे लये ।
तामसाय जगतः पराकृत-
द्वैतजालवपुषे नमस्सवे ॥ १ ॥

End:

तृतीयं श्लोकं व्याचष्टे अद्वितीयनिरतिशयानन्दचैतन्यैकतान सर्वज्ञ सर्वेश्वर सर्वशक्तिनिरवयव स्वच्छासंगप्रत्यग्भूत ब्रह्मात्मन्यपरोक्षानुभवात् प्राक् देहात्मप्रत्ययवत् सर्वो व्यवहारो यथादर्शनमुपपद्यते तस्मिंश्चापरोक्षवद्भासमाने प्रमातृत्वादि बाधात् सर्वोंव्यवहारो निवर्तत इति श्लोकार्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्य प्रकाशात्मभगवतः कृतौ पञ्चपादिकाविवरणे समन्वयसूत्रं समाप्तम् ।

Subject: Pañcapādikāvivaraṇa; Catussūtrī:—an explanatary gloss on the Pañcapādikā of Padmapādācārya.

Remarks:—The Ms. is in excellent condition.

This bundle consists of 4 Mss.

1 a. I. Varṇaka only.
2 b. II. ,, ,,
3 c. III. ,, ,,
4 d. IV—IX Varṇakas.

This work has been published by Rāma Śāstri Bhāgavatācārya in Chowkhāmba Sanskrit Series, Benares. This author is also the author of another work Śārīrakamīmāmsā Nyāyasaṅgraha, which is not printed.

PANCAPĀDIKĀVIVARANA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7052	B. L. 6858	Paper.	10½ × 4½	7	10	Devanāgarī.	Catursūtrī.
7053	„ 6268	„	11 × 5¾	188	„	„	Complete. Catussūtrī.
7054	„ 9640	Plam leaf.	17 × 1¼	204	5-7	Nandināgarī.	„ wants a little in the beginning.
7055	„ 9641	„	17 × 1½	1[illegible]7	6-9	„	„ catussūtrī.
7056	„ 9642	„	1[illegible] × 1	180	4-5	Grantha.	„ wants a little in the beginning.

॥ पञ्चपादिकाविवरणव्याख्या—तत्त्वदीपनम् ॥

7057. PAÑCAPĀDIKĀVIVARAṆAVYĀKHYĀ—TATTVADĪPANAM.

Burnell's Catalogue No. 9639. Page 87. Left column.

Substance—Palm leaf. Size—16¼ × 1¼ inches. Leaves—216. Lines—6-3 to a Page. Script—Grantha. No. of Granthas—5000. Author—Akhaṇḍānandamuni. Incomplete. Not printed completely.

Beginning:

यद्बोधसमुद्भूतं यद्बोधात्प्रविलीयते ।
नामरूपात्मकं विश्वं तस्मै पूर्णात्मने नमः ॥ १ ॥

* * *

वन्दे सर्वमुनीन्द्रसेव्यमनिशं श्रीबोधपृथ्वीधरम् ॥ ३ ॥

वादिवारणसन्दोहप्रभञ्जनविशारदम् ।
श्रीमदानन्दशैलाह्वपञ्चास्यं सततं भजे ॥ ४ ॥

नानाविधानिबन्धांश्च प्रसूनरसमादरात् ।
निबद्धमधु संगृह्य क्रियते तत्त्वदीपनम् ॥ ७ ॥

पञ्चपादिकां व्याचिख्यासुर्ग्रन्थकरणयोग्यतार्थं परदेवतां प्रार्थयते आद्यश्लोकेन । * *

ननु किं नमस्कार्यं सत् अचेतनं सचेतनं वा

* * *

ब्रह्म नमस्कार्यमित्याह— पालन इति ।

End:

इदं रजतमित्यादिवत्तादात्म्येनानुपलम्भात् कथमध्यास इत्याशङ्क्याह । संबन्धितयेति । यत्र तु तादात्म्याध्यासः तत्र सामानाधिकरण्यम् । अत्र च तदभावान्न सामानाधिकरण्यं मृषापेक्ष्यत इत्यर्थः ।

Subject: Pañcapādikāvivaraṇavyākhyā called Tattvadīpana.

Remarks:—This work is a commentary on Prakāśātmayati's Pañcapādikāvivaraṇa and not upon any other anonymous commentary on the Pañcapādikā, as Dr. Burnell describes. The author of this work is Śri Akhaṇḍānandamuni.

Extracts from this work are published in the Chowkhamba edition of Pañcapādikāvivaraṇa edited by Ramaśāstri Bhāgavatācārya.

VIVARAṆATATTVADĪPANA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7058	B. L. 9886	Palm leaf.	17×1½	158	7-10	Grantha,	Incomplete. I varṇaka.
7059	„ 9648	„	16×1¼	100	9-13	„	„ „ „ wants end.
7060	„ 9711 b	„	16¾×1¼	62	6-7	„	„ I „ wants beginning and a portion the II also.
7061	„ 9647	„	17¾×1¼	206	8-10	Telugu.	„ Varṇakas 1 & 2.
7062	„ 9837	„	17×1	73	7-8	„	„
7063	„ 9648	„	17×1½	20 (148-167)	8	Nandināgarī.	„ A fragment at the beginning.

DETAILED REMARKS
on the
MSS. IN THE ABOVE TABLE.

7058 This Ms. and the following five which represent the same work as described above are incorrectly classified and described by Dr. Burnell as Śri Akhaṇḍānanda's commentary on the Sureśvaravārttika. Dr. Aufrecht has only followed Dr. Burnell.

7059. The Ms. has been copied in the library. Vide T. V. No. 187.

7060. The other work contained herein is Kaivalyopaniṣaddīpikā described under No. 1466.

॥ विवरणदर्पणम् ॥

7064. VIVARAṆADARPAṆAM.

Burnell's Catalogue. No. 985!. Page 97. Left column. Substance— Palm leaf. Size—18×1½ inches. Leaves —162. Lines —5 to a Page. Script—Nandināgarī. No. of Granthas—1900. Author—Raṅgarājādhvarin. Incomplete. Not printed.

Beginning:

…प्रधानादिद्वारणेन ईश्वरस्य सिद्धेरिति च का योजना यद्वा अद्वितीयं इति कुतः शास्त्रयोनित्वाद्यपेक्षया प्राक् द्वितीयसूत्रे अन्यत्सर्वं पूर्ववत् । अत्र प्रथमयोजना

श्रेष्ठतमा । तं पक्षमाश्रित्येमं श्लोकं व्याख्यास्ये द्वितीये सूत्रे ॥

'जन्माद्यस्य यत' इति ॥ द्वितीयसूत्रस्यार्थः जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः विशिष्यैकदेशमेव विशेषणं कृत्समास इत्यर्थः । जन्मस्थितिभंगः समासार्थः तद्गुणसंविज्ञानप्रयोजनम् ।

नन्वेवं जन्मस्थितिभंगा...स्यात् । न च तत्त्वादीनामवलोकनेन च तेषामर्थनिश्चयो भविष्यतीति वाक्यं तत्त्वदीपनस्य सकलजन........र्थनिश्चय इति । तस्माद्द्वितीयसूत्रं वि....द्विरणीयं स्यादित्याशंक्य ब्रह्मणो लक्षणयाऽभिधानपरत्वाद्द्वितीयसूत्रस्येति ।

नोक्तदोष इति । द्वितीयसूत्रप्रतिपाद्यप्रमेयलाभं शिष्यबुद्धिदार्ढ्याय पुनरेकसंग्रहितमित्याह । स्वरूपलक्ष्मापि यतो द्वितीये तटस्थलक्ष्मापि निरूपितं प्राक् । अतो जगत्कारणतेश्वरस्य सिद्धा । प्रधानादिनिवारणेनेति । द्वितीयसूत्रे प्राक् प्रथमं तटस्थलक्ष्मापि । यत इति । सूत्रप्रकृत्यंशात् स्वरूपलक्ष्मनिर्देश इति चेत् । मैवं तृतीयलिङ्गनिर्देशात् संहतिप्रधानं धर्मज्ञानं समासार्थः अतो नोक्तदोषः । ननु जन्मादीनामादिमध्यावसानं न संभवति । आदिः पूर्वकालकोटिमतो भवति । तदभावे प्रपञ्चस्य को नामादिरिति चेत् न जन्मनश्चादित्वं

श्रुतिनिर्देशापेक्षम् । वस्तुनिर्देशो यथा । यतो वा इमानि भूतानि जायन्ते इत्यस्मिन्वाक्ये जन्मादीनां क्रमदर्शनात् । तथा वस्तुत्वमूलभूतश्रुतौ प्रथमं जन्म निर्दिष्टमिति जन्मनश्चादित्वं युज्यते वस्तुवत्त्वमपि जन्मना लब्धात्मकस्यधर्मिणः स्थितिप्रलयसंभवात् । तथा हि—वस्तु प्रविलीय न तिष्ठति । स्थित्वा न जायते । नापि जनित्वैव नश्यति क्षणिकत्वनिराकरणात् । अतो जनित्वा स्थित्वा प्रविलीयत इत्येवमनादिरयं प्रपञ्चः । तस्माच्छ्रुतिनिर्देशापेक्षत्वात् वस्तुनिर्देशापेक्षत्वाच्च जन्मनश्चादित्वमूह्यते । अस्येति । प्रत्यक्षादिसंनिधापितस्य इदमानिर्देशः षष्ठी जन्मादिधर्मसंबन्धार्था । यत इति कारणानिर्देशः । प्रकृतित्वनिबन्धना पञ्चमी नान्यनिबन्धना । तथा चास्य जगतः नामरूपाभ्यां व्याकृतस्य अनेकेत्यादि विशेषणविशिष्टस्य जन्मस्थितिभंगः । यतः सर्वज्ञात्सर्वशक्तेश्च कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः ।

अन्यथा श्रुतवाक्यस्य साकांक्षत्वेन निरर्थकतापत्तेः ॥

End:

तस्माज्ज्ञानग्राहकसामग्रीमात्रसाध्यं ज्ञानस्य त....मिति सिद्धम् । न च तत्र प्रमाणाभाव इति वाच्यम् । विचारस्य च प्रमात्वं विज्ञा....नुमानादि प्रसिद्धसाधनतापरि-

.. रात्वम् । विवादेति विशेषणं गुणत्वादिषु व्यभिचारप-

रिहारार्थम्.... ॥

Colophon: Nil

Subject: Vivaraṇadarpaṇam a commentary on Pañcapādikā-vivaraṇa.

Remarks:—The Ms. is in a fairly good condition.

Dr. Burnell has left it as unidentified fragment. This is one of the very rare Mss. that this Liberary has. The author of this work is Raṅgarājādhvarin the learned father of the famous Appayyadīkṣita a scion of whose family this editor is. The work could be identified as such by the following verse contained in the Accāndīkṣita vaṁśāvali of Vīrarāghavakavi, treating of the ancestors of Nīlakaṇṭhadīkṣita.

"यत्कीर्तिः सकलदिगन्तरप्रचारा

योऽकार्षीद्विवरणदर्पणाभिधानम् ।"

॥ पञ्चपादिकाव्याख्या—वेदान्तरत्नकोशः ॥

7065. PAÑCAPĀDIKĀVYĀKHYĀ—VEDĀNTARATNAKOŚAḤ.

Burnell's Catalogue No. 9795. **Page** 95. Left column. **Substance**— Palm leaf. Size—17 × 1⅛ inches. **Leaves**—181. Lines—14 to a Page. Script—Nandināgarī. No. of Granthas—5400. Author—Śri Nṛsimhamuni. Incomplete. Not Printed.

Beginning:

श्रीगणपतये नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीनरसिंहाश्रमचरणचरणारविन्दाभ्यां नमः ॥

मायां कायाद्युपायं वियदिव पयसि स्वच्छमूर्त्तिः प्रवीरा
[त]द्ब्रह्मादिष्वीषदीक्षाक्षणाचितविभवेष्वात्मतन्त्रः पुरेषु ।
क्रीडत्युच्चावचं यो हरिरनुदिवसञ्ज्योतिषाञ्ज्योतिरेक-
स्तस्याङ्गं मङ्गलं नो दिशतु नरहरेस्तुंगमंगाद्यसंगम् ॥

यस्याङ्घ्रिद्वन्द्वपद्वन्द्वं स्मृतं केनापि हेतुना ।
तनुते विमलां बुद्धिं तं वन्दे नृहरिं गुरुम् ॥

सर्वसाक्षिणमाश्रित्य नरकेसरिणं गुरुम् ।
विश्वेशं गिरिजां डुण्डिं व्याकुर्वे पञ्चपादिकाम् ॥

निजनयननिमेषोन्मेषयोरप्रभुः स्या-
महमिति यदि तथ्यं तत्समं पद्मयोनेः ।
स यदि परमपुंसा वीक्षितो विश्वकर्त्रा
मयि पततु पवित्रा तस्य कारुण्यवीक्षा ॥

श्रीमच्छारीरमीमांसाभाष्यं व्याकर्तुं श्रोतृप्रवृत्त्यंगतया तत्प्रतिपाद्यं परमात्मतत्त्वं दर्शयन् निष्प्रत्यूहपरिसमाप्तये स्वाभिमतं ब्रह्म प्रणमिति । अनादीति । ब्रह्मणे नमः स्यादिति शेषः । नमस्कार्यस्वरूपविशेषाज्ञानेन नमस्कारायोगात्तदर्थं तस्य "अज आत्मामहान् ध्रुवः"

“विज्ञानमानन्दं ब्रह्म” “सत्यं ज्ञानमनन्तं ब्रह्म” “सदेव सोम्य” इत्यादिशास्त्रसिद्धं स्वरूपं पूर्वार्धेन दर्शितम् ॥

End:

प्रामाण्येऽपि प्रतिपत्तिसाधनस्स्यादित्यर्थः । तर्हि तदधिकरणस्यान्यार्थत्वमस्तीत्याशंक्याह । सा चेति । चकार उक्ताशङ्कानिवर्तकः । सैवेति संबन्धः । अतो धर्ममात्रलक्षणपरमेवेदं सूत्रं । एवं च मीमांसाप्रस्थानद्वयपर्यालोचनया ...स्वप्रधानब्रह्मविचारात्तन्त्रस्य गतार्थत्वमित्याह । अत इति । गतार्थत्ववर्णनफलमाह । अतो वस्तुते (इ)ति । तद्यावत् व्याचिख्यासितस्येति भाष्यमुपपन्नमिति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीनृसिंहमुनिविरचितायां वेदान्तरत्नकोशसमाख्यायां पञ्चपादिकाव्याख्यायां द्वितीयवर्णकं समाप्तम् ॥

श्रीडुंडिराजाय नमः ।

श्रीसरस्वत्यै नमः ।

श्रीमहालक्ष्म्यै नमः ।

शुभमस्तु ।

हरिः ओम् ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

Subject: Pañcapādikāvyākhyā known as Vedāntaratnakośa.

Remarks:—The Ms is in a fairly good condition. Dr. Burnell leaves this work unidentified and does not describe it as a commentary on the Pañcapādikā. Śri Nṛsimhāśramin, who has written many works in Vedānta flourished in the 16th century.

This work is an independent commentary on the Pañcapādikā itself. He has also written a commentary called Bhāvaprakāśikā' on the Vivaraṇatattvadīpana of Akhaṇḍānanda.

The guru of Nṛsimhāśramin is Jagannāthāśramin and not Paramahamsanāthāśramin or Parivrājakacārya as Dr. Burnell and Dr. Aufrecht call him respectively.

॥ पञ्चपादिकाव्याख्या वेदान्तरत्नकोशः ॥

7066. PAÑCAPĀDIKĀVYĀKHYĀ VEDĀNTARATNAKOŚAḤ.

Burnell's Catalogue No. 9644. Page 87. Left column. Substance—Palm leaf. Size—15¼ × 1¼ inches. Leaves—83 (65-147). Lines—7 to a Page. Script—Grantha. No of Granthas—2000. Author—Nṛsimhamuniḥ. Incomplete. Not printed.

Beginning:—Same as No. 7065.

End:

एतच्च परस्पराश्रयपरिहाराय । नन्वेवमपि कथमत्र ग्रानाध्यासः । न हि स्वप्न इव मनोवृत्तिः संभवति । अहंकारातिरिक्तमनसोऽभावान्न हि शुक्तिरजतवदाविद्यानिवृत्तिः । सामान्याकारान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्थं तज्ञानं तद्धेतुः । न चात्र संभवतीत्याशंक्या(ह)— ॥

Subject: Pañcapādikāvyākhyā known as Vedāntaratnakośa.

Remarks: —The Ms. is in a decaying condition.

Dr. Burnell has noticed this Ms. as a copy of Śrī Prakāśātmayati's Vivaraṇa. It is really another independent commentary on Śrī Padmapāda's Pañcapādikā, by Śrī Nṛsimhamuni.

There is a transcribed copy of this Ms. in this library. T. V No, 425.

॥ विवरणप्रमेयसंग्रहः ॥

7067. VIVARAṆAPRAMEYASAṄGRAHAḤ.

Burnell's Catalogue No. 6809. **Page** 88. Left column.

Substance—Paper. Size—11×5 inches. Sheets—145. Lines—13-14 to a Page. Script—Devanāgari. No. of Granthas—6200. Author—Vidyāraṇya. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

स्वमात्रयाऽनन्दयदत्र जन्तून्
सर्वात्मभावेन तथा परत्र ।
यच्छङ्करानन्दपदं हृदब्जे
विभ्राजते तद्यतयो विशन्ति ॥ १ ॥

भाष्यटीकाविवरणगतनिबन्धनसंग्रहः ।
व्याख्यानव्याख्योय(ख्ययो) र्भावक्लेशहानाय रच्यते ॥ २ ॥
नित्यस्वाध्यायविधितोऽधीत्य वेदान्तमव(द्व)ये ।
संशेरतेऽर्थे ये सूत्रभाष्यादिष्वधिकारिणः ॥ ३ ॥

नित्यो हि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति वचनात् काम्यत्वे हि वेदाध्ययनस्यान्योन्याश्रयता ।

End:

शरीरेन्द्रियसाध्यविधिभेदाः पूर्वमीमांसायां निरूपिताः । इह तु मानससाध्यो विधिर्निरूपित इति पृथगारम्भ इति चेत्तर्हि "अथातः परिशिष्टधर्मजिज्ञासा" इत्येवारभ्येत न त्वेवमारभ्यते । तस्माद्धर्मब्रह्मभेदादे-

वानयोर्मीमांसयोर्भेदः । तदेवं विधिशंकाया अप्यभावाद्वि· विंशो ब्रह्माणि वेदान्तसमन्वय इत्यशेषमतिमंगलम् ।

संगृहीतं विवरणं
सहानेकैर्निबन्धनैः ।
टीकायासं विना लोकाः
क्रीडन्त्वत्र यथासुखम् ॥

महतां हृदयं बोद्धु-
मशक्तोऽप्यतिभक्तितः ।
अकार्षं ग्रन्थमेतेन
प्रकाशात्मा प्रसीदतु ॥

यद्विद्यातीर्थगुरवे
शुश्रूषाऽन्या न रोचते ।
तदस्त्वेषा भक्तियुक्ता
श्रीविद्यातीर्थपादयोः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भारतीतीर्थविद्यारण्यमुनिवर्यविरचिते विवरणप्रमेयसङ्ग्रहे चतुर्थसूत्रे द्वितीयवर्णकं समाप्तम् ॥

Subject: Vivaraṇaprameyasaṅgraha a brief summary of Pañcapādikāvivaraṇa of Śrī Prakāśātmayati; up to the II Varṇaka.

Remarks: —The Ms. is in a fairly good condition.

This work is a summary of topics in Prakāsatma's commentary on the Pañcapādikā on part I. of Śaṅkara's Śārīraka Bhāṣya. This is translated by Thibaut and published in Indian Thought, Allahabad.

॥ विवरणप्रमेयसंग्रहः ॥

7068. VIVARAṆAPRAMEYASAṄGRAHAḤ.

Burnell's Catalogue No. 9878. Page 88. Left column. Substance—Palm leaf. Size—$11\frac{1}{2} \times 1\frac{1}{8}$ inches. Leaves—124 Lines—8 to a Page. Script—Grantha. No. of Granthas—3500. Author—Vidyāraṇya. Incomplete. Printed.

Beginning:

धर्मजिज्ञासासूत्रे ह्येतदवस्थितं । "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधेरदृष्टार्थत्वं उत दृष्टार्थत्वमिति विशये विधिवशाददृष्टार्थत्वं । न च फलाभावः । विश्वजिन्न्यायेन स्वर्गस्य रात्रिसत्रन्यायेनार्थवादिकघृतकुल्यादेर्वा फलत्वोपपत्तेः । न चैवं अध्ययनविधेरपि अविवक्षितार्थत्वे अध्ययनाप्रसक्तेः दृष्टार्थत्वादिविचारानवसरः ।

End:

तस्मात्परमार्थतो द्वितीयं ब्रह्म व्यावहारिकभेदात् कर्म-

कार्यादिव्यवहारः । न च वैपरीत्यं । वेदान्तानां तत्त्वावेदकत्वाभावे ब्रह्मणो व्यवहारपथातीतत्वेनोभयविधप्रामाण्यहानिप्रसंगात् । कर्मकाण्डस्य तु तत्त्वावेदकत्वाभावेऽपि व्यावहारिकं प्रामाण्यमिति सर्ववेदप्रामाण्यं सिद्धमित्यद्वैतस्य निरस्तसमस्तावद्यत्वात्तदेव श्रेयोऽर्थिभिरादरेणोपादेयमिति नवमवर्णकार्थनिरूपणं सिद्धं ।

आशामोदकतृप्तानामविज्ञातपरात्मनां ।
आत्मतत्त्वार्थसिद्धयर्थं सन्दर्भस्समुदाहृतः ॥

Colophon: (in the margin)

नवमवर्णकं समाप्तम् ।

Subject: Vivaraṇoprameyasaṅgraha otherwise known as Vivaraṇopanyāsa. Varṇakas 1-9; wants a little in the beginning.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the following—

गंगां मुञ्चाथ मां वा वह निजवपुषीत्यर्थितो नीलकण्ठः
पार्वत्या तत्तपस्यापरवशहृदयो दातुकामस्तदिष्टम् ।
ओमित्युक्त्वा तदैव स्वाशिरसि विलसद्गङ्गया लज्जमाना
माश्लिष्यांगेन गाढं प्रमदभरयुतः पातु मामर्धजानिः ॥

॥ विवरणप्रमेयसंग्रहः ॥

7069. VIVARAṆAPRAMEYASAṄGRAHAḤ.

Burnell's Catalogue No. 9874. Page 88. Left column. Substance—Palm leaf. Size—16 × 1⅛ inches. Leaves—110 (9-124). Lines—6 to a Page. Script—Grantha. No. of Granthas—3500. Author—Vidyāraṇya. Incomplete. Printed.

Beginning:

....जन्यत्वानियमेन तदानीं विषयाभावादेव तदभावात्
परा....दुःखाभावविषयत्वात् दुःखाभावोऽपि प्र........
तत्त्वज्ञानस्याप्यनुसन्धानमिति चेत्तर्ह्युत्थितस्य सुषुप्तौ दुः-
खकारणाभावप्रतिसन्धानादर्थापत्या तत्कल्प........ ।

End, colophon and subject—Same as No 9873.

Remarks:—The Ms. is in a fairly good condition. This Ms. is the original of the previous one, its copy. This Ms. has lost 8 leaves at the beginning.

॥ ब्रह्मसूत्रभाष्यव्याख्या—भामती ॥

7070. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—BHĀMATĪ.

Burnell's Catalogue No. 6294 a. Page 86. Right column. Substance—Paper. Size—10½ × 4 inches. Sheets—64. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Vācaspatimiśraḥ. Incomplete. Printed.

Beginning:

श्रीरामपरमात्मने नमः ।

एतच्छास्त्रप्रवर्तकाचार्येभ्यो नमः । अविघ्नमस्तु ।

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोबवनयः ।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥ १ ॥

* *

अथ यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः यथा समनस्केऽपि सन्निकृष्टः स्फीतालोकमध्यवर्ती घटःकरटदन्ता वा । तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः ।

End:

'दशानां भूतमात्राणामिति'

* * *

वाक्यान्तरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात् तदनूद्याप्राप्तोपासाभावार्थो विधेयस्तस्य च भेदाविध्यावृत्तिलक्षणेन वाक्यभेदोतिस्फुट इति भाष्यकृता नोद्घाटितस्तद्व्याख्यानेन व्यक्तप्रायत्वादिति सर्वमनवद्यम् ॥

Colophon:

इति श्रीवाचस्पतिमिश्रविरचिते भाष्यविभागे भामत्यां
प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

Subject: Brahmasūtrabhāṣyavyākhyā otherwise known as Bhāmatī and Bhāṣyavibhāga a commentary on Brahmasūtrabhāṣya of Śaṅkarācārya I. 1.

Remarks:—The Ms is in a fairly good condition.

For notes on the author vide remarks under Nos. 6694 and 6705.

This work is published along with Brahmasūtrabhāṣya by the Nirṇayasāgar Press, Bombay.

BHĀMATĪ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7071	B. L. 6294	Paper.	10¾×4	56 (5-60)	12	Devanāgarī.	Incomplete; I. ii. iv.
7072	„ 6295	„	10½×4½	150 (40-189)	12-15	„	„ I. i-iv: wants beginning.
7073	„ 9621	Palm leaf.	17×7⅜	321	8-9	Grantha.	„ I. i—III. iv.
7074	„ 9622	„	18×1⅜	197 (69-265)	7-10	„	„ I. ii—IV. iv.
7075	„ 9628	„	16×1½	199	6-7	Telugu.	„ I. i—II. ii.
7076	„ 9625	„	18½×1¼	96	7	Grantha.	„ I. i—II. ii.
7077	„ 9621 a	„	17½×1¼	96	7-12	„	„ I. i—iii.
7078	„ „ b	„	17×1⅜	31 (322-352)	9	„	„ IV. i—iv.
7079	„ 6296	Paper.	12×8¼	76	8	Devanāgarī.	„ III. i—iv.
7080	„ 6297	„	12×8½	80 (24-53)	8	„	„ III. i. iv.

BHĀMATĪ (Contd).

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7081	B. L. 6298	Paper	12×8½	28	7-8	Devanāgarī.	,, IV. i—iv.
7082	,, 6299	,,	10½×6¾	19	15	,,	,, IV. i—iii.
7083	J. L. 27	,,	8¾×4	174 (16+24+21 +11+12+ 20+54+16)	12	,,	,, I. iii & iv; II. iii & iv & III. i—iv.
7084	B. L. 6317	,,	10¼×4½	86 (I sheet is missing)	10	,,	,, Sūtras 1-8 in the Catursūtrī.
7085	S. S. 20	,,	11½×4⅞	45	11	,,	,, Casussūtrī; ends abruptly.
7086	,, 21	,,	9×4¼	8	12	,,	Fragments.

DETAILED REMARKS
to the
BHĀMATĪ MSS. IN THE ABOVE TABLE.

7073 At the end of this Ms. there are a few leaves dealing with (a)—a Tarka bit discussing whether Tamas is a dravya & (b)—a bit of the Bhāmatī towards the end of Adhyāya III.

7074 After the colophon is given—

सूर्यनारायणेन लिखितं ।

7081 After the colophon is given—

संवत् १५.२५ + श्रीमत्काश्यां मधुकरमिश्रेण लिखापितम् ।

The date of this Ms. is A. D. 1468, the Ms. thus being the oldest in the collections of this library.

7082 On the title page is given—

तुलजामहाराजभोसलेन्द्रस्य पुस्तकमिदम् ।

7084 Dr. Burnell wrongly notices this Ms. as Śaṅkara's commentary on the Atharvaṇatāpanīya Upaniṣad.

॥ भामतीव्याख्या—कल्पतरुः ॥

7087. BHĀMATĪVYĀKHYĀ—KALPATARUḤ.

Burnell's Catalogue No. 3620. Page 87. Left column.

Substance—Palm leaf. Size—$18\frac{1}{2}\times1\frac{5}{8}$ inches. Leaves—130. Lines—15-17 to a Page. Script—Grantha. No. of Granthas—12000. Author—Amalānanda. Complete. Printed.

Beginning:

यदज्ञातं जीवैः बहुविधजगद्विभ्रमघरं
 वियच्चद्वालैस्थलमलिनतायोगिकालितम् ।
तदुन्मुद्रज्ञानप्रततसुखतद्ब्रह्म परमं
 नमस्यामः प्रत्यक्श्रुतिशतशिरोभिः प्रकटितम् ॥ १ ॥

* * *

रूढोऽयं वेदकाण्डात् + तन्यते कल्पवृक्षः ॥ १२ ॥

श्रीमच्छारीरकमीमांसाव्याख्यायाः प्रारीप्सितायाः अविघ्नपरिसमाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयविषयादि दर्शयति 'अनिर्वाच्येति'।

End:

नृग इति राज्ञः आख्या ।

शास्त्रांबुधेः पारगता+
कृष्णक्षितीशे भुवनैकवीरे ॥ ६ ॥
भ्राता महादेवनृपेण साकं
 पाति क्षितिं प्रागिव धर्मसूनौ ।

कृतो मयायं प्रवरप्रबन्धः
प्रगल्भवाचस्पतिभावभेदी ॥ ७ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य.... ।

Colophon: (Leaf No. 129)

श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमदनुभवानन्दपूज्यपादशिष्यभगवदमलानन्दविरचिते वेदान्तकल्पतरौ चतुर्थाध्यायस्य तृतीयः पादः ॥

Subject: Bhāmatīvyākhyā, Kalpataru; A commentary on Bhāmatī of Vācaspatimiśra.

Remarks:—The Ms. is in good condition. This has been printed in Nirṇayasāgar Press Bombay.

॥ भामतीव्याख्या—कल्पतरुः ॥

7088. BHĀMATĪVYĀKHYĀ—KALPATARUḤ.

Burnell's Catalogue No. 9628. Page 3[illegible]. **Left column.** **Substance**— Palm leaf. Size—17 × 1⅜ inches. Leaves—297. Lines—8-9 to a Page. Script—Grantha. No. of Granthas—12000. Author—Amalānanda. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7087.

The second half of the last verse is wanting at the end.

Remarks:--The Ms. is in good condition.

॥ भामतीव्याख्या—कल्पतरुः ॥

7089. BHĀMATĪVYĀKHYĀ—KALPATARUḤ.

S. S. Collection No. 103.

Substance—Palm leaf. Size—14×1½ inches. Leaves—172. Lines—8-10 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Amalānanda. Incomplete. printed.

Beginning—Same as No. 7087.

End:

पञ्चशब्दोपात्तसंख्याया जनशब्दार्थं प्रति विशेषणत्वाच्च न विशेषणान्वयः । ननूपसर्जनस्यापि विशेषणान्वयः ॥

Colophon: **(Leaf No. 161)**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदनुभवानन्दपूज्यपादशिष्य-भगवदमलानन्दविराचिते वेदान्तकल्पतरौ प्रथमस्याध्यायस्य

तृतीयः पादः ॥

Subject: Bhāmatīvyākhyā otherwise known as Kalpataru. I. 1—4.

Remarks:—The Ms. is in good condition.

॥ वेदान्तकल्पतरुव्याख्या--आभोगः ॥

7090. VEDĀNTAKALPATARUVYĀKHYĀ--ĀBHOGAḤ.

Burnell's Catalogue No. 9630. Page 87. Left column. Substance—Palm leaf. Size—18¾ × 1½ inches. Leaves—211 (1-100; 146-154, 226-317). Lines—9 to a Page. Script—Grantha. No. of Granthas—7200. Author—Lakṣmīnṛsimha. Incomplete. Partly Printed.

Beginning:

श्रीलक्ष्मीनृसिंहाय नमः ॥

श्रीमन्नारायणेन्द्रगुरुचरणारविन्दाभ्यां नमः ॥

दैत्येन्द्रं वरदर्पितं सरभसं हित्वाट्टहासे कृते
दृष्ट्वायं कमलालयाकुशलिनं जैत्रश्रियाऽलङ्कृतम् ।
संसृष्टा परिषस्वजे सुरगणैस्संस्तूयमानं विभुं
तं लक्ष्मीकुचकुङ्कुमाङ्किततनुं लक्ष्मीनृसिंहं नुमः ॥

महीधरकुलोत्तंसो रामाम्बागर्भसंभवः ।
लक्ष्मीनृसिंहस्तनुते कल्पवृक्षप्रदीपिकाम् ॥

क कल्पकतरुर्दिव्यो दुरालोको दुरासदः ।
मादृशैश्चर्मचक्षुर्भिर्मन्दप्रज्ञैस्तथापि तु ॥

आसाद्य कल्पतरुं दिशा परिमलोर्थया(?) ।
आलोक्य भक्तिचक्षुर्भ्यामाभोगोऽयं प्रकाश्यते ॥

आचार्यश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय च कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नस्य शास्त्रस्य विषयादिकं दर्शयति यदज्ञानमिति ।

End:

अन्तराभूतग्रामवत्स्वात्मनः ॥

कौषीतकीयेत्यादि विषयप्रदर्शकटीकां श्रुत्यर्थकथनेन विशदयति, बृहदारण्यक इत्यादिना । एनमित्यस्य स्वयमर्थकथनं । याज्ञवल्क्यमिति । न तु श्रुतिगतमिति ध्येयम् । उपक्रमे कथितमिति, आदौ पठितमेकं ब्राह्मणमित्यर्थः । युवेति । जीवति तु वंश्ये युवेति पाणिनिसूत्रेण वंश्ये पित्रादौ जीवति सति पौत्रप्रभृत्यपत्यं युवसंज्ञं स्यादित्युक्तो युवेत्यर्थः । अपरोक्षमित्यर्थ इति । तथा च व्यत्ययेन पञ्चमीति भावः । सर्वान्तरत्वप्रत्यभिज्ञानाच्चेति । इदञ्च वेद्यभेदाद्विद्याभेद इति पूर्वपक्ष्यैकदेशिनिराकरणसिद्धान्तकोट्यभिप्रायेण वेद्याभेदेऽप्यभ्याससामर्थ्याद्विद्याभेद इति प्रधानपूर्वपक्षीनिराकरण........ ॥

Colophon: (Leaf No. 288).

इति श्रीमन्महीधरकुलजलधिकौस्तुभ कोण्डुभट्टमहोपाध्यायतनूभवेन श्रीमन्नारायणेन्द्रगुरुचरणकटाक्षनिक्षेपकोशगृहायमाणेन लक्ष्मीनृसिंहचरणारविन्दचञ्चरीकेण लक्ष्मीनृसिंहेन विरचितायां कल्पवृक्षप्रदीपिकायामाभोगाख्यायां तृतीयाध्यायस्य

द्वितयिः पादः ॥

Subject: Vedāntakalpataruvyākhyā; Ābhoga. I. 1. 1. to III. 3. 35.

Remarks:—The Ms. is in good condition, The leaves are in disorder.

Lakṣmī Nṛsimha, the author of this commentary, Ābhoga on the Kalpataru, is identical with the author of the Nyāya work, Tarkadīpikā described under No. 6271. He is the son of Koṇḍubhaṭṭa, the author of the Vaiyākaraṇabhūṣaṇasāra.

The Catussūtri of the Ābhoga has been published by the Srī Vāṇi Vilas Press, Srirangam.

॥ ब्रह्मसूत्रभाष्यव्याख्या--रत्नप्रभा ॥

7091. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—RATNAPRABHĀ.

S. S. Collection No. 22.

Substance—Paper. Size—12¾×7¾ inches. Sheets—

877(346+31). Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—15000. Author—Govindānanda. Complete. Printed.

Beginning:

श्रीगणपतये नमः ।

यमिह कारुणिकं शरणं गतोऽप्यरिसहोदर आप महत्पदम् ।
तमहमाशु हरिं प्रभुमाश्रये जनकजाङ्कमनन्तसुखाकृतिम् ॥ १ ॥

* *

कामाक्षीदत्तदुग्धप्रचुरसुरनुतप्राज्यभोज्याधिपूज्य-
श्रीगौरीनायकाभिप्रकटनशिवरामार्यलब्धात्मबोधैः ।
श्रीमद्गोपालगीर्भिः प्रकटितपरमाद्वैतभासास्मितास्य-
श्रीमद्गोविन्दवाणीचरणकमलगो निर्वृतोऽहं यथालिः ॥ ४ ॥

* *

विस्तृतग्रन्थ वीक्षायामलसं यस्य मानसं ।
व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा ॥ ६ ॥

* *

इह खलु स्वाध्यायोऽध्येतव्य इति नित्याध्ययनविधिनाधीतस्वाध्याये 'तद्विजिज्ञासस्व' 'सोऽन्वेष्टव्यः' इति श्रवणविधिरुपलभ्यते ।

End :

यत्तु दहरादीश्वरोपास्त्यागतास्तेषां सगुणविद्याफलक्षयेऽपि निरवग्रहेश्वरानुग्रहलब्धात्मज्ञानान्मुक्तिनियम इत्यभिप्रेत्याह-- अन्तवत्त्वेऽपीति ।

अनावृत्तिश्शब्दादिति । एवं समन्वयोक्त्या ब्रह्मात्मैकयस्य……………………

निष्कलङ्कानन्त स्वप्रकाशचिदात्मनावस्थानमिति सिद्धम् ।

नानाविधग्रन्थजातं वीक्ष्य सम्यग्यथामति ।

शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥ १ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्दभगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य चतुर्थः पादः ।

चतुर्थाध्यायश्च समाप्तः । शक १७७७ नलवर्षे ॥

Subject : **Brahmasūtrabhāṣyavyākhyā—Ratnaprabhā, with text of the Bhāṣya.**

Remarks:—The Ms. is in good condition.

The date of the Ms. is Śaka 1777 or 1855 A. D. After the colophon some यति धर्मs are discussed.

The work has been printed in Nirṇaya Sāgar Press, Bombay in the edition of Śankara Bhāṣya with Bhāmatī.

॥ ब्रह्मसूत्रभाष्यव्याख्या—रत्नप्रभा(सभाष्या) ॥

7092. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—RATNAPRABHĀ (WITH BHĀṢYA).

J. L. Collection No. 952.

Substance—Paper. Size—14½ × 5¾ inches. Sheets—588. Lines—8-14 to a Page. Script—Devanāgarī. No. of Granthas—12800. Author—Govindānanda. Complete. Printed.

Beginning, end, colophon and subject—Same as 7091.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

'पुस्तकमिदं श्रीमद्गम्भीरराजभारतीदीक्षितानाम् ॥'

॥ ब्रह्मसूत्रभाष्यव्याख्या—रत्नप्रभा ॥

7093. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—RATNAPRABHĀ.

J. L. Collection No. 953.

Substance—Paper. Size—16½ × 6 inches. Sheets—40 (1-40). Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—1800. Author—Govindānanda. Incomplete. Printed.

Beginning—Same as 7091,

End:

आकृतिविशेषस्त्विति * * स्मृत्या स्वप्रामाण्यार्थमूलश्रुतिरनुमीयत इति अनुमानं स्मृतिः ।

एते अ .... ।

Colophon:—(Sheet No 34).

इति + भाष्यरत्नप्रभायां प्रथमाध्यायस्य द्वितीयः पादः ।

Subject: Brahmasūtrabhāṣyavyākhyā, Ratnaprabhā; I. 1-3;

Remarks:—The Ms. is in a fairly good condition.

॥ ब्रह्मसूत्रभाष्यव्याख्या—रत्नप्रभा ॥

7094. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—RATNAPRABHĀ.

J. L. Collection No. 954.

Substance—Paper. Size—10 × 4¾ inches. Sheets—19. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—570. Author—Govindānanda. Incomplete. Fragment only. Printed.

Beginning:

....अत्यन्ताभाववत्यभावस्य सत्त्वेपि स्वात्यन्ताभावयोर्मूलाग्रावच्छेदकभेदान्नातिव्याप्तिः ॥ * स्मृति रूप इति । ....

End

अन्यार्थश्चेति । सूत्रं व्याचष्टे-- अथेत्यादिना ।

* *

तेजः स्वप्रभावकमिति । यस्मिन्सति यन्न भाति तदनुतद्भा........ ।

Subject: Brahmasūtrabhāṣyavyakhyā; Ratnaprabhā.

Remarks:—The Ms. is in a fairly good condition. The numbering of the sheets is very irregular.

॥ ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायनिर्णयः ॥

7095. BRAHMASŪTRABHĀṢYAVYĀKHYĀ—ŚĀRĪRAKANYĀYANIRṆAYAḤ.

Burnell's Catalogue No. 6242 a-n. Page 87. Right column. Substance—Paper. Size—11¾×4 inches. Leaves—263. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—15050. Author—Ānandagiri. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः

अभ्यस्तान्व्यमपूर्वमर्थधिषणैर्ग्राह्यं पुमर्थास्पदं
लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।

आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धं परं
सत्यं ज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥ १ ॥

* *

श्रद्धाभक्ती पुरोधाय विद्यायागमभावनाम् ।
श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयम् ॥ ६ ॥

नित्याध्ययनविध्युपादापितवेदान्तवचोभिरापाततः प्रतिपन्नं शास्त्रारम्भौपयिकं अनुबन्धजातं न्यायतो निर्णेतुं भगवान् बादरायणः सूत्रितवान् “ अथातो ब्रह्मजिज्ञासा ” इति ।

End:

अनुगृहीताः सर्वतः स्वात्मन्युपसंहृता बाह्येन्द्रियाणां वृत्तयो येन तन्मनः तथा दर्शनादिति पूर्वोक्तयुक्तिमत्र हेतुत्वेन संगृह्णाति । तथा हीति । मनः शब्दश्रुत्या स्वरूपसम्प........ ॥

Colophon: (Sheet No. 8.)

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचिते शारीरकन्यायनिर्णये प्रथमस्याध्यायस्य प्रथमः पादः ॥

चतुर्थस्याध्यायस्य प्रथमः पादः ॥

हे पुस्तक शरभोजिमहाराज + काशीदेशाहून + आणिलें असें ।

Subject : Brahmasūtrabhāṣyavyākhya; Śārīrakanyāyanirṇaya. I. i—IV. i

Remarks :—The Ms. is in excellent condition.

This bundle contains 13 Mss. each Ms. containing a Pāda. Some of them bear the superscript :—

हे पुस्तक शरमोजिमहाराज + काशीवेशाहून + आणिलें असलें ।

SĀRĪRAKANYĀYANIRṆAYA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7096	B. L. 6253	Paper.	9×4	254	12	Devanāgarī.	Incomplete; II. Adhyāya only
7097	„ 6468	„	„	260	12	„	„ III. „ „
7098	„ 9615	Palm leaf.	19×1¼	278	5-9	Grantha.	„ I. i—II. iv.
7099	„ 9616	„	16×1½	302	6-7	„	„ I. i—III. i.
7100	„ 9617	„	18×1¼	213	„	„	„ III. ii-IV. iv.
7101	„ 9618	„	17½×1½	257	5-6	„	„ I. i—ii and a part of pāda iii also.
7102	„ 9619	„	14×1¼	202	6	„	„ I. i. fragment; wants beginning and end.
7103	„ 9620	„	19½×1½	28	12	Telugu.	„ I. i. a fragment.

DETAILED REMARKS
on the
MSS. IN THE ABOVE TABLE.

7098 After the colophon is given—

श्रीमत्कमलालये पश्चिममठे श्रीमन्नारायणारण्याभिधानयतीश्वरस्येदं सम्पुटम् ।

॥ ब्रह्मसूत्रभाष्यव्याख्या ॥

7104. BRAHMASŪTRABHĀṢYAVYĀKHYĀ.

Burnell's Catalogue No. 9602 b. Page 86. Right column. Substance—Palm leaf. Size—15½×1½ inches. Leaves—10 (128-132). Lines—5 to a Page. Script—Telugu. No. of Granthas—225. Author—? Incomplete. Not printed.

Beginning:

कारणाभावाच्चत्र सालक्षण्यं सत्यमुक्तं न तावता कार्यकारणयोर्भवदभिमत सालक्षण्यसिद्धिः.... ।

* *

असदिति चेत् न प्रतिषेधमात्रत्वात् ॥ II 1. 7.

End:

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ (II. 1. 14.)

* *

तदतिरिक्तवस्त्वन्तरानुपलब्धेश्च बुद्धिशब्दान्तरादिभि-

र्वस्त्वन्तरत्वं साधितमिति चेन्न । अनिरूपितवस्त्ववलंबनानां बुद्धिशब्दान्तरादिना शुक्तिका........ ॥

Subject: Brahmasūtravyākhyā.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Brahmasūtrabhāṣyam.

Dr. Burnell wrongly describes this Ms. as Śrī Śaṅkara's Bhāṣya. This brief Vṛtti on the Brahmasūtras is by an unknown author.

॥ ब्रह्मसूत्रव्याख्या ॥

7105. BRAHMASŪTRAVYĀKHYĀ.

S. S. Collection No. 23 a.

Substance—Paper. Size—13 × 5⅞ inches. Sheets—4. Lines—21 to a Page. Script—Grantha. No. of Granthas—175. Author—? Incomplete. Fragments only. Not printed.

Beginning:

प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः । १. ४. २० ॥ अयमत्र परिहाराभिप्रायः । उपक्रमोपसंहारयोर्यद्यपि जीवप्रतिपादनं दृश्यते, तथापि न तदनुसारेण मध्यगतं अनेकतात्पर्यलिंगोपेततया अन्यथा व्याख्यातुं शक्यम् ।

End:

अवस्थितेरिति काशकृत्स्नः । १. ४. २२ ॥ * *

न्यायेन च न संगच्छन्त इति कृतकस्यापि नित्यत्वे यत्कृतकं तदानित्यमिति न्यायेनासंभानमित्यर्थः ।

Colophon: Nil.

Subject: Brahmasūtravyākhyā; I. iv. 20—22.

Remars:—The Ms. is in good condition.

॥ ब्रह्मसूत्रमुक्तावली ॥

7106. BRAHMASŪTRAMUKTĀVALĪ.

S. S. Collection No. 23.

Substance—Paper. Size—12 × 5¼ inches. Sheets—66 (2-67). Lines—17-21 to a Page. Script—Grantha. No. of Granthas—2250. Author—Brahmānandasarasvati. Incomplete, Printed.

Beginning:

....वात्मा एतज्जगद्बाधायां सामानाधिकरण्यं । सिद्धिः तात्त्विकमैतदात्म्यम् । ब्रह्मात्मकं त्रयं जाग्रदादि अवस्थात्रयं । सुषुप्तं अज्ञानरूपं कारणं विना नास्ति । यतस्तमो मिथ्या ।

End:

तत्र मांसादौ पार्थिवत्वादिवादस्तु वैशेष्यात् अन्नादेः पृथिव्याद्यंशाधिक्यात् तद्वादस्तद्वाद इति पदाभ्यासोऽध्याय परिसमाप्तिं द्योतयति ।

इति श्रीपरमानन्दसरस्वतीपूज्यपादशिष्यश्रीब्रह्मानन्दसरस्वतीविरचितायां ब्रह्मसूत्रमुक्तावल्यां द्वितीयाध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

Subject: Brahmasūtramuktāvalī a running commentary on Brahmasūtras.

Remarks:—The manuscript is in good condition.

This work is published at Poona in Ānandāśrama Sanskṛt Series. This is the famous author of Laghucandrika otherwise known as Gauḍabrahmānandīya a commentary on Advaitasiddhi, and also on Siddhāntabindu a commentary on Śankara's Daśaślokī.

॥ ब्रह्मतत्त्वप्रकाशिका ॥

7107. BRAHMATATTVAPRAKĀŚIKĀ.

S. K. Collection No. 123.

Substance—Paper. Size—$9\frac{3}{4} \times 4$ inches. Sheets—134. Lines—10-11 to a Page. Script—Devanāgarī. No. of Granthas—4000. Author—Sadāsivendrasarasvati. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ।

आम्नायान्तैकसंसिद्धमादिमध्यान्तवर्जितम् ।
आनन्दघनमापूर्णं किंचिज्ज्योतिरुपास्महे ॥ १ ॥

नमस्त्रय्यन्तकान्तारविहारैकपटीयसे ।
वादिमत्तेभसंहर्त्रे व्यासकेसरिणे सते ॥

इदमारचयाञ्चकार ॥ अथातो ब्रह्मजिज्ञासा ॥

End:

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥

* * *

सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ।
यज्ज्ञानाञ्जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तमा ।
ब्रह्मप्राप्तिः प्रत्यपादि तदास्मि ब्रह्मचिद्घनम् ॥

Colophon: (Sheet No. 115)

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्जसेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां तृतीयस्याध्यायस्य चतुर्थः पादः ।

Subject: Brahmatattvaprakāśikā, a Vṛtti on the Brahmasūtras—an independent commentary on Brahmasūtras in accordance with the views of Śaṅkarācārya

Remarks:—The Ms. is in good condition,

Sadāśivendrasarasvati, the author of this Vṛtti on the Brahmasūtras is identical with the author of the Yogasūtravṛtti described under No. 6709. For further information about him vide remarks under the same.

The work has been published by the Śrī Vāṇi Vilas Press, Srirangam and as No. 5 in the Trivandrum Sanskṛt Series.

॥ ब्रह्मविद्याभरणम् ॥

7108. BRAHMAVIDYĀBHARAṆAM.

N. S. Collection No. 84.

Substance—Palm leaf. Size—15½ × 1½ inches. Leaves—144. Lines—10 to a Page. Script—Grantha. No. of Granthas—3500. Author—Advaitānanda. Incomplete. Printed,

Beginning:

...मुग्धं...नुग्रहकरुणया कुर्यां कृतिं प्रस्फुर-
त्भासां वेदवतीं विकल्पगलितां विद्यां ददौ चिन्मयीम् ।
भूमानन्दघनस्थितो गुरुरसौ............ ......
..............................शुभ्रैस्स्वपादांबुजैः ॥

वृत्तं संकीर्तयन् पादयोः पूर्वापरभावोपयोगितया तदर्थं दर्शयति प्रथमेपाद इत्यादिना ।

End:

परमात्मनि सूक्ष्मताभिप्राया ।......पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति । तद्द्योतकत्वं त्वभ्यासस्य वैदिकसम्प्रदायगता । तथा च श्रुतिषु अध्यायपरिसमाप्तौ पदाभ्यासो दृश्यते । "तद्धास्य विजज्ञाविति विजज्ञाविति" इति । "तं स्कन्दमित्याचक्षते तं स्कन्दमित्याचक्षते" इति । "ओंकार एवेदं सर्वमोंकार एवेदं सर्वं" इति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभूमानन्दसरस्वती श्री-

चरणानुग्रहलब्धसारस्वतपदस्य निरतिशयौदार्यादिगुणरत्नखचित यतिकुलोत्तंसश्रीमद्रामानन्दतीर्थमुखारविन्दनिर्गतशारीरकसूत्रभाष्यार्थस्वर्धुनीप्रवाहनिमज्जनसुहितस्य श्रीमदद्वैतानन्दस्य कृतौ शारीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः ।

Subject: Brahmavidyābharaṇa, a gloss on, Śaṅkara's Bhāṣya; I. 2—4 only.

Remarks:—The Ms. is in good condition. This work was published in Advaitamañjarī series, by Hariharaśastri at Kumbakonam.

After the colophon is given—

वेङ्कटेश्वरेण लिखितः ।

॥ वेदान्तसूत्रोपन्यासः ॥

7109. VEDĀNTASŪTROPANYĀSAḤ.

Burnell's Catalogue No. 6583. **Page** 88. **Left column.**

Substance—Paper. **Size**—11½ × 4½ inches. **Sheets—16. Lines**—11 to a **Page. Script—Devanāgarī. No. of Granthas**—150. **Author**—? **Incomplete. Not printed.**

Beginning:

श्रीरामचरणद्वन्द्वं मद्ध(ह)दानन्दसाधनम् ।
नमामि(य)द्रजोयोगात्पाषाणोऽपि सुखं गतः ॥

नित्याध्ययनविधिनाऽधीतस्वाध्याय(मापा)त(?)ज्ञानवन्तं पुरुषार्थकामं ऐहिकामुष्मिकफलेषु विरक्तमुपलभमानः पर-

मकारुणिको मुनिः सूत्रयामास । 'अथातो ब्रह्मजिज्ञासा' इति । अत्राथशब्देन साधनचतुष्टयसंपत्त्यानन्तर्यमुपदिश्यते ।

End:

स्थूलारुन्धतीन्यायेनान्नमयादिविकारा । मुख्यार्थप्रदर्शनस्यात्मज्ञानार्थत्वेन आनन्दमयस्य सर्वान्तरत्वात् स एवात्मेत्यवधारणात् । आन्तरतमस्यान्यस्यात्मनोऽनुपदेशात् सर्वान्तरत्वमवगम्यते । विज्ञानकोशादौपाधिकप्रियाद्यवयवयोगो न विरुध्यते । ब्रह्मणोऽन्नमयादिकोशपरंपरया शारीरत्वमप्युपपन्नमेव । तस्मादन्नमयः परमात्मा ।

विकारशब्दान्नेति चेत् न प्राचुर्यात् । १ । १ । १३ ॥

Subject: Vedāntasūtropanyāsa; brief gloss on Brahmasūtras.

Remarks:—The Ms. is in a decaying condition and ends abruptly with Ānandamayādhikaraṇa.

॥ वैयासिकब्रह्ममीमांसासारसङ्ग्रहः— पुरुषार्थसुधानिधिः ॥

7110. VAIYĀSIKABRHMAMĪMĀMSĀSĀRA-SAṄGRAHAḤ—PURUṢĀRTHASUDHĀNIDHIḤ.

N. S. Collection No. 85.

Substance—Palm leaf. **Size**—14×1 inches. **Leaves**—95. **Lines**—7 to a Page. **Script**—Grantha. **No, of Gran-**

thas—3500. Author—Jñānendramuniḥ. Complete. Not printed.

Beginning:

……मुनयेश्रमवेश्मने ।

ब्रह्मसूत्रकृते तस्मै वेदव्यासाय… ॥

* * *

सूत्राणां वृत्तिः क्रियतेधुना । अथातो ब्रह्मजिज्ञासा । अथ साधनचतुष्टय… ।

End:

पुराणेषु प्रतिपाद्यन्त इति वाच्यं । ब्रह्मलोकवासिभिः कैरपि रागद्वेषादिकं न कर्तव्यमिति….सिनां शिक्षार्थं हिरण्यगर्भेण शापे कृते सति तं शापं कंचित्कालं भूलोके अनुभूय पुनर्ब्रह्मलो.. तानां शन्तनुचक्रवर्तिप्रभृतीनां ब्रह्मणा सहमुक्तेस्तेष्वेव पुराणेषु प्रतिपादितत्वेन विरोधाभावः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्वासुदेवेन्द्रशिष्यश्रीमज्ज्ञानेन्द्रमुनिविरचिते वैयासिकब्रह्ममीमांसासारसंग्रहे पुरुषार्थसुधानिधौ चतुर्थाध्यायस्य चतुर्थः पादः ।

हरिः ओम् । शुभमस्तु । ब्रह्मैव सत्यम् ।

Subject: Puruṣārthasudhānidhi a brief commentary on Brahmasūtrās.

Remarks:—The Ms. is in a decaying condition. The author calls himself the desciple of one Vāsudevendra.

॥ वैयासिकसूत्रोपन्यासः ॥

7111. VAIYĀSIKASŪTROPANYĀSAḤ.

Burnell's Catalogue No. 6256. Page 88. Left column. Substance—Paper. Size—9¾×4 inches. Sheets—195. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—3000. Author—Rāmeśabhāratī. Complete. Not printed.

Beginning:

बोधानन्दगणाध्यक्षं कालमूषिकवाहनम् ।
जन्मादिविघ्नकर्तारं भजे निजगुरुं सदा ॥ १ ॥

विद्याशंकरपादाब्जपरागाः पान्तु पावनाः ।
निस्तमस्कसदानन्दसाक्षात्करणहेतवः ॥ २ ॥

नमामि शुद्धविज्ञानमात्मभारति सद्गुरुं ।
यस्यावलोकनान्मूको वावदूकत्वमाप्नुयात् ॥ ३ ॥

आचार्यकृत तट्टीका तन्निबन्धन सागरात् ।
सदर्थरत्नान्युद्धृत्य सूत्रेषु ग्रथयाम्यहम् ॥ ४ ॥

"अथातो ब्रह्मजिज्ञासा" इह खलु सूत्रे सर्वज्ञबादरायणप्रणीतत्वादानर्थक्यानुपपत्तेः निरर्थकसिद्धबोधकत्वानुपपत्तेश्च शास्त्रेषु पुरुषप्रवृत्त्युपयोगितया कर्तव्येति पदमध्याहर्तव्यम् ।

End:

कुतः, 'न स पुनरावर्तते ।'

एतेन प्रतिपाद्यमाना इमं मानवं...

......अनुमानस्य व्युत्क्रम.

मुक्तिप्रतिपादक शब्दविरोधात्...

......शास्त्रपरिसमाप्तौ ।

वैयासिकानां सूत्राणामुपन्यासः कृतो मया ।

............सम्यक्ज्ञानं संस्त्यायतामिति ॥

टीका स्नेहविहीनापि व्याससूत्रार्थदीपिका ।

इयं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

Colophon:

इति श्रीवैयासिकसूत्रोपन्यासे चतुर्थाध्यायस्य चतुर्थः पादः ॥

Subject: Vaiyāsikasūtropanyāsa or Brahmasūtropan yāsa vṛtti or Vyāsasūtrārthadīpikā an independent dissertation on the teaching of the Brahmasūtras in the light of certain commentaries thereon.

Remarks:—The Ms. is in a fairly good condition. The writing on the last sheet is almost effaced.

॥ वैयासिकसूत्रोपन्यासः ॥

7112. VAIYĀSIKASŪTROPANYĀSAH.

Burnell's Catalogue No. 9841. Page 88. Left column.

Substance—Palm leaf. Size—18×1⅛ inches. Leaves—164. Lines—6 to a Page. Script—Grantha. No. of Granthas—3000. Author—Rāmeśabhārati. Incomplete. Not printed.

Beginning—Same as No. 6256.

End:

दर्शयतश्चैवं प्रत्यक्षानुमाने विकारावर्ति पारमेश्वरं रूपं । प्रत्यक्षानुमाने श्रुतिस्मृती दर्शयतः ‘तमेव भान्तमनुभाति सर्वं’ ‘न तद्भासयते सूर्यो न शशाङ्को न पावक’ इत्यादि सगुणे ब्रह्मणि स्थितानां सत्यकामादीनां सन्निरवयवमहत्वादिकं तदुपासकैः [स्तदुपासकै]न प्राप्यते यथा.... ।

Colophon: (Leaf No. 160)

इति वैयासिकसूत्रोपन्यासे चतुर्थस्याध्यायस्य तृतीयः पादः ।

Subject: Vaiyāsikasūtropanyāsa. I. 1—IV. 4.

Remarks:—The Ms. is in a fairly good condition.

॥ वैयासिकसूत्रोपन्यासः ॥

7113. VAIYĀSIKASŪTROPANYĀSAḤ.

Burnell's Catalogue No. 9842 a. Page 88. Left column. Substance—Palm leaf. Size—18½×1½ inches. Leaves—(69-88) 20. Lines—16 to a Page. Script—Telugu. No. of Granthas—1150. Author—Rāmeśabhārati. Incomplete. Not printed.

Beginning—Same as No. 6256.

End:

ततो भेदाभेदौ...ज्ञात्वावगमः । अपि च स्मर्यते ।

जीवेश्वरांशत्वम् ।

Subject: Vaiyāsikasūtropanyāsaḥ. I. II—3.

Remarks:—The Ms. is in a fairly good condition.

For the other works contained herein vide No.1257.

॥ व्याससूत्रसङ्गतिः ॥

7114. VYĀSASŪTRASAṄGATIḤ.

Burnell's Catalogue No. 9883 a. Page 95. Right column. Substance—Palm leaf. Size—18¾ × 2 inches. Leaves—3. Lines—14 to a Page. Script—Grantha. No. of Granthas—100. Author—? Incomplete. Not printed.

Beginning:

अस्मद्देशिकपादाब्जपरिचर्याबलादहो ।

व्यासप्रोक्तनयानां तु सङ्गतिः कारितामया (क्रियते सङ्गतिर्मया) ॥

सर्वेषां सूत्राणां श्रुत्या सङ्गतिः । जिज्ञासासूत्रस्योपोद्धातसङ्गतिः । जिज्ञासा सूत्रैस्स...समन्वयप्रतिपादनात्तेषामाध्यायं समन्वयाध्यायसङ्गतिः । प्रथमपादे स्पष्टब्रह्मलिङ्गानां विचार्यत्वादापादं पादसङ्गतिः । अत्र वेदान्तवाक्यविचारो विषयः ॥ १ ॥

॥ जन्मा ॥ पूर्वेणास्याक्षेपात् सङ्गतिः ॥ पू ॥ ब्रह्मस्वरूपासिद्ध्या मुक्त्यासिद्धिः ॥ सि ॥ तत्सिद्धिः । यतो वा इमानीत्यादिविषयः ॥ २ ॥

॥ शास्त्र ॥ अस्यापि पूर्वेणाक्षेपसङ्गतिः ॥ पू ॥ ब्रह्मणः सर्वज्ञत्वानिर्धारणम् ॥ सि ॥ तन्निर्धारणमिति । अस्य महत इति विषयः । पुनरपि ॥

॥ शास्त्रयोनित्वात् ॥ अस्य लक्षणप्रमाणयोर्ब्रह्मनिर्णयार्थत्वादेकफलत्वं सङ्गतिः ॥ पू ॥ अनुमानस्यैव विचार्यत्वसिद्धिः ॥ रा ॥ वेदान्तवाक्यानामिति । तत्रौपनिषदमिति विषयः ॥ ३ ॥

॥ तत्तुसमन्वयात् ॥ पू० आक्षेपिकी सङ्गतिः ॥ पू ॥ मुमुक्षोर्वेदान्तेषु प्रवृत्त्यनुपपत्तिः ॥ सि ॥ प्रवृत्तिरिति ॥ फलभेदः । अत्र सर्वे वेदान्ताविषयाः । पुनरपि ॥

तत्तु समन्वयात् ॥ अस्य पूर्वेण प्रासङ्गिकी सङ्गतिः ॥ पू ॥ उपासनया मुक्तिः ॥ सि ॥ ज्ञानान्मुक्तिः ॥ ४ ॥

॥ ईक्षतेर्ना ॥ अस्य पूर्वेणाक्षेपसङ्गतिः ॥ पू ॥ प्रधानैक्यसंपदुपास्तिः ॥ सि ॥ ब्रह्मैक्यधीः ॥ छान्दोग्ये सदेवसोम्येति विषयः ॥ ५ ॥

आनन्दमयो ॥ अस्य पू० प्रत्युदाहरणसङ्गतिः ॥ पू ॥ जीवस्यानन्दमयत्वेनोपास्तिः ॥ सि ॥ निर्विशेषब्रह्मैक्यधीः । तैत्तिरीयके । अन्नमय इति विषयः ॥ ६ ॥

॥ अन्तस्तद्धर्मो ॥ अस्य संसारी हिरण्मयः पुरुषोऽस्त्विति पूर्वसिद्धान्तयुक्त्या पूर्वपक्षोत्थानात् तेन दृष्टान्तसङ्गतिः । पूर्वापरपक्षयोरपरपरब्रह्मोपास्तिरेव फलम् । छान्दो । अथ य एकोन्तरादित्य इति विषयः ॥ ७ ॥

॥ आकाशस्तल्लिङ्गात् ॥ अस्य प्रत्युदाहरणसङ्गतिः । ॥ पू ॥ भूताकाशदृष्ट्योद्गीथोपास्तिः ॥ सि ॥ ब्रह्मदृष्ट्येति । छान्दोग्ये । अस्य लोकस्य का गतिरिति विषयः ॥ ८ ॥

॥ अत एव प्राणः । अत्रातिदेशत्वात्पृथक्सङ्गतिर्नापेक्षिता । यद्वा ॥ पूर्वमाकाशश्रुतेरव्यभिचारिब्रह्मलिङ्गाद्बाधो यथा युक्तः न तथेह प्राणश्रुतेर्बाधो युक्तः । संवेशनादिलिङ्गस्य प्राणसाधारणतया ब्रह्माव्यभिचाराभावादिति प्रत्युदाहरणसङ्गतिः । ॥ पू ॥ प्राणदृष्ट्या प्रस्तावोपास्तिः ॥ सि ॥ ब्रह्मदृष्ट्येति ॥ छान्दोग्ये । उद्गीथे प्रस्तोतर्यादिविषयः ॥ ९ ॥

॥ ज्योतिश्चरणा ॥ प्रत्युदाहरणसङ्गतिः ॥ पू ॥ कौक्षेयज्योतिष्यादित्यादि दृष्ट्योपास्तिः ॥ सि ॥ ब्रह्मदृष्ट्येति ॥ छान्दोग्ये । अथ यदतः पर इति विषयः ॥ १० ॥

॥ प्राणस्तथा ॥ पूर्वस्मिन्नधिकरणे प्रकृतत्रिपाद्ब्रह्मपरामर्शीयच्छब्दसमानाधिकृता ज्योतिश्श्रुतिस्तदर्थेत्युक्तं यथा न तथेह साधारणं किञ्चित्समस्ति प्राणस्य ब्रह्मत्वेमानम् ।

येन तथास्यादिति प्रत्युदाहरणसङ्गतिः ॥ पू ॥ प्राणेन्द्रजीवानामन्यतमोपास्तिः ॥ सि ॥ ब्रह्मधीः । कौषीतक्यामिन्द्रप्रतर्दनाख्यायिकायां प्रतर्दनं प्रतीन्द्रवाक्यं प्राणोऽस्मि प्रज्ञात्मेत्यादिविषयः ॥

सूत्राणि एकत्रिंशत् ॥ ॐ ॥

इत्थं पूर्वपादे स्पष्टब्रह्मलिङ्गवाक्यानां ब्रह्मणि समन्वयः साधितः । अधुना अस्पष्ट ब्रह्मलिङ्गानां समन्वयं साधितुं द्वितीयतृतीयपादावारभ्येते । पूर्वस्मिन् पादे जगत्कारणत्वेन व्यापित्वादिकमर्थसिद्धम् । तदुपजीव्योत्तरपादद्वयस्योत्थानाद्धेतुहेतुमद्भावसङ्गतिः । सर्वत्रास्य पूर्वपादेन यथा पूर्वं जीवादिलिङ्गबाधया ब्रह्मपरत्वमुक्तं न तथेहमनोमयादिवाक्ये ब्रह्मलिंगमस्तीति प्रत्युदाहरणसंगतिः ॥ पू ॥ जीवस्योपास्तिः ॥ सि ॥ ब्रह्मण इति । छान्दोग्ये शाण्डिल्यविद्यायां सक्रतुं कुर्वीत मनोमय इत्यादि विषयः ॥ १ ॥

॥ अत्ताचराचरग्रहणात् ॥ पूर्वं यथा ब्रह्मणो भोक्तृत्वाभाव उक्तस्तथा कर्तृत्वाभाव इह ब्रह्मण इति दृष्टान्तसंगतिरस्य पूर्वेण ॥ पू ॥ अग्नेर्जीवस्यवोपास्तिः ॥ सि ॥ ब्रह्मण इति । कठवल्लीषु ॥ यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनविषयः ॥ २ ॥

॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥

पूर्वं ब्रह्मक्षत्रपदस्य मृत्युपदसान्निध्यादनित्यवस्तु परत्ववदिहापि पिबच्छब्दस्य सन्निहितगुहाप्रवेशादिना बुद्धिक्षेत्रज्ञपरत्वमस्त्विति दृष्टान्तसङ्गतिः ॥ पू ॥ बुद्धिभिन्नजीवज्ञानम् ॥ सि ॥ जीवविलक्षणपरमात्मज्ञानं । कठवल्ल्यां ऋतं पिबन्ताविति विषयः ॥ ३ ॥

॥ अन्तर उपपत्तेः ॥ पूर्वं प्राथमिकपिबन्ताविति द्वित्वश्रुत्या चेतनत्वेन तुल्यजीवपरदृष्ट्यानुसाराच्चरमश्रुताः गुहाप्रवेशादयो नीतास्तर्हि तद्वदेव दृश्यत इति प्राथमिकप्रत्यक्षत्वोक्त्याऽक्षिप्रतिबिम्बात्मावगत्यनुरोधाच्चरमश्रुता अमृतत्वादयस्तुत्यर्थत्वेन कथञ्चिन्नेया इति दृष्टान्तसङ्गतिः ॥ पू ॥ प्रतिबिम्बोपास्तिः ॥ सि ॥ ब्रह्मोपास्तिः । उपकोसलविद्यायाञ्छान्दोग्ये य एषोऽक्षिणि पुरुषो दृश्यत इति विषयः ॥

End:

पूर्वमीक्षत्यधिकरणे गतिसामान्यशब्दत्वञ्चप्रतिज्ञाय तत्र वेदान्तानां गतिसामान्यं पादत्रयेण प्रत्यपादि । अधुना प्रधानस्याशब्दत्वमाक्षिप्य समाधीयत इत्याक्षेपसङ्गत्या चतुर्थपादोऽयमारभ्यते । पूर्वं सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यत्र प्रसिद्धजीवोक्तिभङ्गेनाप्रसिद्धब्रह्मोक्तिवदप्रसिद्धप्रधानोक्तिपरमेवकाठकवाक्यमस्त्विति दृष्टान्तसङ्गत्येदमधिकरणमार-

मते ॥ अनुमा ॥ कठवल्लीषु । महतः परमव्यक्तमव्यक्तात्पुरुषः परः इति ॥ पू ॥ ब्रह्मण्येव वेदान्तानां समन्वय इति नियमाभावः ॥ सि ॥ तादृशनियम इति ॥ १ ॥ पूर्वमव्यक्तशब्दमात्रेण प्रधानस्याप्रत्यभिज्ञायामप्यत्रत्रिगुणत्वादिलिङ्गोपेतादजाशब्दात्प्रत्यभिज्ञास्त्विति प्रत्युदाहरणसङ्गतिः ॥ चमसव ॥ श्वेताश्वतरे । अजामेकां लोहितशुक्लकृष्णामिति वा....सिद्धान्ते तत्सिद्धिरिति फलभेदः ॥ २ ॥

पूर्वमाध्यात्मिकाधिकारे प्रसिद्धछागग्रहणायोगादजातेज आदिकेत्युक्तं तथा यस्मिन् पञ्चपञ्चजना इति मन्त्रे पञ्चजनशब्देन प्रसिद्धमनुष्यग्रहणायोगात्सङ्ख्याभिमतपञ्चविंशतितत्त्वग्रहणमस्त्विति दृष्टान्तसङ्गतिरस्य पूर्वेण ॥ न सङ्ख्योपसं ॥ बृहदारण्यके यस्मिन् पञ्चपञ्चजा आकाशश्च प्रतिष्ठित इति वि ॥ पूर्ववत्फलभेदः ॥ ३ ॥

इत्थमधिकरणत्रयेण प्रधानस्याशब्दत्वसाधनेन ब्रह्मणि वेदान्तानां समन्वयः साधितः । अधुना तेषामेव परस्परविरुद्धार्थप्रतिपादकत्वेनानिश्चायकत्वादनुमानसिद्धप्रधानपर एवोक्तसमन्वयोस्त्वित्याक्षेपसंगतिरस्य ॥ पू ॥ अथवा । पूर्वं पञ्चत्वसङ्ख्यापूरणमन्नेन ज्योतिषा वेति विकल्पस्याविरोधेऽपि प्रकृते कारणे वस्तुनि विकल्पायोगाद्वि-

रोधे सत्यप्रामाण्यं वाक्यानामिति प्रत्युदाहरणसङ्गतिर्वास्य ॥ पू ॥ कारणत्वेन चाकाशादिषु ॥ पूर्ववत्फलभेदः ॥ ४ ॥

पूर्वमेकवाक्यस्य सच्छब्दबलादसच्छब्दोनीतः । इह तु वाक्यभेदात् ब्रह्म ते ब्रवाणीति बालाकीवाक्यस्थ ब्रह्मशब्देन प्राणादिशब्दो ब्रह्मपरत्वेन नेतुमशक्य इति प्रत्युदाहरणसङ्गतिरस्य ॥ पू ॥ जगद्वाचित्वात् ॥ कौषीतकिब्राह्मणे । यो वै बालाके एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य इति वि ॥ पू ॥ वाक्यस्य प्राणाद्युपासनापरत्वाद्ब्रह्मणि समन्वयासिद्धिः । ॥ रा ॥ तत्सिद्धिरिति ॥ ५ ॥

पूर्वं ब्रह्मोपक्रमसामर्थ्याद्ब्रह्मपरत्वमुक्तं । तर्हि तद्वदेव मैत्रेयिब्राह्मणस्य न वा अरे पत्युः कामायेत्यादि जीवोपक्रमसामर्थ्याज्जीवपरत्वमस्त्विति दृष्टान्तसङ्गतिरस्य ॥ पू ॥ वाक्यान्वयात् ॥ बृहदारण्यके । आत्मा वा अरे द्रष्टव्यः श्रोतव्य इत्यादि वि । पूर्ववत्फलभेदः ॥ ६ ॥

पूर्वं जन्माद्यस्य यत इति सूत्रे ब्रह्मणो जगत्कारणत्वमुक्तं तदधुनात्र विचार्यते । एवञ्च सामान्यज्ञानस्य विशेष विचारहेतुत्वात्तेन हेतुहेतुमद्भावसङ्गतिरस्य पूर्वेण प्रकृतिश्च प्रतिज्ञा दृष्टा ॥ पू ॥ एकविज्ञानात् सर्वविज्ञानप्रतिज्ञाया गौणत्वम् ॥ रा ॥ तन्मुख्यत्वमिति ॥ ७ ॥

इत्थमभिहितेन न्यायेन ईक्षतेर्नाशब्दमित्यादिना शब्दत्वादिहेतुभिः प्रधानकारणवादो निराकृतः । न तथेहाणुस्वभावासत्कारणवादास्तेषामपि कारणत्वबोधकशब्दानां श्रुतत्वादिति प्रत्युदाहरणसंगतिरस्य ॥ पू ॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥ अत्र वेदान्ता विषयाः । पू ॥ ब्रह्मण्येव वेदान्तसमन्वयासिद्धिः । ॥ रा ॥ तत्सिद्धिरिति । फलभेदः ॥ ८ ॥

सूत्राणि ॥ २८ ॥

चतुस्त्रिंशत्परंसूत्रशतकं तु समन्वये ।
अध्याये तद्वदेकोनचत्वारिंशत्त्रयामताः ॥

ॐ प्रथमः ॥

Colophon : Nil.

Subject: Vyāsasūtrasaṅgati available only up to I Adhyāya .

Remarks:—The Ms. is in good condition. The other work contained herein is Pūrvamīmāṁsākārikā or Citrapaṭa. For further detail see remarks under No. 6975

There is a transcript copy of this work in this library Vide. T. V, No. 296.

॥ शारीरकन्यायरक्षामणिः ॥

7115. SĀRĪRAKANYĀYARAKṢĀMAṆIḤ.

Burnell's Catalogue No. 9626. Page 87. Right column.

Substance—Palm leaf. Size—18¾×1½ inches. Leaves —148. Lines—13—15 to a Page. Script—Grantha. No. of Granthas —12000. Author—Appayyadikṣita. Complete. Printed.

Beginning:

उद्दाम्य × मुकुन्दः ॥ १ ॥

यस्याहुः × नमः शिवाय ॥ २ ॥

* * *

एनां पुराणपदवीमनुसृत्यसत्या.
मत्यादरेण महितैरनुपाल्यमानां ।
शारीरकाभरणभावजुषां नयानां
रक्षाकरं मणिमनाविलमुल्लिखामि ॥ ९ ॥

* *

अथातो ब्रह्मजिज्ञासा ॥ अत्र शास्त्रारम्भोपयोगिब्रह्मात्मैक्यलक्षणविषयप्रयोजनविरोधिनः कर्तृत्वादिबन्धस्य अध्यासात्मकत्वप्रदर्शनेन तदुभयोपपादनद्वारा शास्त्रारम्भस्समर्थ्यते ।

End:

सिद्धं ब्रह्म जगतो निमित्तमुपादानं चेति युक्तं ब्रह्मणो लक्षणम् ।

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्या-

जिश्रीरङ्गराजाध्वरिवरसूनोः अप्पयदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमस्याध्यायस्य चतुर्थः पादः ॥

Subject: Śārīrakanyāyarakṣāmaṇi a commentary on Brahmasūtrabhāṣya of Śaṅkarācārya. I; 1—4.

Remarks:—The Ms. is in a fairly good condition.

The Śārīrakanyāyarakṣāmaṇi of Appayyadīkṣita, like the many manuscripts of his other works is found incomplete. It runs up to the end of the I Adhyāya only. The work is an independent and brief exposition of the Brahmasūtras.

The work has been edited by the late Ganapati Śastrigal in the Advaita Mañjarī Series, Śrī Vidyā Press, Kumbhakonam.

॥ शारीरकन्यायरक्षामणिः ॥

7116. ŚĀRĪRAKANYĀYARAKṢĀMAṆIḤ.

Burnell's Catalogue No. 9652. Page 110. Right column.

Substance—Palm leaf. Size—17×1½ inches. Leaves—81. Lines—10 to a Page. Script—Grantha. No of Granthas—1600. Author—Appayyadīkṣita. Incomplete. Printed.

Beginning:

(अथातो ब्रह्मजिज्ञासा ॥) अत्र शास्त्रारम्भोपयोगिब्रह्मात्म्यैक्यलक्षणविषय प्रयोजनविरोधिनः कर्तृत्वादिबन्ध-

स्याध्यासात्मकत्वप्रदर्शनेन तदुभयोपपादनद्वारा शास्त्रारम्भः समर्थ्यते ।

End:

न च जीवस्य सदाऽहमिति भासमानत्वात् ‘कस्तम्मदामदं देवम्मदन्यो ज्ञातुमर्हति’ इत्यादिना प्रपञ्चितदुर्विज्ञानत्वमयुक्तमिति वाच्यं । अन्तःकरणविशिष्टरूपेण तस्य भासमान.... ।

Colophon: (Leaf No. 8)

इतिश्रीमत् + अप्पयदीक्षितस्य कृतौ न्यायरक्षामणौ प्रथमस्याध्यायस्य प्रथमः पादः ॥

Subject: **Śārīrakanyāyarakṣāmaṇi** an independent treatise on **Advaita** based on Brahmasūtras 1 & 2 Pādas of the **First Adhyāya.**

Remarks:– The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the second Pāda of the First Adhyāya.

Unfortunately Dr. Burnell could not identify this work and the next with No. 9326 which is the reason for some of his remarks made in his catalogue. There is no doubt about the title of the work and the author if colophons of the various Mss. are compared wherin the author gives clearly not only the title but also his name with parentage. The sneer of Dr. Burnell that the work contains the arguments used by Śaivas in explaining the Brahmasūtra—" is therefore unmerited.

॥ शारीरकन्यायरक्षामणिः ॥

7117. ŚĀRĪRAKANYĀYARAKṢĀMAṆIḤ.

Burnell's Catalogue No. 9653. Page 110. Right column. Substance—Palm leaf. Size—18¾ × 1½ inches. Leaves—76. Lines—6 to a Page. Script—Telugu. No. of Granthas—1600. Author—Appayadīkṣita. Incomplete. Printed.

Beginning, end, colophon and subject—Same as No. 7116.

Remarks:—The Ms. is in a fairly good condition.

॥ शारीरकन्यायरक्षामणिः ॥

7118. ŚĀRĪRAKANYĀYARAKṢĀMAṆIḤ.

J. L. Collection No. 105.

Substance—Palm leaf. Size—18½ × 1¼ inches. Leaves—109. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—3500. Author—Appayyadīkṣita. Incomplete. Printed.

Beginning:

अविघ्नमस्तु ॥

॥ अथातोब्रह्मजिज्ञासा ॥ अथ शास्त्रारम्भ०

Same as No. 7116.

End:

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥

यस्य पृथिवीशरीरमित्याद्याम्नानादिति वाच्यम् । त-

क्षादिषु स्वभोगायतनशरीरेणैव नियन्तृत्वदर्शनात् । एवञ्च य इमञ्चलोकं परञ्चलोकं सर्वाणि भूतानि योऽन्तरोयमयतीति परमोपक्रमेण एष त अन्तर्याम्यमृत इत्युपसंहारेण च ।

Colophon: (Leaf No. 78)

इति प्रथमाध्यायस्य प्रथमः पादः

Subject: Nyāyarakṣāmaṇi 1 & 2 Pādas of the first Adhyāya.

Remarks:—The Ms. is in a fairly good condition.

॥ शारीरकमीमांसान्यायसंग्रहः ॥

7119. ŚĀRĪRAKAMĪMĀMSĀNYĀYA-SAṄGRAHAH.

Burnell's Catalogue No. 9685. Page 88. Left column. Substance—Palm leaf. Size—18¼ × 1¼ inches. Leaves—29. Lines—12 to a page. Script—Grantha. No. of Granthas—1400. Author—Prakāśātmamuni. Complete. Not printed.

Beginning:

प्रणम्य प्रणतार्तीनां हन्तारं विष्णुमव्ययम् ।
शारीरकस्य संक्षेपात्क्रियते न्यायसंग्रहः ॥

अथातो ब्रह्मजिज्ञासा । अत्र विधिः खलु सर्वत्र विशिष्टाधिकार्यन्यतोऽप्राप्तविषयतत्साध्यफलानुबन्धत्रयमपेक्ष्यप्रवृत्तिपर्यन्तो भवति । यजेतेत्यादि विधिवदिति

न्यायेन। बन्धविश्लेषनिमित्तब्रह्मात्मानुभवस्य केवलदृष्टसाधनसाध्यत्वाभावत्वस्य वक्ष्यमाणत्वात् तत्साधनवेदान्तवाक्यविचारविधावनुबन्धः विधेरपि....न्यः।

तत्र कर्तृत्वभोक्तृत्वतच्छक्तिलक्षणस्य आत्मनि वन्धस्यापरमार्थसत्यतया ब्रह्मात्मानुभवानिरस्यत्वासंभवेन फलानुबन्धाभावात्।

* *

शास्त्रारम्भोदर्शितः ॥

End:

अत एव दूषयितुमशक्यम्। अदूषणत्वात् अप्राप्तेश्च स्वरूपमङ्गीकृत्य धर्मान्तरदूषणसाधनेऽपि तथा। तस्मात्कार्यब्रह्मप्राप्तिः सगुणविद्याविपाकोऽयमिति।

Colophon:

इति शारीरकमीमांसान्यायसंग्रहे प्रकाशात्मविरचिते
चतुर्थस्याध्यायस्य चतुर्थः पादः ॥
समाप्तश्चाध्यायः ॥

शारीरकाणां न्यायानां सप्तन्यूनशतद्वयम्।
प्रकाशात्मयतीन्द्रेण निर्णीतं न्यायवेदिना ॥

Subject: Śārīrakamīmāṁsānyāyasaṅgraha, an exposition of the 193 Nyāyas involved in the interpretation of the Brahmasūtras. It also gives the substance of Brahmasūtras in accordance with Śaṅkara's Bhāṣya

Remarks:—The Ms. is in good condition. It has been transcribed in the library. Vide T. V. No. 410. For detailes see No. 6353.

॥ शारीरकमीमांसाशास्त्रम् ॥

7120. ŚĀRĪRAKAMĪMĀMSĀŚĀSTRAM.

Burnell's Catalogue No. 9834 f. Page Left column. **Substance**—Palm leaf. Size—16 × 1½ inches. **Leaves**—7 (71-77). Lines—6 to a Page. Script—Telugu. No. of Granthas—140. Author—?. Incomplete. Not printed.

Beginning:

श्रीमीनाक्षीसुन्दरेश्वराभ्यां नमः ॥ हरिः ओं ॥

ओङ्काराख्यमनन्तमेकमभयं संसाररोगापहं
सत्यज्ञानसुखस्वरूपममृतं सर्वज्ञमूर्तिं प्रभुम् ।
विश्वातीतमनन्तवैभवयुतं यं द्वादशान्तस्थितं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १ ॥
यस्माद्ब्रह्म हरीश्वरादि जगतां संभूतिरुक्ताश्रुतौ
यस्याज्ञापरिपालनैकनिरताः सर्वे च लोकेश्वराः ।
यत्पादाब्जमनन्तसौख्यजनकं नित्यं भजन्ते मुदा
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ २ ॥
यन्निश्वाससमुद्भवाः स्युरखिलावेदाश्च साङ्गास्तथा
विद्याभारतसूत्रजालनिकराः साङ्ख्याः पुराणानि च ।

विश्वोत्तीर्णमहाविभूतिसहितं सर्वात्मविद्याप्रदं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ३ ॥

यस्यानन्तचिदात्मशक्तिजनिता(मु)क्त्यादिशक्त्यादिका
याभिर्विश्वमिदं ततं हि सकलं ताभिः समेतेश्वरैः ।
शक्तीनां तमधिष्ठितं च जगतां संप्रेरकं त्वां प्रभो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ४ ॥

यत्पादाब्जमनेक(जन्म)जनितानन्ताघसंहारकं
स्मर्तॄणां सकृदेव सत्यवरदं ब्रह्मेन्द्रविष्ण्वादिभिः ।
नित्यं पूजितमद्वितीयमभवद्वेदान्तमानैस्तुतं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ५ ॥

यन्नामस्मरणेनमूढमतयो ये ते महान्तोऽभवन्
ब्रह्मेन्द्रादिसुरेश्वरैरपि सदा संपूज्यपादाम्बुजः ।
शम्भोर्दिव्यपदे हि सत्यविभवा(स्सर्वे) समेताश्रये
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६ ॥

यन्नामश्रवणं प्रशान्तमतयः कुर्वन्ति नित्यं जना
भक्त्या ये परमेशदिव्यकृपया युक्ताः कृतार्थाश्च ते ।
सायुज्यं पदमापुरस्य परमं शुद्धं प्रबोधात्प्रभो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ७ ॥

सर्वोत्कृष्टमनुत्तमात्मवरदं सत्कीर्तियुक्तं सदा
यस्यैवामलदिव्यनाम मनुजाः सङ्कीर्तयन्त्याशु ते ।

मुक्ताः पातककोटिजालनिगलैः शृण्वन्ति ये वा सकृ-
न्मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ८ ॥

तेषां किंकरतामुपैति कमला वाणी च जिह्वास्थिता
नित्यं भाति यदात्मनाम परमं संकीर्तयन्त्यादरात् ।
शम्भोर्यान्ति परं पदं च सहसा यद्वै पदानां परं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ९ ॥

शम्भो शङ्कर देवदेव भगवन् श्रीरुद्र सर्वात्मक
ब्रह्मानन्तशशाङ्कशेखरविभो शूलिन् कपर्दीनिति ।
ये नित्यं परिकीर्तयन्ति मनुजास्ते सत्यमीशात्मका
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १० ॥

End:

॥ प्राणस्तथानुगमात् ॥

वक्ताहीन्द्र स्वकीयं वपुरिहाविमलं सेव्यरूपं विवक्ति
त्वं मां जानीहि नित्यं त्विति न हि भगवान् सत्यबोधैकरूपः ।
वक्ता नान्योऽस्ति देहस्त्विति विदुरमृतं यं महेशं हि केचि-
न्मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६३ ॥

शम्भोः सर्वात्मनोऽस्मिन् बहुतरविमलाः संप्रगीता गुणाः स्यु-
स्सेवाधारत्वपूर्वास्तत इव भगवानीश्वरेशः प्रगीतः ।
नास्मादर्वाक्प्रजातः सुरपतिरिति यं प्राहुरात्मैकनिष्ठा
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६४ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभू-
मा ह्यस्मिन् ॥

इन्द्रः स्वात्मानमीशं सुखतनुममृतं सर्वभावाद्यतीतं
शुद्धं बुद्धं प्रशान्तं शिवमहमिति तं शास्त्रदृष्ट्योपदेशम् ।
कृत्वा शम्भोः प्रबोधादयमिह विलयं स्यादितीशं यमाहु-
र्मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६५ ॥

यद्वैतद्वामदेवः परशिवमहमित्यात्मरूपं विदित्वा
सर्वात्मत्वं स्वकीयं परमिति भगवान् प्राह चैवं सुरेन्द्रः ।
तस्मात्सर्वात्मकोऽयं पशुपतिरिह वै गीयते यो महान्तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६६ ॥

वायोर्जीवस्य लिङ्गं श्रुतमिह बहुशो नैव सर्वेश लिङ्ग
तस्मात्प्राणात्मनोर्यत्पलमपि विमलं संप्रबोधात्प्रया.... ।
प्राणः प्रज्ञात्मकोऽयं त्विति विदुरपरे प्राहुरत्रोत्तरं यं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६७ ॥

नैतद्युक्तं त्रिधैतत्फलमपि भजनं संपसथत(?)यस्मा-
देकं वाक्यं सदैतत्परशिवविषयं प्राह चैकं महान्तम् ।
लिङ्गैः षड्भिः प्रशस्तैः स्मृतिपराविषयैः प्राण ईशस्तथोक्तो
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६८ ॥

यस्मिन्विश्वं समस्तं जडमिदमजडं भाति सत्येऽद्वितीये
नित्यं यद्बोधमात्राल्लयमिह विदुषः कर्मवृन्दं प्रयाति ।

प्राणाख्यं सत्यबोधं सममिममभृतं सर्वलोकेश्वरेशं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ ६९ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नो·
पासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ श्रीः ॥

॥ सर्वत्रप्रसिद्धोपदेशात् ॥

विश्वं सर्वं यदेतत्परमिह विमलं ब्रह्म यस्मात्प्रजातं
यस्मिन् लीनं प्रकृष्टं यणपरनिकरैः(?)सर्वकामादिभिस्तैः ।
युक्तं वेदान्तवर्येष्वनितरविषयं स्वात्मरूपं हृदिस्थं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १ ॥

॥ विवक्षितगुणानुपपात्तिश्च ॥

सत्योपादेयरूपाः परसुखजनकाः सत्यसङ्कल्पपूर्वा॰
शुद्धाः सर्वे गुणास्ते परशिवभगवंस्त्वय्यनन्ते स्थिताः स्युः ।
युक्तस्तैस्त्वं महद्भिः पुनरिह जगतां स्वात्मरूपं प्रशान्तं
मीनाक्ष्या शिवया समेतमुमया श्रीसुन्दरेशं भजे ॥ १ ॥

Colophon: (Leaf No. 77)

इति श्रीशारीरकमीमांसाशास्त्रे प्रथमाध्याये प्रथमः पादः ।
तदर्थः सङ्ग्रहश्लोकैः प्रदर्शितः ॥

Subject: Śārīrakamīmāṃsāśāstra a metrical summary of Brahmasūtras.

Remarks;—The Ms. is in good condition. We do not have the Saṅgraha Ślokas to the last Sūtra of the first pāda. After

the colophon we find the first 2 sūtras of Pāda 2, Adhyāya 1, with their 2 Saṅgraha Ślokas.

The other works contained herein are:—

		Leaves
1.	Vākyasudhā	1—18
2.	Vākyavṛtti	1—4
3.	Dṛkdṛśyaviveka	4—7
4.	Bhikṣvaṣṭaka	1
5.	Some maṅgalaślokas from the works of Nṛsimhāśramin with commentary.	9
6.	Jivabrahmābheda	14

(386—399)

This work is a metrical resume on the Brahmasūtras, in the style of a stuti on Sundereśa, the presiding diety at Madura. The sutra is given and its meaning brought out in one or more Śārdūlavikrīdita or Sragdharā verses.

The Ms. stops with sūtra 2 of Pāda 2, in the first Adhyāya. The author of this work is not known.

॥ संक्षेपशारीरकम् ॥

7121. SAṄKṢEPAŚĀRĪRAKAM.

Burnell's Catalogue No. 6243. Page 88. Left column. Substance—Paper. Size—11¾×4 inches. Sheets—(24+14+18+60). Lines—12-13 to a Page. Script—Devanāgarī. No. of Granthas—2180. Author—Sarvajñātmamuni. Complete. Printed.

Beginning:

श्रीगणेशाय नमः

सत्यं ज्ञानमनन्तमद्वयसुखं यद्ब्रह्मगत्वा गुरुं
मत्वा लब्धसमाधिभिर्मुनिवरैर्मोक्षाय साक्षात्कृतम् ।
जातं नन्दतपोबलात्तदखिलानन्दाय बृन्दावने
वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम् ॥

* *

अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धं ।
अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवामि ॥ ६ ॥

* *

स्वाध्यायवन्नकरणं घटते विचारो
नाप्यङ्गमस्य परमात्मधियः प्रसूतौ ।
सापेक्षता पतति वेदगिरस्तथात्वे
ब्रह्मात्मनः प्रमितिजन्मनि तन्न युक्तम् ॥ १८ ॥

End:

श्रीदेवेश्वरपादपङ्कजरजस्संपर्कपूताश्रयः
सर्वज्ञात्मगिराङ्कितो मुनिवरस्सङ्क्षेपशारीरकम् ।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंश्ये नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥ ६२ ॥

भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने ।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥ ६३ ॥

Colophon:

इति श्रीसर्वज्ञात्ममुनिविरचिने संक्षेपशारीरके चतुर्थोऽध्यायः।

समाप्तश्चायं ग्रन्थः ॥

(at the end of Adh. 1.)

इति श्रीदेवेश्वरपूज्यपादशिष्य श्रीमत्परमहंसपरिव्राजकाचार्य सर्वज्ञात्मयतिमहामुनिविरचितायां शारीरकमीमांसायां संक्षेपशारीरकाख्यायां प्रथमोऽध्यायः ।

श्रीसर्वज्ञात्ममुनिना भाष्यकारानुसारिणा ।
रचितं यत्प्रकरणं बालव्युत्पत्तिसिद्धये ॥

बालकृष्णेन मुनिना लिखितं शिवतुष्टये ।
तस्मान्मोक्षेच्छुभिस्सर्वैर्वीक्षणीयं मुहुर्मुहुः ॥

Subject: Saṅkṣepaśārīraka; 1-4 Adhyāyas, a metrical treatise dealing with Advaita Vedānta.

Remarks:—The Ms. is in a fairly good condition. And each Adhyāya is separately tied up. The scribe has given a few verses of Madhusūdana Sarasvati in the beginning.

On the title page is given—

हे पुस्तक + काशीदेशाहून खरिदीकरून आणिलें अस्सें ।

After the colophon of the 4th chapter, there is one sheet containing the first few verses of the Gītagovinda and some other stray verses.

The author of the Saṅkṣepaśārīraka, a metrical summary of the Śaṅkara Bhāṣya in 4 chapters, is Śrī Sarvajñātman, a pupil of Śrī Sureśvarācārya, the Vārttikakāra. The penultimate verse, above given gives that the author wrote this work in the time of a king called Manukulāditya.

The work has been published in the Kāśi (Haridāsa) Sanskrit Series, Benares, and Anandaśrama series, Poona with some commentaries. This is one of the early works on Advaita Vedānta.

SAṄKṢEPAŚĀRĪRAKA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7122	B. L. 9631	Plam leaf.	16¼×1⅜	104	8-5	Telugu.	Complete.
7123	„ 9632	„	15×1¼	67 (210-276)	9	Grantha.	„
7124	S. S. 80	Paper.	12×5	52	14	Devanāgarī.	„
7125	„ 31 a.	„	13½×7	11 (1-11)	16-18	„	„
7126	J. L. 955	„	11×4¾	72	10	„	„

DETAILED REMARKS
on the
MSS. CONTAINED IN THE ABOVE TABLE.

7122 The other work contained herein is Saṅkṣepaśārīraka-vyākhyā.

॥ संक्षेपशारीरकव्याख्या—तत्त्वबोधिनी ॥

7127. SAṄKṢEPAŚĀRĪRAKAVYĀKHYĀ—TATTVABODHINĪ.

S. S. Collection No. 31 b.

Subtance—Paper. Size—13½ × 7 inches. Sheets—60 (11-70). Lines—16-18 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Nṛsiṃhāśramin. Incomplete. Not printed.

Beginning:

यदज्ञानात्कर्तागतितदितराभ्यां परवशो
न कुत्रापि स्वास्थ्यं भजति परिशुद्धो नरहरेः ।
निरस्तद्वैतस्यानवधिसुखाचिक्लृत्य(?)त्वपुषः
पदं कर्मप्रासाद्यशुचिरहं नौमि तदिदम् ॥

एवं प्रथमाध्यायोपदर्शिताद्वैतासङ्गब्रह्मात्मसमन्वयः द्वितीयाध्यायेन प्रत्यक्षादिमानान्तरविरोधनिरासमुखेन उपपत्त्या संभावितः सम्प्रति सम्भावितसमन्वयसमुपजातनिरुपसर्गब्रह्मात्म्यैक्यबुद्धेः फलपर्यन्ततायै अपेक्षितं साध-

नकलापं बुभुत्सोः शिष्यस्य प्रश्नमवतारयति श्रुत्वेति ॥

अविरोधं प्रत्यक्षाद्यविरोधं, अद्वैतसमन्वयस्येति शेषः ॥

End:

इदानीं मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते बहुमङ्गला ग्रन्थाः फलाय भवन्तीति न्यायेन मध्येपि हरिशङ्करादिपदग्रहणेन मङ्गलं सिद्धवत्कृत्यान्तेपि विष्णुं नमस्कुरुते । भुजङ्गमेति । शेषभोगशायिने विहङ्गमाङ्गगामिने तुरङ्गमाङ्गभेदिने केशिसंज्ञकासुरसंहर्त्रे रथाङ्गधारिणे चक्रधारिणे श्रीविष्णवे नमः । नमस्कारोस्त्वति ॥

यज्जिज्ञासा मुमुक्षोर्हितसमफलदा यस्य चिह्नं विवर्त्ते(?)
विश्वाख्यो यश्श्रुतीनां श्वसनपवनवद्योनिराम्नायराशेः ।
तात्पर्येण प्रवृत्तिर्यत इममखिलं ज्योतिषां ज्योतिरात्मा
गृह्णातु श्रीनृसिंहः स तु शुभमशुभं वा बलिं वाङ्मयं मे ॥

श्रीमज्जगन्नाथगुरोरनुग्रहः
प्रविश्य मां योजयदत्र कर्मणि ।
अतो ग्रहग्रस्तमनुष्यवन्मम
प्रवृत्तिरेषेति बुधाः क्षमध्वम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमश्रीचरणपरिचरणप्राप्तविद्य निखिलविद्वज्जनमनोहर श्रीमन्नृसिंहाश्रम श्रीचरणविर-

वितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिनीस-
माख्यायां फलाख्यश्चतुर्थोऽध्यायः ॥

समाप्तं संक्षेपशारीरकव्याख्यानम् ॥

Subject: Saṅkṣepaśārīrakavyākhyā—Tattvabodhinī. Adhyāyas 3 and 4 only. A critical summary of Śaṅkara Bhāṣya.

Remarks: —The Ms. is in a fairly good condition. The other work contained herein is संक्षेपशारीरकम् ॥

The author is a desciple of Jagannādhāśramin and wrote many works on Vedānta. Advaitadīpika, Bhedadhikkāra, and Vedāntatattvaviveka are chief of them. All the three are published in Benares. It is yet to be determimd if this author is the same as the famous author of Dīpikās on 28 Atharvaṇopaniṣads.

॥ संक्षेपशारीरकव्याख्या—सिद्धान्तदीपः ॥

7128. SAṄKṢEPAŚĀRĪRAKAVYĀKHYĀ—
SIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 9633. Page 88. Left column. Substance—Palm leaf. Size—15⅓ × 1¼ inches. Leaves—209 (67-70 missing). Lines—6-8 to a Page. Script—Grantha. No. of Granthas—6000. Author—Viśvaveda. Complete. Not printed.

Beginning:

(यस्मादर्थ)चतुष्टयं त्रिजगतामव्याहतं वर्तते
पित्रोराद्यकुटुम्बिनोस्समुदयता लोच्याच या सन्ततिः(?) ।

....

श्रीमद्ढुण्डिविनायकस्स दिशताद्दिव्यान्यभीष्टानि नः ॥ १ ॥

यद्वाग्वज्रनिपातरुग्णगतयो वादीन्द्रशैला मुहुः
यत्पादाम्बुजरेणवः प्रतिगता निर्वाणपाथेयतां ।
....साध्यसमाश्रयं गुणगणैस्सामग्र्यमासादितं
तान्नित्यं प्रणतोऽस्मि पूर्णकरुणानानन्ददेवान्गुरून् ॥ २ ॥

* * *

श्रीमच्छारीरकार्थाविष्करणाय ग्रन्थमारिप्सुराचार्य इष्टदेवतातत्त्वानुस्मरणलक्षणमङ्गलमाचरन् तद्विषयं ग्रन्थारम्भे प्रतिजानीते— अनृतेति ॥

End:

प्रारब्धां कृतिमुपसंहरति—संक्षेपशारीरकमिति । एतां च कृतिं भगवति समर्पयन् तस्याः मङ्गलं प्रार्थ्य अविरपैति । कृतेर्हि माङ्गल्यं नाम.... ।

* *

ग्रन्थस्य सांप्रदायिकत्वं दर्शयितुं गुरोः कर्तुश्च नाम निर्दिशति कालविशेषं च— श्रीदेवेश्वरेति । * *

* * *

यद्वेद....प्रणिहितमनसां शान्तमायाविलासं
पूर्णं तत्सच्चिदात्माद्वयमुखवपुषं माधवं संश्रयेम ॥

यद्दीयपदांबुसमाश्रयान्नो
विलीयते मोह........बोधः ।
सच्चित्सुखं मुक्तिफलं प्रयाता-
स्तेऽद्यापि मच्चित्तमलं पुनन्तु ॥

व्यासौ स(?) शम्भोश्चिन्मयीं शक्तिमाद्यां
ज्योत्स्ना वेन्दोरुष्णतापाविनाशैः ।
प्रीत्यै तस्याः कल्पितोऽयं भवान्याः
........भातु सिद्धान्तदीपः ॥

Colophon:

इति आनन्ददेवशिष्यविश्ववेदविरचिते सङ्क्षेपशारीरकव्याख्याने सिद्धान्तदीपे चतुर्थोऽध्यायस्समाप्तः ॥

हरिः ॐ श्रीगुरुभ्यो नमः ॥

Subject: Saṅkṣepaśārīrakavyākhyā, called Siddhāntadīpa.

Remarks:—The Ms. is in a fairly good condition.

Viśvaveda, the author of this commentary on the Saṅkṣepaśārīraka is the pupil of Ānandadeva. Nothing more is known of him. This is a rare work which this library has.

॥ संक्षेपशारीरकव्याख्या—सिद्धान्तदीपः ॥

7129. SAṄKṢEPAŚĀRĪRAKAVYĀKHYĀ—SIDDHĀNTADĪPAḤ.

Burnell's Catalogue No. 963l. **Page** 88. Left column.
Substance—Palm leaf. Size—16 × 1½ inches. Leaves

—214 (71-80 are missing one 218). Lines—5 to a Page. Script—Telugu. No. of Granthas—6000. Author—Viśvaveda. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No 7128.

Remarks:—The Ms. is in a fairly good condition.

॥ अधिकरणरत्नमाला ॥

7130. ADHIKARAṆARATNAMĀLĀ.

Burnell's Catalogue No. 6254. Page 88. Left column. Substance—Paper. Size—9×5 inches. Sheets—119. Lines—10-11 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Bhāratītīrtha. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ।

श्रीसरस्वत्यै नमः ॥

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं ।
वैयासिकन्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥ १ ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टदेवतातत्त्वं गुरुमूर्त्युपाधियुक्तं नमस्कृत्य स्वग्रन्थं प्रतिजानीते प्रणम्येति ॥

End:

जगत्स्रष्टृत्वमस्त्येषां योगिनामथ नास्ति वा ।
अस्ति स्वाराज्यमाप्नोतीत्युक्तैश्वर्यानवग्रहात् ।

* *

तस्माज्जगत्स्रष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोः तेषां स्वातन्त्र्यमस्तीति अशेषं मंगलम् ॥

Colophon:

इति श्रीमत्परिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायां अधिकरणरत्नमालायां चतुर्थाध्यायस्य चतुर्थ पादः समाप्तः । अधीकर्त्वेश(?) दत्तात्रेयात्मज वासुदेववेदान्तीत्याच शके १५६९ माघमासे सोमवारत्यादिवसि लिखलि हे स च परमेश्वरार्पणमस्तु । १०९१ सूत्र अधिकरण........ ॥

Subject: Adhikaraṇaratnamālā, a summary of the adhikaraṇas or topical subdivisions of the Vedāntasūtras.

Remarks:—The Ms. is in a fairly good condition.

पुनरधिकरणरत्नमाला पुस्तकं तुळजामहाराजस्येदं ॥

This work is otherwise known as Vaiyāsikanyāyamālā or Adikaraṇamālikā and is publishsd at Poona by Viṣṇu Vaman Bapat. This is a metrical exposition of the various adhikaraṇas into which the Bṛhmasūtras are divided, The Ms. belongs to one Vāsudevavedanti and is dated A. D. 1647.

ADHIKARAṆA RATNAMĀLĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete. or otherwise.
7181	B. L. 6255	Paper.	9½×4	184	5	Devanāgarī.	Complete.
7182	„ 6272	„	11¾×4⅛	62	15	„	„
7183	„ 9699 a.	Śrī Tāla.	8¼×2	193	11-12	Grantha.	„
7184	„ 9774	Palm leaf.	18½×1½	79	7	Telugu.	„
7185	„ 9775	„	19½×1½	80	12-13	Devanāgarī.	„
7186	S. K. 134	Paper.	11×4	98	15	„	„

DETAILED REMARKS
on the
MSS. IN THE ABOVE TABLE.

7131 On the title page is given—

उमापतिपण्डितानाम् ।

7132 After the colophon is given—

भारतीतीर्थमुनिना बालकृष्णेन भिक्षुणा ।
रचितेयं न्यायमाला लिखिता शिवतुष्टये ॥

मार्गे मार्गे नूतनं चूतखण्डं खण्डे खण्डे कोकिलानां विरावः ।
रावे रावे मानिनीमानभङ्गः भङ्गे भङ्गे मन्मथः पञ्चबाणः ॥

मार्गे मार्गे निर्मलं साधुवृन्दं वृन्दे वृन्दे तत्त्वचिन्तानुवादः ।
वादे वादे जायते तत्त्वबोधो बोधेबोधे भासते चन्द्रचूडः ॥

हे पुस्तक शरभोजि + काशीदेशाहून + आणिलें अस्सें ॥

7133 After the colophon is given—

अयं ग्रन्थः सीतारामभारतीलिखितः ॥
प्रमादीचवत्सरे मिथुनगभानौ स्थिरे सिते पक्षे ।
अधिकरणरत्नमालां सीतारामोऽलिखद्द्वितीयायाम् ॥

At the beginning we have a leaf giving the Adhikaraṇa-sūtras only. The other works contained herein are—

b. Skandopaniṣad vide No. 1193.
c. Praṇavopaniṣad ,, No. 1140.

7134 After the colophon is given—

एतानि सर्वाण्युत्तरमीमांसाधिकरणानि द्व्यधिकनवत्युत्तरशतसंख्याकानि (192) and a loose verse.

7196 After the colophon is given—

बेलगांवकर महादेवभट्टपुत्रेण सदाशिवेन लिखितो ग्रन्थः ।
प्लवङ्गसंवत्सरे आश्विनकृष्णपक्षनवम्यां स्थिरवासरे समाप्तिमगात् ।

शेषभट्टसुधीपुत्रबालभट्टेन धीमता ।
द्रव्यैस्संपादितमिदं जगज्जानातु पुस्तकम् ॥

॥ अद्वैतम् ॥

ADVAITAM.

२ शंकराचार्यकृतप्रकरणानि तद्व्याख्यानानि ॥

II. Minor works of Śaṅkara and the Commentaries thereon.

॥ अद्वैतपञ्चरत्नम् ॥

7137. ADVAITAPAÑCARATNAM.

Burnell's Catalogue No. 9858 d. Page. Right column. Substance—Palm leaf. Size—11½×1¼ inches. Leaves—1 (last leaf). Lines—6 to a Page. Script—Grantha. No. of Granthas—10. Author—Śrī Śaṅkarācārya. Complete. Printed.

Beginning:

नाहं देहो जन्ममृत्यू कुतो मे
नाहं प्राणः क्षुत्पिपासे कुतो मे ।
नाहं चेतः शोकमोहौ कुतो मे
नाहं कर्ता बन्धमोक्षौ कुतो मे ॥ १ ॥

नाहं कर्ता कारयिता वा न कार्यम्
नाहं भोक्ता भोजयिता वा न भोज्यम् ।
नाहं दुःखी दुःखयिता वा न दुःखम्
सोहं प्रत्यक् चित्सुखोऽहं परात्मा ॥ २ ॥

End:

मत्तो नान्यत्किञ्चिदस्यास्ति दृश्यं
सर्वं बाह्यं वस्तु मायोपक्लृप्तम् ।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वैते भाति तस्मै शिवोऽहम् ॥

सर्वोपप्लवरहितः विज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ॥ ७ ॥

Colophon: Nil

Subject: Advaitapañcaratnam otherwise known as Anubhavapañcaratnam.

Remarks:—The Ms. is in good condition. The works contained herein are:—

1 स्वानुभूतिप्रकाशिका
2 परमहंसचर्या
3 शुकाष्टकम्
4 द्वादशमञ्जरिका
5 पञ्चरत्नम्

After the colophon are to be seen the first 2 verses of the Upadeśapañcaratna of Śrī Śaṅkara.

The work has appeared in the Sri Vāṇī Vilās edition of the complete works of Śrī Śaṅkara, under the title, अद्वैतपञ्चरत्नम्। The first 2 verses in this Ms., which make the poem a सप्तक are not to be seen in the printed text.

ADVAITAPAÑCARATNAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7138	B. L. 8964	Paper.	7⅛ × 8⅞	1	18	Devanāgarī.	Complete.
7139	,, 15566 d	Palm leaf.	15¾ × 1½	?	6	Telugu.	,,
7140	J. L. 956 a	Paper.	11½ × 4¾	1 (1st)	7	Devanāgarī.	,,
7141	T. S. 132 b	,,	9½ × 4	2	8	,,	,,
7142	S. K. 138	,,	8 × 4½	1	8	,,	,,

DETAILED REMARKS
on the
MSS. OF ADVAITAPAÑCARATNAM.

7139 For the other works contained herein see remarks under No. 7257. This Ms. contains nine additional verses.

7140 The works contained herein are

1 अद्वैतपञ्चरत्नम्
2 साधनपञ्चरत्नम्
3 हस्तामलकश्लोकाः
4 द्वादशमञ्जरिकास्तोत्रम्
5 मनीषापञ्चकम्
6 दशश्लोकी

7141 The other works contained herein are

1. Pañcaratna. × × × ×
2. Loose Vedantic verses.

7142 The other work contained herein is वैराग्यपञ्चकम्. The last line is ' शेषभट्टात्मजबालाख्यस्य '

॥ अद्वैतरसमञ्जरी ॥

7143. ADVAITARASAMAÑJARĪ.

S. K. Collection No. 136.

Substance—Paper. Size—$5\frac{1}{2} \times 8\frac{3}{4}$ inches. Sheets—12. Lines—5 to a Page. Script—Devanāgarī. No. of

Granthas—40. Author—Śaṅkarācārya. Complete ? Printed.

Beginning:

श्रीगणेशाय नमः ॥

अद्वैतमेव परमार्थतया विवेक्तुं
अङ्गीकृतद्विपनराकृतिसन्निवेशः ।
अद्वैतगोचरमशेषविशेषमन्त-
राविष्करोतु वरदो मम विघ्नराजः ॥ १ ॥

अध्यासविस्फुरदनेकविधात्मभेद-
मज्ञानमाश्रितवतस्सुलभा न मुक्तिः ।
आदर्शगेहमभितः प्रतिबिम्बितान्त-
द्वीरङ्गतस्य न बहिर्गतिरर्थकस्य ॥ २ ॥

End:

न निरोधो न चोत्पत्तिर्नबन्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ४५ ॥
आर्यता हृद्यता मैत्री सौम्यता समता ज्ञता ।
समाश्रयन्ति तान्नित्यमन्तःपुरमिवाङ्गनाः ॥ ४६ ॥

Colophon:

अद्वैतरसमञ्जरी सम्पूर्णा ॥

Subject: Advaitarasamañjarī a short treatise explaining the Advaitic principles with an illustration in each verse.

Remarks:—The Ms. is in a decaying condition.

This Ms. has been copied in the library vide T. V. No. 462.

This work is printed in Śri Vānī Vilās Press, Srirangam with a commentary.

॥ अद्वैतरसमञ्जरीव्याख्या ॥

7144. ADVAITARASAMAÑJARĪVYĀKHYĀ.

S. S. Collection No. 143.

Substance—Palm leaf. Size—9¼ × 1½ **inches**. Leaves—29. Lines—8 to a Page. Script—Grantha. No. of Granthas—500. Author—?. Incomplete. Not printed.

Beginning:

तस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय प्रचयगमनाय च प्रत्यूहनामक श्रीलम्बोदरन(मस्कार)रूपमंगलमाचरन्नेव स्वस्य ग्रथनोपयोगिशास्त्रार्थप्रतिपत्ति प्रार्थ... अद्वैतमिति ॥

* *

वरद इति साभिप्रायं वि(शेषणं) ।

End:

अभ्युक्षितेति । तदुक्तं ।

'आर्यता हृद्यता मैत्री सौम्यता समता ज्ञता ।
समाश्रयन्ति तन्नित्यं अन्तःपुरमिवाङ्गनाः ॥

इदानीं समस्ताध्यात्मशास्त्रसिद्धान्तसम्प्रदायरहस्य-

माह । अज्ञानमिति । अज्ञानं वस्तुगत्या ब्रह्मव्यतिरिक्तमास्त्येव । तस्याधारोऽपि तत्त्वेनानिर्वचनीयत्वात् तदभावादेव तत्कार्यत्वेनाभिमतस्य प्रपञ्चस्य प्रसक्तिरेव नास्ति । कारणाभावेन कार्यानुदयात् । अत एव जीवेश्वरा .... कल्पा न सम्भवन्ति । तस्मात्प्रपञ्चविलक्षणं सत्यज्ञानानन्दलक्षणं........ ।

Colophon: Nil.

Subject: Advaitarasamañjarīvyākhyā.

Remarks:—The Ms. is in a decaying condition.

॥ अद्वैतानुभूतिः ॥

7145. ADVAITĀNUBHŪTIḤ.

Burnell's Catalogue No. 6360. Page 90. Left column.

Substance—Paper. Size—4½ × 3⅜ inches. Sheets—14. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—98. **Author—Śaṅkarācārya. Complete. Printed.**

Beginning:

श्रीलक्ष्मीनृसिंहाय नमः ॥

सर्गस्थितिप्रलयहेतुमाचिन्त्यशक्तिं
विश्वेश्वरं विदितविश्वमनन्तमूर्तिं ।
निर्मुक्तबन्धनमपारसुखांबुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥

अहमानन्दसत्यादिलक्षणः केवलः शिवः ।
सदानन्दादिरूपं यच्चेनाहमचलोऽद्वयः ॥ १ ॥

End:

विश्वादिकं त्रयं यस्मिन् परमात्मनि सत्यवत् ।
स एव परमात्माहं विश्वादिक विलक्षणम् ॥ ५ ॥
विराडादित्रयं भाति यस्मिन्साक्षिणि सत्यवत् ।
स एव सच्चिदानन्दलक्षणोऽयं स्वयंप्रभः ॥ ८६ ॥

Colophon:

इत्यद्वैतानुभूतिः ॥

Subject: Advaitānubhūti.

Remarks:—The manuscript is in good condition.

This minor work of Śaṅkara has been published in the Śrī Vāni Vilās edition of the complete works of Śrī Śaṅkara.

A loose verse is given at the beginning by the scribe.

॥ अद्वैतानुभूतिः ॥

7146. ADVAITĀNUBHŪTIḤ.

Burnell's Catalogue No. 6361. Page 93. Left column. Substance—Paper. Size—6$\frac{7}{8}$ × 3$\frac{1}{2}$ inches. Sheets—4. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—.8. Author—Śaṅkarācārya. Complete. Printed.

Beginning, end, colophon and subject—Same as 7145.

Remarks:—The Ms. is in a fairly good condition.

॥ अद्वैतानुभूतिः ॥

7147. ADVAITĀNUBHŪTIḤ.

Not noticed by Burnell. Ms. 14751 c.

Substance—Paper. Size—9½ × 4⅞ inches. Sheets—8 (7-9). Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—Śaṅkarācārya. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7145.

Remarks:—The Ms. is in a decaying condition. The works contained herein are :—

1 दशश्लोकी ।

2 अनुभूतिरत्नमाला ।

3 अद्वैतानुभूतिः ।

4 अद्वैतमकरन्दः ।

5 सूतगीताव्याख्या ॥

॥ अद्वैतानुभूतिः ॥

7148. ADVAITĀNUBHŪTIḤ.

S. S. Collection No. 39.

Substance—Paper. Size—8½ × 4½ inches. Sheets—6. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—98. Author—Śaṅkarācārya. Complete. Printed.

Beginning, end and subject—Same as No. 7145.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य गोविन्दभगवत्पादशिष्य श्रीमच्छङ्करभगवत्पादविरचिता अद्वैतानुभूतिस्समाप्ता ॥

Remarks:—The Ms. is in a fairly good condition.

॥ अध्यात्मविद्योपदेशविधिः ॥

7149. ADHYĀTMAVIDYOPADEŚAVIDHIḤ.

Burnell's Catalogue No. 6490 a. Page 97. Left column. Substance—Paper. Size—$8\frac{1}{2} \times 4\frac{1}{8}$ inches. Sheets—18 (8-21). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya. Incomplete. Not printed.

Beginning:

(गगनार)विन्दमसत् । तस्य सुरभित्वं कुतः । अतः असंभावनीया । अरे साधु साधु अरे आत्माविवेकभ्रममात्रसिद्धम् । यद्भ्रममात्रसिद्धं तत्किं सत्यं यथेंद्रजाले पश्यति जनः । ‘न्याघ्रो जलभुरगं सत्यं तथा न प्रतिभाति किं । इन्द्रजालभ्रपनिवृत्तौ सर्वं मिथ्येति जानाति । इदं तु सर्वेषामनुभवसिद्धम् । तथात्मा विवेकभ्रमे निवृत्ते तदनन्तरं मिथ्येति ज्ञायते । भो भगवन् अस्य भ्रमनि-

वृत्तिः कथं ? इत्येतच्छृणु ।

End:

वेदानुशासनमिति । अथ शक्तानोर्धूतानां(शठानांधूर्तानां) अश्रद्धधानां(नानां) नास्तिकानां उत्पथगामिनां एतद्विद्यान प्रकाशयेत् ॥

श्रुतिः ।

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैतेकथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥"

इति श्रुतेः ।

"क्रियाद्वैतं न कर्तव्यं भावाद्वैतं सदा कुरु ।
अद्वैतं त्रिषु लोकेषु तद्वैतं गुरुणा सह ॥

Colophon:

इति संक्षिप्तवेदान्तशास्त्रप्रक्रियायां श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यकृतौ बहिर्मुखान्तःप्रवणाज्ञानबोधिनी अध्यात्मविद्योपदेशविधिः समाप्तः ॥

ओं तत्सत्संपूर्णं ब्रह्मसनातनार्पणमस्तु ॥

Subject: Adhyātmabrahmavidyopadeśavidhi: A Minor Vedāntic work of Srī Śaṅkarā.

Remarks:—The Ms is in a fairly good condition. The other works contained herein are Pañcīkaraṇa (Sheets 20-22) and Pañcīkaranabhūtasambāra (Sheet 23).

Dr. Aufrecht describes this work under all the various names contained in the colophon. Dr. Burnell notices this

work under 'unidentified fragments' as Pañcīkaraṇabhūtopasamhāra.' The other works contained herein are:

1. Pañcīkaraṇa.
2. Pañcīkaraṇabhūtopasamhāra.

॥ अध्यात्मविद्योपदेशविधिः ॥

7150. ADHYĀTMAVIDYOPADEŚAVIDHIḤ.

Burnell's Catalogue No. 6488. Page 97. Left column.

Substance—Paper. Size—9×4⅛ inches. Sheets—16 (3-18). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—265. Author—Śaṅkarācārya. Incomplete. Not printed.

Beginning:

...तरं सर्वमिथ्येति ज्ञायते । भो भगवन् अस्य भ्रमनिवृत्तिः कथं । इत्थं तत् शृणु । स कथञ्चित्पुण्यवशाद्वेदोदितेन ईश्वरार्थकर्मानुष्ठानेनापगतरागादिमलः अनित्यादिदर्शनः इहामुत्रार्थफलभोगविरागः वेदान्तप्रतीयमान ब्रह्मात्मभावं बुभुत्सुरात्मानं ज्ञातुमिच्छति ॥ ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते । इति श्रुतेः । ज्ञानं तु श्रवणमनननिदिध्यासनमन्तरेण न संभवति ।

End:

अथ शठानां धूर्तानां अश्रद्धधानानां नास्तिकानां उत्पथगामिनां एतद्विद्यां न प्रकाशयेत् ॥ श्रुतिः ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यै ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' इति ।

श्रुतेः ॥

क्रियाद्वैतं न कर्तव्यं भावाद्वैतं सदा कुरु ।
अद्वैतं त्रिषु लोकेषु न द्वैतं गुरुणा सह ॥

Colophon:

इति संक्षिप्तवेदान्तशास्त्रप्रक्रियायां श्रीमत्परमहंसपरिव्राजकाचार्यकृतौ बहिर्मुखान्त:प्रवणा ज्ञानबोधिनी आत्मविद्योपदेशविधिः समाप्ता ॥

Subject: Atmavidyopadeśavidhiḥ.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is—

'संक्षिप्तपञ्चीकरणम्'

॥ अपरोक्षानुभूतिः ॥

7151. APAROKṢĀNUBHŪTIḤ.

Burnell's Catalogue No. 6388. Page 91. Left coulmn. Substance—Paper. Size—2⅓ × 5 inches. Sheets—9. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—152. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

श्रीमहागणपतये नमः ।

श्रीगुरुपरम्परायै नमः ।

श्रीरामं परमात्मानमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥

स्ववर्णाश्रमधर्मेण तपसा हरिपोषणात् ।
साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥

नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् ।
एवं योनिश्चयः सम्यक् विवेको वस्तुनस्सवै ॥

End:

मोक्षस्य न हि वासोऽस्ति न ग्रामान्तरमेव वा ।
अज्ञानहृदयग्रन्थिनाशो मोक्ष इति स्मृतः ॥

अहिमिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीं त्यक्तकामो विरागी ।
विषमिव विषयादीन्मन्यमानो दुरन्तः
जयति परमहंसो मुक्तबन्धः समैति ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यशंकराचार्यविरचिता अपरोक्षानुभूतिस्समाप्ता ।

Subject: Aparokṣānubhūti, a short Vedantic treatise in which certain direct processes of self-realisation are explained, in 15 verses.

Remarks:—The Ms. is in good condition.

This work has many editions and is translated into many vernaculars.

APAROKṢĀNUBHŪTIḤ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7152	B. L. 6389	Paper.	10¼×4⅜	5	14	Devanāgarī.	Complete;
7153	,, 6840	,,	10×4	9	9	,,	,, (verses 1-144)
7154	,, 9722 k	Palm leaf.	16½×1½	10 (42-51)	7	Grantha.	,,
7155	,, 9722 n	,,	16½×1½	?	?	?	,,
7156	J. L. 957	Paper.	6¾×4¼	9	11	,,	,, ,,
7157	T. S. 128	,,	7½×5	12	8 or 9	,,	,, ,,
7158	S. S. 40	,,	9½×4¼	12	8 or 9	,,	,,

DETAILED REMARKS

on the

APAROKṢĀNUBHŪTI MSS. IN THE ABOVE TABLE.

7155 After the colophon is given—

'पञ्चनदीश्वरभागवतेन लिखितमिदम्'

For the other works contained herein see remarks under 1049.

7156 After the colophon is given:—

उपास्महे नृसिंहाख्यं ब्रह्मवेदान्तगोचरम् ।
भूयोलालितसंसारच्छेदहं तु जगद्गुरुम् ॥

॥ अष्टश्लोकी ॥

7159. AṢṬAŚLOKĪ.

T. S. Collection No. 834.

Substance—Paper. Size—5×2¼ inches. Sheets—8. Lines—3 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—Śaṅkarācāryaḥ. Complete. Not printed.

Beginning:

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत्प्रज्ञानमितीरितम् ॥

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥

End:

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥

Colophon:

इति श्रीशंकराचार्यकृताष्टश्लोकी समाप्ता ।

Subject: Aṣṭaślokī.

Remarks:—The Ms. is in good condition. The date of the transcription of this Ms. is given on the last page:—

“ आनन्दाब्दलिखितमिदम् ॥

॥ आत्मचिन्तनम् ॥

7160. ĀTMACINTANAM.

N. S. Collection No. 3.

Substance—Paper. Size—7¾ × 4 inches. Sheet—1. Lines—16 to a Page. Script—Devanāgarī. No. of Granthas—33. Author—Śaṅkarācārya. Complete. Not Printed.

Beginning:

अहमेव परं ब्रह्म वासुदेवाख्यमद्वयम् ।
इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥ १ ॥

End:

ब्रह्मैवाहं न संसारी न चाहं ब्राह्मणः पृथक् ।
नाहं देहो न मे देहः केवलोऽहं सनातनः ॥ २८ ॥
एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन ॥ २९ ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं आत्मचिन्तनं समाप्तम् ॥

Subject: Ātmacintana.

Remarks:—The Ms. is in good condition.

At the beginning we have the Śukāṣṭaka and at the end we have the Tattvabodha .

॥ आत्मज्ञानोपदेशविधिः ॥

7161. ĀTMAJÑĀNOPADEŚAVIDHIḤ.

Burnell's Catalogue No. 496. Page 92. Left column. Substance—Paper. Size—10½×4 inches. Sheets—7. Lines—11 to a page. Script—Devanāgarī. No. of Granthas—29. Author—Śaṅkarācārya ? Complete. Printed.

Beginning:

श्रीगणेशाय नमः ।

श्रीसरस्वत्यै नमः ।

अथात्मज्ञानोपदेशदविधिं व्याख्यास्यामः। मुमुक्षवे श्रद्दधानाय यतये वीतरागायात्मलाभात्परलाभाभावात् द्रष्ट(ष्टृ)दृश्योऽन्य इति प्रसिद्धी लोके। अथ क आत्मोति। देहस्तावदात्मा न भवति रूपादिमत्त्वेनोपलभ्यमानत्वात् घटादिवत्। यथा घटादयो रूपादिमन्तश्चक्षुरादिकरणैरुपलभ्यन्ते एवं देहोऽपि रूपादिमान् चक्षुरादिकरणैरुपलभ्यते। यथा दाह्यप्रकाश्यकाष्ठादिव्यतिरिक्तो दाहकः प्रकाशकोऽग्निः तथा दृश्याद्देहाद्द्रष्टा व्यतिरिक्त आत्मा सिद्धः।

End :

बीजभावश्च निद्रा च द्वयं यत्र न विद्यते ।
तत्तुरीयमिति ज्ञेयं विनाशोत्पत्तिवर्जितम् ॥ २५ ॥

यावदज्ञानभावस्स्यात्तावत्संसारभावना ।
उदितं चेत्परं ज्ञानं ब्रह्मैवेदं समन्ततः ॥ २६ ॥ इति ॥

यतीनां परमो धर्मो नियमो वनवासिनाम् ।
दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम् ॥ २७ ॥ इति ॥

Colophon :

स्वरूपः समाप्तः ।

Subject : Ātmajñānopadeśavidhi containing two parts viz.

1. त्रिपुटी ।
2. स्वरूपः ।

Remarks:—The Ms is in a fairly good condition.

The other works contained herein are :

1. Vākyvṛtti
2. Pancikṛta
3. Pancikṛtaṭīkā.

On the title sheet is given—

शामजीनायकपुंडे ।

Dr. Burnell notices this Ms. under the name, **Pañcikṛtaṭīkā.**

This work, is a short vedāntic treatise of some unknown author, in the manner of Śrī Śaṅkara's Upadeśasāhasrī, and it has two parts, the first in prose and the second in verse. The latter half quotes Śaṅkara's verses.

The name we have given above has been gleaned from the first sentence of the work. A work of this name attributed to Śaṅkarācārya has been published with Ānandagiri's commentary and an English translation from Calcutta by Yogeśchandra Śāstri.

॥ आत्मबोधः ॥

7162. ĀTMABODHAḤ

Burnell's Catalogue No. 6341. Page 90. Left column.

Substance—Paper. **Size**—1¾ × 3¾ **inches. Sheets**—8. **Lines**—7 to a **Page. Script**—Devanāgarī. **No. of Granthas** —68. **Author**—Śaṅkarācārya **Complete. Printed.**

Beginning:

श्रीगणेशाय नमः ॥

तपोभिः क्षीणरागाणां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निविज्ञानं विना मोक्षो न सिध्यति ॥

End:

दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहं नित्यसुखं निरञ्जनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्वजित्सर्वगतोऽमृतो भवेत् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवत्पादविरचितात्मबोधप्रकरणं समाप्तम् ॥

Subject: Ātmabodhaprakaraṇa a short treatise on the nature of the soul and its oneness with the supreme Self.

Remarks:—The Ms. is in good condition. The work is published in many places and with English translation also being a very popular one.

ĀTMABODHA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7163	B. L. 6342	Paper.	9¾×1¼	8	7	Devanāgarī.	Complete.
7164	,, 6343	,,	10×4	4	9	,,	Incomplete.
7165	,, 6344	,,	6¼×4	11	8-9	,,	Complete.
7166	,, 9672 b	Palm leaf.	10½×1¼	8 (27-34)	6	Grantha.	,,
7167	,, 9722 j	,,	16½×1½	7 (6-12)	7	,,	,,
7168	,, 9827 b	,,	14½×1½	7 (6-12)	6	,,	,,
7169	,, 9896 a	,,	16¾×1½	8	7	Telugu.	,,
7170 Not noticed by Dr. Burnell Ms. No. 15567		Paper.	8×4	18	12-13	Devanāgarī.	,, (Sheets 15 & 16 are missing.

7171	B. L. 12086	Śrī tāla.	14½×2	1-8 (Penultimate work)	11	Grantha.	,,
7172	J. L. 958	Paper.	7¾×4¾	4	13	Devanāgarī.	,,
7173	G. K. D. 247	,,		6	8	,,	,,

DETAILED REMARKS

on the

ĀTMABODHA MSS. IN THE ABOVE TABLE.

7163 On the title page is given—

इदं महाराजतुलजाराजस्य ।

7166 For other works contained herein see under No. 1048.

7167 For other works contained herein see under No. 1049.

7163 For other works contained herein see under No. 1052.

7169 The works contained herein are

1. Ātmabodha
2. Dṛkdṛśyaviveka
3. Bālabodhinī.

7171 For other works contained herein see under No. 7351.

॥ आत्मबोधव्याख्या—भावप्रकाशिका ॥

7174. ĀTMABODHAVYĀKHYĀ—BHĀVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 9662. Page 90. Left column. **Substance**—Palm leaf. Size—18×1½ inches. Leaves—129. Lines—6-7 to a Page. Script—Telugu. No. of Granthas—4500. Author—Bodhendra. Incomplete. Not printed.

Beginning:

....ततश्चात्मनः कर्तृत्वं न भाविकमित्याह— अज्ञा-

नान्मानस्सोपाधेरित्ययं भावः न केवलं चेतनः कर्तृत्वादिबन्धाश्रयः 'असंगो ह्ययं पुरुषः' 'असंगो न हि सज्जते' 'अनश्नन्नन्यो अभिचाकशीति' इत्यादिश्रुतिभिः अचेतनस्य सर्वात्मनौदासीन्यप्रतिपादनात् ।

End:

दिग्देश + अमृतो भवेत् । तदेवमयमपि निष्क्रियः परमहंसस्स्यात्तदर्थं भजते सेवते । सर्ववित्सर्वज्ञः । सर्वगतः अद्वितीयब्रह्माभिन्नत्वादमृतः मुक्तो भवेत् । 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतेः । तथाभूतस्यात्मतीर्थं दिग्देशकालाद्यनपेक्ष्यैव सर्वगं शीतादिहृच्छीतादि शीतोष्णद्वंद्वसुखानि हरतीति शीतादिहृत् । नित्यसुख आत्मनः परं प्रेमास्पदत्वमानन्दरूपत्वात् 'यदेष आकाश आनन्दो न स्यात्' इति श्रुतेः । 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादिश्रुतेरितर...जोनद्यादिषु तद्विपरीतं द्रष्टव्यं तस्मादात्माति.......शिष्यत इति सर्वमनवद्यम् ।

अव्याजकरुणासारनिष्यन्दि नयनाञ्चलम् ।
गीर्वाणेन्द्रगुरूपास्यं गीर्वाणेन्द्रगुरुं भजे ॥

अद्वैतपीठस्थितिदेशिकं तं
ह्यात्मविद्याविशदान्तरंगम् ।
नित्यं भजामो विशदस्वरूपं
गीर्वाणयोगीन्द्रगुरुं हृदन्तः ॥

गुरोः कटाक्षलक्ष्याणां
शिष्याणां श्रेयसेऽधुना ।
भावप्रकाशिकाभिख्या
टीका विरचिता मया ॥

बोधेन्द्ररचितां टीकां आचार्योक्त्यनुसारिणीम् ।
वीक्षतां दक्षिणामूर्तिराचार्यहृदयङ्गमम् ॥
सन्तः सन्तुष्टहृदया मीमांसान्यायचक्षुषः ।
वीक्षन्तां करुणापूर्वं बालकानां क्रियामिव ॥
श्रीचक्रमध्यनिलया समस्तगुणसेविता ।
सा देवी त्रिपुटा तुष्टा वीक्षतां मत्कृतिं वराम् ॥
आत्मबोधस्य टीकार्थजिज्ञासा विदुषां यदि ।
उत्सार्य दूरे मात्सर्यं व्याख्यानमिदमीक्ष्यताम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगीर्वाणेन्द्रपूज्यपादशिष्येण बोधेन्द्रेण विरचिता आत्मबोधस्य टीका भावप्रकाशिकाख्या आचार्यसूक्त्यनुसारिणी सम्पूर्णा । हरिः ओम् ।

भावप्रकाशिकां टीकां श्रुतिन्यायोपबृंहितां ।
एतां दृष्ट्वाऽखिलाः सन्तः सन्तुष्टास्सन्तु सन्ततम् ॥
गुरवस्ते महात्मानो मे नित्यं तत्त्वदर्शिनः ।
पुनन्तु मामिकां बुद्धिं धियां च कृपया मुदा ॥

* * *

प्रमथ्य वज्रोपमयुक्तिसंभृतैः
शतैररातीञ्छतशो वचोबलैः ।
ररक्ष वेदार्थनिधिं विशालधीः
नमो यतीन्द्राय गुरोर्गरीयसे ॥

Subject: Ātmabodhavyākhyā otherwise known as Bhāvaprakāśikā an elaborate commentary with vast quotations from Upaniṡads and other works on Vedānta.

Remarks:—The Ms. is in a fairly good condition.

The author of this ṭīkā on the Ātmabodha is Bodhendra pupil of Gīrvāṇendra. If the latter is identical with the guru, of the same name, of the famous poet Nīlakaṇṭhadīkṣita, Bodhendra may be assigned to the 17th century. The author mentions his guru a very learned who conquered many adversaries in discussion, and established Vedāntism. He is the author of another work Nāmāmṛtarasāyana. He established a Mutt of Bhakti school in Govindapuram in Tanjore District where he attained his samādhi.

॥ आत्मबोधव्याख्या—भावप्रकाशिका ॥

7175. ĀTMABODHAVYĀKHYĀ—BHĀVAPRAKĀŚIKĀ.

Burnell's Catalogue No. 9661. Page 90. Left column. Substance—Palm leaf. Size—18¼×1½ inches. Leaves—182. Lines—7 to a Page. Script—Grantha. No. of Granthas—4500. Author—Bodhendra. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7174.

Remarks:—The Ms. is in a decaying condition.

॥ आत्मबोधव्याख्या ॥

7176. ĀTMABODHAVYĀKHYĀ.

Burnell's Catalogue No. 6378. Page 90. Left column.

Substance—Paper. Size—7¾ × 4½ inches. Sheets—16. Lines—11-14 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—? Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

अथात्मबोधटीका लिख्यते ।

तपोभिः + विधीयते ।

कृच्छ्रचान्द्रायणनित्यनैमित्तिकाद्यनुष्ठानरूपैः तपोभिः क्षीणानि पापानि रागाद्यन्तःकारणदोषा येषां " नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं ' इति वचनात् ।

End:

दिग्देश × भवेत् ॥ ६७ ॥

व्या ॥ यो विनिष्क्रियः परमहंसः स्वात्मतीर्थं भजते सेवत सर्ववित्सर्वज्ञः सर्वगतः परमात्मस्वरूपत्वादमृतो मुक्तो भवेत् कथंभूतं स्वात्मतीर्थं दिग्देशकालाद्यनपेक्षमेव सर्वगतं शीतादिद्वन्द्वदुःखानि हरतीति शीतादिहृत् । नित्यसुखं

मोक्षानन्दप्रापकत्वात् इतरतीर्थतद्विपरीतं द्रष्टव्यम् ।
तत्तस्मादात्मतीर्थस्नानस्य न किंचिदवशिष्यत इति भावः ।

Colophon:

इति आत्मबोधप्रकरणं समाप्तम् ॥

Subject: Ātmabodhavyākhyā with text.

Remarks:—The Ms. is in good condition.

On the title page is given—

शंकराचार्यकृतप्रथमखण्डनगयानन्दवर्धन(?) ।

The author of this commentary on the Ātmabodha of Śaṅkara is not known. Tradition invariably attributes the commentary also to Śaṅkara. Some colophons call the work as the Ātmabodha Bhāṣya of Śaṅkara.

ĀTMABODHAVYĀKHYĀ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7177	B. L. 6874	Paper.	8½ × 4½	16	8-11	Devanāgarī.	Complete.
7178	„ 6345	„	6¾ × 4¼	85 (3-87)	8	„	Incomplete. wants a little in the beginning.
7179	„ 6316	„	7 × 4¼	12	7-10	„	„ Wants end.
7180	„ 9672 c	Palm leaf.	10 × 1¼	43	6	Grantha.	Complete.
7181	„ 9677 f	„	9 × 1½	21	7	Telugu.	„
7182	„ 9842 c	„	16¼ × 1½	5 (13-17)	8	„	„
7183	„ 9788 b	„	14¼ × 1	30	4	Grantha.	Incomplete; wants end.
7184	„ 9890	„	15 × 1¼	36	5	„	„
7185	T. S. 136	Paper.	11½ × 5		8-10	Devanāgarī.	Complete.
7186	„ 127	„	6¾ × 3½	40	7	„	„

7187	T. S.	126	Paper.	11½ × 4½	17	9	Devanāgarī.	Complete.
7188	S. K.	112	,,	8¼ × 4	5	11 or 12	,,	Incomplete.
7189	G. K. D.	248	,,	10½ × 4	19	9	,,	Complete.
7190	J. L.	959	,,	9½ × 8¾	17	10	,,	Incomplete; 1-14 verses.
7191	,,	960	,,	7½ × 5	16	18	,,	Complete.

DETAILED REMARKS
on the
MSS. OF ĀTMABODHAVYĀKHYĀ
IN THE ABOVE TABLE.

7178 After the colophon is given—

सच्चित्सुखाख्यपरमात्ममहाब्धिरूप-
प्रत्यक्षभावलवलेशशतांशलाभात् ।
अग्न्यर्कसोमभवविष्णुविरिञ्चिसूत्र-
जीवा विभान्ति सुखिनश्च भवन्ति चित्रम् ॥

7179 The text begins in this Ms. with the verse—

शतमखपूजितपादं श्रुतपथमनसाऽप्यगोचराकारं ।
सितकमलायतनेत्रं सीतावामाङ्कमाश्रये नित्यम् ॥

7180 Do. Do.

Dr. Burnell calls this Ms. as Ajñānabodhinī. For other works contained herein see under No. 1043.

7181 For other works contained herein see under No. 1139.

7182 For other works contained herein see under No. 1257.

7183 The other work contained herein is Pañcadaśīvyākhyā.

7184 This Ms. is in a very decaying condition. The other works contained herein are Vākyāvṛttiprakāśikā and Dakṣiṇāmūrtistotravyākhyā.

7186 On the title page is given—

राक्षसभुवनकरस्येदं । कोल्हापुरमहालक्ष्म्यै नमः ।

7188 On the title page is given—

शेषमहात्मजबालाख्यस्य ।

7191 After the colophon is given—

दुर्मतीनामसंवत्सर आषाढ शुक्लषष्ठ्यां इन्दुवासरे ग्रन्थस्सम्पूर्णः

शिवदासेन लिखितम् ।

॥ आत्मबोधः (सव्याख्यः) ॥

7192. ĀTMABODHAḤ (SAVYĀKHYAḤ).

Burnell's Catalogue No. 9660. Page 90. Left column. Substance—Palm leaf. Size—12×1 inches. Leaves—26. Lines—4 to a Page. Script—Grantha. No. of Granthas—700. Author—Śaṅkarācārya. Complete. Not printed.

Beginning:

तपोभिः + विधीयते ॥

कृच्छ्रचान्द्रायणनित्यनैमित्तिकाद्यनुष्ठानरूपालैन तपस्सुलचातनु पोयिनप्पटिकी रागाद्यन्तःकरणदोषालु कलवारलै ।

End:

दिग्देश + अमृतो भवेत् ॥

क्रियारहितुंडैन ये परमहंसलुण्डु * *

वेदान्तसिद्धान्तमु ।

Colophon:

इति श्रीमत् + शंकराचार्यगुरवे नमः ।

Subject: Ātmabodha with a Telugu commentary in Grantha script.

Remarks:—The Ms. is in good condition. On the title page is given

अप्पन्पुस्तकम् ॥

॥ आत्मबोधः (सव्याख्यः) ॥

7193. ĀTMABODHAḤ (SAVYĀKHYAḤ).

Burnell's Catalogue No. 9659. Page 90. Left column. **Substance**—Palm leaf. Size—17 × 1¼ inches. Leaves—25. Lines—7 to a Page. Script—Grantha and Tamil. No. of Granthas—700. Author—Śaṅkarācārya. Complete. Not printed.

Beginning:

वन्दे (वरप्रदमहं वर)वारणेन्द्र-
वक्त्रं सदा क्षितिभृदीश्वरजातनूजम् ।
विघ्नेश्वरं विदितवन्दितपादपद्मम्
संसारसंभवभयापहमानतानाम् ॥

श्रुतमस्तपूजितपादं
श्रुतपथमनसाप्यगोचराकारम् ।
सितजलरुहनिभनेत्रं
सीतावामाङ्कमाश्रये रामम् ॥

यत्प्रसादादहं ब्रह्म सच्चिदानन्दलक्षणम् ।
विजानामिहि तं [न] श्रीमद्वासुदेवगुरुं भजे ॥

லோகத்திலே பகவானாயிருக்கிற சங்கராச்சார்யரானவர் உத்தமாதிகாரியாயிருக்கிறபேர்களுக்கு வேதாந்தமாயிருக்கிற பிரஸ்தானத்திரயத்தை; நிரூபித்து அந்த பிரஸ்தானத்திரயத்தை அதனுடைய அர்த்தவிசாரத்தினாலே அஸமர்த்தராய் மந்தபுத்திகளாயிருக்கிறவர்களை ரக்ஷிக்கிறதன்பொருட்டு ஸமஸ்தமாய் பரமகிருபாளுவாயிருக்கிற ஆசார்யர் பிரதிஞ்ஞை பண்ணுகிறார்.

तपोभिः + विधीयते ॥

End:

दिग्देशकालादि + अमृतो भवेत् ॥ ६८ ॥

* *

யாதொரு புருஷன் இந்த ஆத்ம போத பிரகரணத்தினுடைய அர்த்தத்தை + அவனே முக்தன் அவனே வித்வான் என்று சாஸ்த்ர ஸித்தாந்தம்.

Colophon:

इति श्रीमत् + आत्मवोधप्रकरणस्य टीका समाप्ता । श्रीमत्परमगुरुशिष्य हयग्रीवशिष्य विश्वेश्वराय नमः ॥

Subject. Ātmabodha with a true translation of the text and commentary in Tamil.

Remarks:—The Ms. is in a fairly good condition. At the beginning there are 3 leaves containing some loose matter. This Ms. should have been copied by a person whose Guru's name was Viśveśvara.

॥ आत्मबोधः (सव्याख्यः) ॥

7194. ĀTMABODHAḤ (SAVYĀKHYAḤ).

N. S. Collection No. 87.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{4}$ inches. Leaves—34 (2-35). Lines—5 to a Page. Script—Grantha. No. of Granthas—250. Author—?. Complete. Not printed.

Beginning:

சப்தர்நுகா(?)வைராக்யமாவது இஹத்திலேயும் ஸ்வர்க்காதி பலபோக இச்சையிலேயும் * * ஆத்ம போதம் विधीयते விதிக்கப்பட்டது.

End:

யாதாமொருவன் அந்த ஆத்மபோத பிரகாணத்துனுடைய * * அவரே முக்தரென்று வேதாந்த ஸித்தாந்தம்.

Colophon:

इति श्रीमत् + आत्मबोधप्रकरणदीपिका समाप्ता ॥

Subject: Ātmabodha in Tamil written in Grantha script.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are—

१ सोपानपञ्चकम् २ आयुर्निर्णयः ।

॥ आत्मबोधः (सानुवादः) ॥

7195. ĀTMABODHAḤ (SĀNUVĀDAḤ).

T. S. Collection No. 180.

Substance—Paper. Size—$9 \times 4\frac{1}{2}$ inches. Sheets—11. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Śaṅkarācārya. Complete. Not Printed.

Beginning:

श्री वेङ्कटेशाय नमः ॥

श्रीगणेशशारदासद्गुरुभ्यो नमः ॥

अथात्मबोधः प्रारम्भः ॥

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥ १ ॥

तपेंचि कर्ते क्षय पातकाचा
धारे मनीं हे निजशान्ति ज्यांच्या ।
विरक्तमोक्षीं बहु आस ज्यांला
हा आत्मबोध कथिला तयांला ॥ १ ॥

End:

परमात्मतीर्थे भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥

जो शङ्करोक्तवरवारिजआत्मबोधू
...विवळूनी सकलार्थबोधू ।
हा चें अर्थ सकलां सगला दिलाहे
येथे रिघोनि रहतां जीवराम होय ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचित
आत्मबोधप्रकरणम् सम्पूर्णं ॥
इदं पुस्तकं अम्बकरगोविन्दस्य ॥

Subject: Ātmabodha with a Mahrāthi translation 1-68 verses.

Remarks:—The Ms. is in a fairly good condition.

॥ आत्मानात्मविवेकः ॥

7196. ĀTMĀNĀTMAVIVEKAḤ.

Burnell's Catalogue No. 6416 a. Page 91. Left column. Substance—Paper. Size—9½ × 4 inches. Sheets—1-4. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

श्रीगणेशाय नमः। तुलजाभवान्यै नमः। ओम्।

अथ आत्मानात्मविवेकः कथ्यते। आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तोऽवस्थात्रयसाक्षी सन् नित्यशुद्धबुद्धमुक्तसत्यज्ञानपरमानन्दस्वरूपः।

End:

सत्यनित्यशुद्धबुद्धमुक्तः परमात्मा इत्यात्मानात्मविवेकं यः सदा करोति स जीवन्मुक्तो भवति। तरति शोकमात्मविदिति श्रुतेः।

"अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हति" ॥
इति भगवद्वचनात्।

Colophon:

इत्यात्मानात्मविवेकः समाप्तः।

Subject: Ātmānātmaviveka a treatise which discusses the difference between soul and matter.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is:—

महावाक्यविवरणम् ।

On the title page is given—

इदं पुस्तकं महाराजतुलजाराजस्य

The work is published with Telugu translation and notes at Madras in the year 1920 by Vennelakanṭi Sundararāma-śarma. This is one of the works that is ascribed by tradition to Śaṅkara.

ĀTMĀNĀTMAVIVEKA.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7197	B. L. 6417	Paper.	6¼×4	2	8	Devanāgarī.	Complete.
7198	„ 6418 a	„	9×3¾	4 (1-4)	6	„	„
7199	„ 9668 c	Plam leaf.	9½×1½	2 (66 & 67)	8	„	„
7200	„ 12257 j	„	10¾×1⅛	1 (27th)	7	„	„

DETAILED REMARKS

on the

ĀTMĀNĀTMAVIVEKA.

MSS. CONTAINED IN THE ABOVE TABLE.

7197 After the colophon is given the following verses:—

भ्रान्त्या प्रतीतस्संसारो विवेकान्न तु कर्मभिः ।
सर्वज्ञारोपितस्सर्पो घण्ठाघोषान्निवर्तते ॥

अपनेतुं तमश्शक्यं त्यागैर्भोगैस्तथाध्वरैः ।
रज्जुसर्पमपाकर्तुं न दन्ती नाण्डजाधिपः ॥

7198 The other works contained herein are:—

1 त्वत्पदार्थविवेकपञ्चीकरणम् 2 आत्मानात्मपञ्चकोशविवेकः

7199 The works contained herein are—

1 साधनचतुष्टयसम्पत्तिः
2 पञ्चीकरणम्
3 आत्मानात्मविवेकः
4 ऊर्म्यष्टक
5 नारायणोपनिषत्
6 अष्टाक्षरमन्त्रः

7200 The other works contained herein are all mantras.

॥ आत्मानात्मविवेकः ॥

7201. ĀTMĀNĀTMAVIVEKAḤ.

Burnell's Catalogue No. 9827 f. Page Left column. Substance—Palm leaf. Size—14½ × 1½ inches. Leaves —1-84. (in the middle of the Ms. after the 21st leaf). Lines—5 to a page. Script—Grantha. No. of Granthas

—100. Author—?. Incomplete. Wants end. Not printed.

Beginning:

श्रुतिस्मृति + शंकरं ॥

यदज्ञानप्रभावेन दृश्यते सकलं जगत् ।
यत् ज्ञानाच्छ्रेय आप्नोति तस्मै ज्ञानात्मने नमः ॥

अनात्मभूतदेहादावात्मबुद्धिस्तु देहिनाम् ।
साऽविद्या तत्कृतो बन्धः तन्नाशो मोक्ष उच्यते ॥

गुरुवेदान्तोक्तप्रकारेण आत्मानात्मविवेकः कथ्यते—
आत्मा देहेन्द्रियादिव्यतिरिक्तः पञ्चकोशादिभिन्नः दशप्राणतद्धर्मरहितः षट्कोशरहितः षडूर्मिरहितः षड्भावविकारशून्यः अवस्थात्रयसाक्षी नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयस्वरूपः ।

End:

तस्मादेवं विज्ञातो दान्तोपरतिस्तितिक्षासमाहितः श्रद्धावित्तो भूत्वाऽत्मन्येवात्मानं पश्यतीत्यादिश्रुतेः ।

दृश्यं सर्वमनात्मा स्यात् दृगेवात्माऽविकारिणी ।
आत्मारात्मविवेकोऽयं कथितो ग्रन्थकोटिभिः ॥

आत्मानात्मविवेकेन पुंसः संसारनिर्वृतिः ।
तद्विना जन्मकोट्यापि बन्धभेदो न सिध्यति ॥

* *

सर्वं जगन्नास्ति यथा मरौ जलं
नीलं यथा व्योमपथाङ्गदृष्टिः ।

ब्रह्मैव सत्यं परमात्म.........

.... ॥

Subject: Ātmānātmavivekaḥ a work on Advaitavedānta which investigates into the nature and difference between soul and matter.

Remarks :—The Ms. is in a fairly good condition. This work thoroughly differs from the other works of the similar name.

For the other works contained herein see remarks under No. 1052.

Neither in Burnell's Catalogue, nor under No. 1052 in this catalogue, has this work been noticed.

The text of this Ms. differs from that of the previous numbers in many places though in some places it corresponds. This is a bigger work than that noticed under the last number containing more details. A work which is similar in text to this is attributed to Svayamprkāśayati (Vide. Descriptive catalogue of the Oriental Mss. Library Vol. IX. pages 3395-96).

॥ आत्मानात्मविवेकः ॥

7202. ĀTMĀNĀTMAVIVEKAḤ.

Burnell's Catalogue No. 9014 f. Page Left column.

Substance—Palm leaf. Size—13 × 1 inches. Leaves—3.

Lines—7-8 to a Page. Script—Grantha. No. of Granthas—50. Author—?. Complete. Not printed.

Beginning:

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥

अन्तर्हृदि नियन्तारं बहिश्च गुरुरूपिणं ।

उभयत्रापि कृष्णाख्यं तं वन्दे देवकीसुतम् ॥

अथात्मानात्मविवेकः० Same as No. 7201.

End:

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति भगवत् वचनात् ।

Colophon:

इति आत्मानात्मविवेकस्संपूर्णः ।

Subject: Âtmânâtmaviveka.

Remarks:—The Ms. is in a fairly good condition.

For the other works contained herein see remarks under No. 936. The text of this Ms. is complete by itself and this work is shorter than that noticed under the last number.

॥ आत्मानात्मविवेकः ॥

7203. ĀTMĀNĀTMAVIVEKAḤ.

Burnell's Catalogue No. 9672 k.

Substance—Palm leaf. **Size**—10½ × 1¼ inches. **Leaves**—2 (8th & 9th leaves). Lines—6 to a Page. **Script**—Grantha. No. of Granthas—10. Author—? Complete. Not printed.

Beginning, end and subject—Same as No. 7201.

Colophon:

इत्यात्मानात्मविवेकस्समाप्तः ।

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see No. 1043. But the text in this is very short corresponding to No. 7201 only in beginning and end.

॥ उपदेशसाहस्री ॥

7204. UPADEŚASĀHASRĪ.

Burnell's Catalogue No. 9657 c. **Page** 90. **Right column.**

Substance—Palm leaf. **Size**—18¼ × 1½ inches. **Leaves**—18 (180-192). Lines—6 to a Page. Script—Telugu. No. of Granthas—375. Author—Śaṅkarācārya. Incomplete. Printed.

Beginning:

हरिः ओम् । अथ मोक्षज्ञानोपदेशविधिं व्याख्यास्यामः । मुमुक्षूणां श्रद्दधानानां अर्थिनामर्थाय । तदिदं

मोक्षसाधनं + ब्रूयात्पुनःपुनः यावद्ग्रहणं द्रढीभवति ।

End:

आत्मनश्चाद्वयत्वे विषयाणि द्वयस्यासत्वार्थानि च सर्वाण्युपनिषद्वाक्यानि विस्तरतः समीक्षितव्यानि समीक्षितव्यानि ।

Colophon:

परिसंख्याप्रकरणं समाप्तम् ॥

Subject: Upadeśasāhasrī a work on how to attain the salvation or final self-emcancipation.

Remarks:—The Ms. is in good condition. The other work contained herein is Upadeśasāhasrīvyākhyā. The work is a popular one and is printed in many places, sometimes with translation from Bombay and Ahmedabed. The other works contained herein are:—

2 Different commentaries on Upadeśasāhasrī.

॥ उपदेशसाहस्री ॥

7205. UPADEŚASĀHASRĪ.

Burnell's Catalogue No. 9863 c. Page. Right column. Substance—Palm leaf. Size—16⅓×1¼ inches. Leaves—15 (185-199). Lines—7 to a Page. Script—Grantha. No. of Granthas—375. Author—Śrī Śaṅkarācārya. Complete. Printed.

Beginning, end and subject—Same as No. 7204.

Colophon:

इति परिसंख्यानं तृतीयं प्रकरणम् । इति श्रीमत्परमहंसपरिव्राजकाचार्य-

गोविन्दभगवत्पूज्यपादाशिष्यश्रीमच्छङ्करभगवत्पूज्यपादविरचितं उपदेशसाहस्र्याख्यं प्रकरणं ॥ श्रीमच्छङ्कराचार्येभ्यो नमः ॥

नमो ब्रह्मविद्भ्यः ॥

Remarks :—The Ms. is in a fairly good condition. The other works contained herein are—

a. Bodhanidhi's Padya-Upadeśagranthavyākhyā.

b. Ānandajñāna's Gadya-Upadeśagranthavyākhyā.

॥ उपदेशसाहस्री ॥

7206. UPADEŚASĀHASRĪ.

Burnell's Catalogue No. 6333. Page 90. Right column. Substance—Paper. Size—10¼ × 4⅜ inches. Sheets—66 (5-70). Lines—9-10 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Śaṅkarācārya. Incomplete. Printed.

Begins with the penultimate verse of the 10th Prakaraṇa in the Padyaprabandha.

Beginning:

सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं तु पश्यन्नपि चाद्वयं ततः ।
तथा च कुर्वन्नपि निष्क्रियश्च य-
स्स आत्मविन्नान्य इतीह निश्चयः ॥ १३ ॥

(इति) दृशिप्रकरणम् ।

ईक्षितृत्वं स्वतस्सिद्धं जन्तूनां च ततोऽन्यता ।
अज्ञानादित्यतोऽन्यत्वं सदसीति निवर्त्यते ॥ १ ॥

End—Same as No. 7204.

Colophon:

इति + उपदेशसाहस्री समाप्ता । श्रीशङ्करार्पणमस्तु । शके १६६६
(A. D. 1744) तारणनामसंवत्सरे ज्येष्ठबुधत्रयोदशी ग्रन्थसमाप्तिः ।
शुभमस्तु ॥

Subject: Upadeśasāhasrī.

Remarks:—The Ms. is in a fairly good condition. There is a loose sheet at the beginning and end dealing with the same subject.

॥ उपदेशसाहस्रीटीका ॥

7207. UPADEŚASĀHASRĪṬIKĀ.

Burnell's Catalogue No 9863 b. Page 90. Right column. Substance—Palm leaf. Size—16 × 1⅜ inches. Leaves—21 (165-185). Lines—7 to a Page. Script—Grantha. No. of Granthas—800. Author—Ānandajñāna. Complete. Gadyabhāga only. Not printed.

Beginning:

श्रुतिस्मृति + लोकशङ्करम् ॥
कृष्णवाणीमतीशं तं जगद्वंद्यं कृपानिधिं ।
समाश्रये सदा भक्त्या प्रणताभीष्टदायिनम् ॥
सर्वोपनिषदां सारसंग्राहिका पद्यगद्यात्मिका हीयमुप-

देशसाहस्री ॥ तत्र पद्यभागं प्रागुक्तपरिपाट्या परिसमाप्य गद्यभागमवतारयन् भाष्यकारः प्रतिज्ञां करोति --अथेति ।

End:

अनात्मेति । परमत्वमवाधितत्वं हेतुस्तत्कृतप्रियाप्रिययोरप्राप्ताविशेषः विशेषतयात्मनोऽद्वयत्वाविषयाणि द्वयस्यासत्वार्थानि चोपनिषद्वाक्यानि पौनःपुन्येनालोचयितव्यानीत्याह-- आत्मनश्चेति । अभ्यासः गद्यपद्यात्मनः समाप्त्यर्थः ॥

Colophon:

परिसंख्यानप्रकरणं तृतीयम् ॥

उपदेशसहस्रीयं पद्यगद्यमयीमया ।
व्याकृता व्याकृताप्यन्यैर्मन्दानुग्रहसिद्धये ॥
व्याक्रिया सत्क्रिया सेयं कुर्वती शर्म निर्मलम् ।
कृतिनां कृतविद्यानां आश्रिता पुरुषोत्तमम् ॥

इति श्रीपरमहंसपरिव्राजकाचार्य शुद्धानन्दपूज्यपादशिष्य श्रीमद्भगवदानन्दज्ञानकृता साहस्रीटीका समाप्ता ।

Subject: Upadeśasāhasrīṭīkā Gadyabhāga.

Remarks:—The Ms. is in a fairly good condition. The author calls himself the desciple of Śuddhānanda. This is a commentary on Gadyabhāga only. For the other works contained herein see remarks under No. 7205.

॥ उपदेशसाहस्रीव्याख्या ॥

7208. UPADEŚASĀHASRĪVYĀKHYĀ.

Burnell's **Catalogue** No. 9657 b. Page Right column. Substance—Palm leaf. Size—18½ × 1⅓ inches. Leaves—31 (149-179). Lines—6 to a Page. Script—Telugu. No. of Granthas—800. Author—Ānandajñāna. Complete. Gadyabhāga only, Not printed.

Beginning:

सर्वोपनिषदां सारं०

Same as No. 7207.

End, colophon and subject—Same as No. 7207.

Colophon:

मू ॥ इति श्रीमत् + शंकरभगवत्पूज्यपादकृतेउपदेशसाहस्राख्यप्रकरणं समाप्तम् ॥

Remarks:—The Ms. is in good condition. For the other works contained herein see remarks under No. 7204. After the colophon is given the following

यत्पादांबुजचंचरीकधिषणा निर्वाणदुर्गादिगो-
गावल्लीर्मुक्तिनिसर्गदुरिता(?) वाचंयमानामियम्(?) ।
यस्मिन्नित्यमियं शमादि समभूद्बोधांकुरो मे यतः
शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ॥

सूर्यानलानिल जलेशसुरेशद...दिग्गज(?)
मृत्युपरमेष्टिशशांकरूपैः(?) ।
भिन्नद्वयेव कुरुषे सकलं विधान
स्थानं कथं भवभयं दधतो मम स्यात् ॥

मनसा चिन्तितं यस्मै वाचा यद्भाषितं पुनः ।
कायेन यत्कृतं कर्म तत्तद्ब्रह्मार्पणं भवेत् ॥

॥ उपदेशसाहस्रीव्याख्या—पदयोजनिका ॥

7209. UPADEŚASĀHASRĪVYĀKHYĀ—PADAYOJANIKĀ.

Burnell's Catalogue No. 6331. **Page** 90. Right column. Subtance—Paper. Size—11¾ × 5 inches. Sheets—244. Lines—9-14 to a Page. Script—Devanāgarī. No. of Granthas—4600. Author—Rāmatīrtha. Complete. Printed.

Beginning:

श्रीरामाय नमः

समस्तब्रह्मविद्यासंप्रदायप्रवर्तकाचार्येभ्यो नमः ।

ओं नमो भगवते सर्वात्मने वासुदेवाय नमः ।

श्रीकाशीराजाय नमः ।

प्रणम्य रामाभिधमात्मधीपदं
जगत्प्रसूतिस्थितिसंयमायनम् ।
तदात्मकान् शंकरपूर्वकान् गुरून्
मयोपदेशार्थ विभाग उच्यते ॥

* *

शिष्टाचारविशेषपरिप्राप्तं मंगलमाचरति अथेति ।

मूलं ॥ अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानार्थिनामर्थाय ।”

End:

॥ विस्रथ्येति ॥ * * युक्तमत्र गुरुसुश्रूपूजनमित्यर्थः ।

उपदेशसहस्रीयं विवृता हि महात्मभिः ।
श्रद्धावेशान्मयाप्यस्याः पदयोजनिका कृता ॥ १ ॥

समस्तवेदार्थरहस्यगद्य-
पद्यप्रबन्धार्थतयावबोधः ।
कथं नु मादृग्मतिर्विविक्तः स्यात्
तथापि भक्त्याहमिहास्मिन्नुतः (?)॥
हृद्यन्तराविष्कृतराममूर्तेः
तथा गुरूणां विपुलप्रसादात् ।
यथाकथंचिद्रचितेन विष्णुः
अनेन तुष्यत्वखिलान्तरात्मा ॥ २ ॥

Colophon:

उपदेशसहस्र्याः गद्यबन्धी यथामति ।
व्याख्याता रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥

इति श्री + उपदेशसाहस्र्यां गद्यस(न्दर्भव्याख्या समाप्ता)

श्री रामाय नमः ।

इति श्रीशंकराचार्यकृतोपदेशसाहस्र्याः पदयोजनिका नाम

टीका कृष्णतीर्थशिष्यरामतीर्थविरचितायां सहस्रोपदेशी समाप्ता ॥ श्रवणवदि २ रविवासरे। संवत् १८४४ (A. D. 1787) पुस्तकश्रीबहुदुरजु देवकी श्रीस्वामिपरमानन्ददास-शिष्येण श्यामादासेन लिखिता यादलिपनगरमध्ये।

Subject: Upadeśasāhasrīvyākhyā Padayojanikā.

Remarks:—The Ms. is in good condition.

This is one of the very popular minor works of the famous Śaṅkarācārya and this commentary has been published along with the text both in Bombay and Calcutta. The Bombay edition is edited by Vāsudev Lakṣmaṇa Śāstri Paṇśikar and the Calcutta edition containning a translation by Akṣaya Kumāra Śāstri. The author calls himself the disciple of one Kṛṣṇa Tīrtha.

॥ उपदेशसाहस्रीव्याख्या–पदयोजनिका ॥

7210. UPADEŚASĀHASRĪVYĀKHYĀ—PADAYOJANIKĀ.

S. S. Collection No. 29.

Substance—Paper. Size—10⅝ × 5 inches. Sheets—344. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—4300. Author—Rāmatīrtha. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7209.

Remarks:—The Ms. is in excellent condition.

॥ उपदेशसाहस्रीव्याख्या—पदयोजनिका ॥

7211. UPADEŚASĀHASRĪVYĀKHYĀ—PADAYOJANIKĀ.

Burnell's Catalogue No. 6832. Page 90. Right column.

Substance—Paper. Size—10¼ × 4¼ inches. Sheets—29. Lines—12-14 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Rāmatīrtha. Incomplete. Printed.

Beginning—Same as No. 7209.

End:

ननु सुखदुःखमो...न्वयित्वेन दृश्यस्य सत्वरजस्तमोरूपप्रकृतिकार्यत्वावगमात् कथमनृतत्वमिति सांख्यशंकामपकरोति ॥ येन चेति ॥ येन दृश्यमानाकारे............॥

Subject: Upadeśasāhasrīvyākhyā otherwise known as Padayojanikā; wants end.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—

पुस्तकं तुलजाराजस्य ।

॥ उपदेशसाहस्रीव्याख्या—पदयोजनिका ॥

7212. UPADEŚASĀHASRĪVYĀKHYĀ—PADAYOJANIKĀ.

Burnell's Catalogue No. 6834. Page 90. Right column.

Substance—Paper. Size—10 × 4¼ inches. Sheets—84. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Rāmatīrtha. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः ।
श्रीशंकराचार्येभ्यो नमः ।

प्रणम्य कृष्णं प्रणतार्तिहारिणं
गुरूनपि स्वान् परमार्थरूपिणः ।
मया सहस्रीविवृतिर्विधीयते
कृपापि मन्दोपकृतिप्रसिद्धये ॥

सकलोपनिषदर्थसारसंग्राहिकामुपदेशसाहस्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारः चिकीर्षितस्य ग्रन्थस्य अविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनपरिलब्धादृष्टि(ष्ट)सिद्धये च विशिष्टेष्टदेवतातत्वानुस्मरणपूर्वकं तन्नमस्कारपूर्वकं मङ्गलाचरणं मुखतः सम्पादयन् तस्य शारीरकप्रेरणस्य तदीयमेवानुबन्धजातं सूचयति ॥ चैतन्येति ॥

॥ मू ॥ चैतन्यं सर्वगं सर्वं
सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं
तस्मै सर्वविदे नमः ॥”

End:

कूटस्थत्वादात्मनः प्रमातृत्वानुपपत्तौ फलसंबन्धो न सिध्यतीति यस्त्वन्यग्रहे निवारकमित्याशङ्कयाह ॥

प्रत्यर्थी० ॥

अन्तःकरणतत्परिणामौ यदाभासाधारौ तयोरात्मशेषत्वाज्जडत्वाच्च फलाश्र..... ... ।

Colophon: Sheet No. 68.

इत्यात्मज्ञेयप्रकरणं सप्तदशं विवृतम् ।

Subject: Upadeśasāhasrīvyākhyā Padayojanikā.

Remarks:—The Ms. is in a fairly good condition. On the title page is given:

तुलजामहाराजस्य पुस्तकम् ॥

There is a loose sheet at the end containing the following verses:

यत्पुण्यं लभते मर्त्यः कोटिब्राह्मणभोजने ।
तत्फलं समवाप्नोति ज्ञानिनं यस्तु भाषयेत् ॥

ज्ञानवन्तं यतिं यस्तु द्वेष्यते च नराधमः ।
स शुष्यमाणो म्रियते यस्मादीश्वर एव सः ॥

पुरा सृष्टेः शंभो परमसुखविज्ञानभरितः
त्वमेवाहं भूत्वाऽस्यनुभवसि दुःखानि बहुशः ।
अहं ब्रह्मास्मीति स्वगतमहिमानं स्मरसि चेत्
तदा मुक्तो भूयाः त्वयिजगदशेषं च विरमेत् ॥ १ ॥

धात्री बाले सतीनाथे पद्मपत्रमिवांभसि ।
दग्धसर्पौ यथाभाति रामराज्यं तथा कुरु ॥

आत्मानं विन्दते यस्तु सर्वभूतगुहाशयम् ।
श्लोकेन वा तदर्धेन क्षीणं तस्य प्रयोजनम् ॥

This Ms. has been transcribed in this library. Vide T. V. No. 425.

॥ उपदेशसाहस्रीव्याख्या—पदयोजनिका ॥

7213. UPADEŚASĀHASRĪVYĀKHYĀ—PADAYOJANIKĀ.

J. L. Collection No. 961.

Substance—Paper. Size—11¾ × 5⅓ inches. Sheets—56 (44-99). Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—3140. Author—Rāmatīrtha. Incomplete. Wants beginning. Printed.

Beginning:

॥ मूलम् ॥ आत्मबुद्धिमनश्चक्षुरालोकार्थादिसङ्करात् ।
भ्रान्तिस्स्यादात्मकर्तेति क्रियाणां सन्निपाततः ॥ १९ ॥

॥ व्या ॥....त्वाचैतत् त्रयं रज्वां दृष्टसर्पधारादिवदात्मनि ततोऽन्यत्र च नास्तीति ज्ञात्वा त्यजेद्विलापयेदात्मानं शोधयेदित्यर्थः ॥ १८ ॥

End, colophon—Same as No. 7209.

Subject : Upadeśapadyasandarbhavyākhyā; Padayojanikā.

From the 19th verse in the 16th Prakaraṇa up to the end.

Remarks: —The Ms. is in a fairly good condition. On the last sheet is given

'श्रीमद्गम्भीररङ्गभट्टगोस्वामिनां इदं पुस्तकम्' ॥

॥ उपदेशसाहस्रीव्याख्या—विवरणम् ॥

7214. UPADEŚASĀHASRĪVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 9657 a.

Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches. **Leaves**—148 (1-148). Lines—6 to a Page. Script—Telugu. No. of Granthas—4800. Author—Bodhanidhi. Complete. Padyaprabandha only. Not printed.

Beginning:

वन्दे वरप्रदमहं वरवारणेन्द्र-
वक्त्रं सदा क्षितिभृदीश्वरजातनूजं ।
विघ्नेश्वरं विबुधवन्दितपादपद्मं
संसारसंभवभयापहमानतोऽहम् ॥

शतमखपूजितपादं शतमखसहस्य(?) गोचाराकारं ।
सितजलरुहानिभनेत्रं सीतावामाङ्कमाश्रये रामम् ॥

विष्णुं पञ्चात्मकं वन्दे भक्त्या द्वादशभेदया ।
सांगवर्गोनविंशत्या भक्तैर्न.... पराश्रितम् ॥

मू० ॥ चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

व्या० ॥ चेतनमेव चैतन्यं ज्ञप्तिस्वरूपं सर्वगं स्वाविद्याकल्पितदिक्कालाकाशादिसर्वं व्याप्नोतीति सर्वगं । सर्वगमित्युक्ते परमार्थतः सर्वगं तदस्तीत्याशङ्का मा भूदित्याह सर्वमिति ।

End:

तस्मान्मुमुक्षुभिर्ब्रह्मात्मज्ञानार्थिभिः गुरुभक्तैर्देवताभक्तैश्च यत्नेन भवितव्यमित्येवं वाक्यवृत्त्यनुसारेण जन्मनाशप्रकरणस्य पदार्थविवरणं कृतं देवतागुरुभक्तिप्रेरितेन मया ।

इति सप्तदशश्लोकाः यतीन्द्रश्रीमुखोद्गताः ।
विवृता गुरुभक्तेन मया ब्रह्मावबोधकाः ॥

उपास्य श्रद्धया श्रीमत् विद्याधाममुनेश्चिरम् ।
श्रीमत्पदांबुजं तस्य प्रसादान्न स्वबुद्धितः ॥

येन मे निखिलाद्द्वैतादाकृष्य मन आत्मनि ।
स्थापितं मुनिमुख्येन यावज्जीवं नमामि तम् ॥

वक्त्राख्यसागरजयुक्तिमणीन् प्रकीर्णान्
प्राप्याधुना कतिपयान् कवयो भवन्ति ।
तस्मै नमो जनमनोऽब्जदिवाकराय
कृत्स्नागमार्थनिलयाय यतीश्वराय ॥

यत्पादकमलासंगान्निर्वाणं प्राप्तवानहम् ।
सर्वान्तरात्मपूज्यांस्तान् प्रणमामि गरीयसः ॥

Colophon:

इति श्रीमद्विद्याधामशिष्येण बोधनिधिना श्रद्धामात्रप्रेरितेन कृतमुपदेशग्रन्थविवरणं समाप्तं ।

Subject: Upadeśasāhasrīvyākhyāvivaraṇam. This is a commentary on the former part of Upadeśasāhasrī padyaprabandha only.

Remarks:—The Ms. is in a fairly good condition. This is another independent commentary on Upadeśasāhasrī.

The other works contained herein are—

1. Upadeśagranthavyākhyā (Prose-part).
2. Upadeśagrantha (Text only).

॥ उपदेशसाहस्रीव्याख्या—विवरणम् ॥

7215. UPADEŚASĀHASRĪVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 9863 a.

Substance—Palm leaf. Size—$16\times1\frac{1}{8}$ inches. Leaves—165 (1-165). Lines—7 to a Page. Script—Grantha. No. of Granthas—5500. Author—Bodhanidhi. Complete. Not printed.

Beginning:

चैतन्यप्रकरणम् ॥ चैतन्यं०

Same as No. 7214.

End, colophon and subject—Same as No. 7214.

Remarks:—The Ms. is in good condition. For the other works contained herein see under No. 7205.

॥ उपदेशसाहस्रीव्याख्या—विवरणम् ॥

7216. UPADEŚASĀHASRĪVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue No. 9862. Page 90. Right column. **Substance**— Palm leaf. Size—18¾ × 1½ inches. **Leaves**——15 (236-250). Lines—16 to a Page. Script—**Telugu.** No. of Granthas—2000. Author—Bodhanidhi. Incomplete. Not Printed.

Beginning:

बोधज्ञानेन्द्रयोगीन्द्रपदपद्मरजोरविः ।
राजते मे हृदाकाशे तमोध्वान्तनिवर्तकः ॥
यो चैतन्यं सर्वगं०

Same as No. 7214.

End:

अमनस्क + वचः ।

अमनस्कस्य का चिन्ता + क्रियाकरणे प्राणरहितस्य का च बाह्यक्रिया ननु मनः प्राणरहितत्वं कुतोऽवगम्यते श्रुतेरित्याह— 'अप्राणो ह्यमनाः शुभ्र' इति श्रुतेः । वाक्यं यथार्थं कालादिरहितत्वादात्मनः । कालादिमव्यपेक्षत्वाच्च क्रियाया अनात्मविदः क्रियोपपद्यत इत्याह ।

Colophon: Leaf 246.

अचक्षुष्वादित्र्यस्य विवरणम् ॥

Subject: Upadeśasāhasrīvyākhyā Vivaraṇa Padyaprabandha; from the beginning up to the 38th verse in the Svapnasmṛtiprakaraṇa.

Remarks:—The Ms. is in good condition.

॥ उपदेशसाहस्रीव्याख्या—विवरणम् ॥

7217. UPADEŚASĀHASRĪVYĀKHYĀ—VIVARAṆAM.

Burnell's Catalogue. No. 9879b.

Substance—Palm leaf. **Size**—12⅜×1½ inches. **Leaves**—26 (1-26). **Lines**—9 to a Page. **Script**—Grantha. **No. of Granthas**—500. **Author**—Bodhanidhi. Incomplete. Not printed.

Beginning:

…पुण्यपापलक्षणैर्यथा…ब्रह्मात्मावित् जीवन्नेव कृतकृत्यो भवतीत्यर्थः ॥ १४ ॥

इति दृशिस्वरूपाविवरणम् ।

* * *

मू ॥ ईक्षितृत्वं स्वतस्सिद्धं जन्तूनां भोक्तृतान्विता ।

(च ततोऽन्यता)

अज्ञानादित्यतोऽन्यत्वं[स]सदसीति निवर्त्यते ॥

न्या । ईक्षितृत्वं चित्ररूपत्वम् ।

End:

ननु यद्यपि व्यतिरिक्तोऽहं * * *

तत्सम्बन्धस्यापि साक्षित्वादित्याह-

अहंक्रियाद्याहि समस्तविक्रिया * * *

(स) कर्तुका कर्म (फलेन संहता) ।

Colophon: (Leaf 21)

अचक्षुष्ट्वादित्यस्य विवरणम् ॥

Subject: Upadeśasāhasrīvyākhyā Vivaraṇam. This Ms. contains from ईक्षितृत्वप्रकरण to the नान्यदत्यत् प्रकरण । But there is some disorder in the arrangement of the leaves and the Svapnasmṛtiprakaraṇa is found at the end.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Upadeśasāhasrīvyākhyā.

॥ उपदेशसाहस्रीव्याख्या ॥

7218. UPADEŚASĀHASRĪVYĀKHYĀ.

Burnell's Catalogue No. 9888b.

Substance—Palm leaf. Size—$12\frac{3}{4}\times1\frac{1}{2}$ **inches. Leaves—8** (12-19). Lines—9 to a Page. Script—Grantha. No. of Granthas—200. Author—?. Incomplete. Not printed.

Beginning:

....क्षाणो ब्रह्म....भवतीति सन्न्यासफलं ब्रह्मभावापत्तिं श्रावयित्वा पूर्वप्रसिद्धस्यैव सन्न्या........शेषगृहमेधीये विकृतावाज्यभागौ यजतीतिवत् मनसा वाचेति शब्देन इतराङ्गव्यावृत्त्यभिप्रायेण

* *

तस्मात्सन्न्यासो ज्ञानाङ्गमेव न श्रवणाङ्गम् । न श्रवणाद्यधिकारिविशेषणत्वं सन्न्यासस्येति युक्तमुत्पश्यामः ।

End:

बुद्ध्यादौ सत्युपाधौ च तथासत्यविशेषता ।
यस्य चेत्यात्मनो ज्ञाता तस्य कार्यः कथं भवेत् ॥ ३० ॥

बुद्धीन्द्रियादिदेहलक्षणे विद्यमाने जाग्रत्स्वप्नयोरुपाधौ तथा । असत्यविद्यमाने च सुषुप्ते निर्विशेषत(?)यस्य शास्त्राचार्यानुगृहीतस्यात्मनो ब्रह्मरूपस्यावगता वेदाचार्यद्वारेण वेदान्तवाक्या तदा कृतार्थोसौ तस्य करणीयः न किञ्चिदपि भवेत् । एवं...ष्टाभिर्विमर्श- कर्तव्यमित्याह ।।

Subject: Upadeśasāhasrīvyākhyā-Padyabhāga fragmentary; up to verse 30 in the Svapnasmṛtiprakaraṇa.

Remarks:—The Ms. is in a decaying condition. The other work contained herein is

'सिद्धान्ततत्त्वम् ।

॥ उपदेशसाहस्रीव्याख्या ॥

7219. UPADEŚASĀHASRĪVYĀKHYĀ.

Burnell's Catalogue No. 9879 a.

Substance—Palm leaf. Size—$12\frac{3}{4}\times1\frac{1}{2}$ inches. Leaves—13 (1-13). Lines—9 to a Page. Script—Grantha. No. of Granthas—220. Author—? Incomplete. Not printed.

Beginning:

....चेत्किं कुर्मः । न तु तावदाशान्त्यादिपदं श्रवणलक्षकम् । "सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणम्" इति व्यर्थोक्तेः वृद्धोक्तेः । ततश्च शमादयोत्तरवाक्ये विधीयश्चेन्त्य एत्वेषु(?) विधिरेव नास्तीति वदन्ति । तेषां कथं शमादीनां श्रवणमाङ्गत्वम् ।

End:

अत एव सप्तजन्मविप्रत्वप्रदे कर्मणि प्रारब्धे उत्पन्नतत्त्वज्ञानस्य पुनर्देहान्तरं जायते एव । प्रारब्धस्य ज्ञानेनानिवृत्तेः । आचार्यास्तु तदपि नेच्छन्ति कर्म हि नैकमेव प्रारब्धतामश्नुते । किं तु तत्तत्क्षणवृत्तिबह्वल्पसुखदुःखहेतुगुणालच्च कर्मणामनेकेषां प्रयाणकालोद्बुद्धवृत्तिकाणां प्रारब्धता एकेन........ ।

Colophon: Nil.

Subject: Upadeśasāhasrīvyākhyā.

Remarks:—The Ms. is in a fairly good condition. It wants both beginning and end. The other work contained herein is Upadeśasāhasrīvyākhyā-Vivaraṇam. This work has not been identified by Burnell.

॥ एकश्लोकीव्याख्या ॥

7220. EKAŚLOKĪVYĀKHYĀ.

Burnell's Catalogue No. 9829h.

Substance—Palm leaf. Size—9⅜ × 1⅛ inches. **Leaves**—10 (75-84). **Lines**—5 to a Page. Script—Grantha. No. of Granthas—60. Author—Svayamprakāśayati. **Complete.** Not Printed.

Beginning:

वेदा निश्वसितं यस्य पञ्चभूतानि वीक्षितम् ।
स्मितं चराचरं यस्य तं रामं शरणं भजे ॥

ब्रह्मा मङ्गलदेवता पतिरयश्चन्द्रार्धचूडोऽथवा
 व्यासश्रीशुक एव नूनमिति यो लोकैस्सदालोच्यते ।
कारुण्यामृतवारिधिन्त्रिजगतां कल्याणमूर्तिं गुरुं
 सेवे तारिताशिष्यवर्गमनिशं शोपालयोगीश्वरम् ॥

श्रीमद्गोपालयोगीन्द्रप्रसादादेव केवलम् ।
व्याख्यानमेकश्लोकस्य क्रियते स्वात्मदीपनम् ॥

इह खलु भगवान् सर्वज्ञः "अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् । षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरत्य-

गात् ॥ " इत्यादिगुणविशिष्टो भगवत्पादाभिधानो दुर्वादिदर्वीकरमन्त्रराजश्शङ्कराचार्यः तीर्थैरिव त्रिभुवनं पावयन् सद्वैद्यैरिव संरक्षयन् चान्द्रैरिवाप्याययन् कल्याणचरित्रै रत्नैरिवालङ्कुर्वन् शश्वद्विश्वं विचचार ॥ तत्र ग्रामविशेषे कूश्माण्डमिव पाण्डराङ्गमुलूकमिव सूर्यावलोकनाक्षमं लज्जया जनावलोकनाक्षमं त्राहि त्राहीति प्रणमन्तं कञ्चन कुष्ठिनं आलोक्य परमकारुणिकत्वेन तावदेनं संसारसङ्कटान्मोचयिष्यन् कृतार्थीकुर्यामिति निश्चित्य 'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्' इति कृतप्रतिज्ञापरिपालनार्थन्तथा चकार ॥

End:

नित्यबुद्धमुक्तस्वभावपरमानन्दब्रह्मैवाहमस्मीति ज्ञात्वा कृतकृत्यो भवेत् ॥

श्रवणमननशीलान्नित्यमन्ते निवासात्
गुरुवरमपि देव त्वन्मयं त्वत्प्रसादात् ।
निजसुखजलराशौ गाढमग्नो न जाने
किमिह वचनजालैस्त्वाञ्च सीतासमेतम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालयोगीन्द्रशिष्य श्रीमत्स्वयम्प्रकाशयतिना विरचितैकश्लोकव्याख्यानं
सम्पूर्णम् ॥

Subject : Ekaślokīvyākhyā, a commentary on Śaṅkara's Ekaślokī a single stanza said to have been addressed to a leper with a view to liberate him from the bondage of recurring births by imparting to him the knowledge of Vedānta.

Remarks :—The Ms. is in a fairly good condition. For the other work contained herein see remarks under No. 7739. For details about the author see under No. 7677. Ekaśloki is itself printed by Śri Vānī Vilās Press, Srirangam in the Memorial Edition.

॥ एकश्लोकीव्याख्या ॥

7221. EKAŚLOKĪVYĀKHYĀ.

Burnell's Catalogue No. 9914 d. Page 95. Right column. Substance—Palm leaf. Size—13×1 inches. Leaves—4 (32-35). Lines—7 to a Page. Script—Grantha. No. of Granthas—57. Author—Svayamprakāśayati. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7220.

Remarks:—The Ms. is in a fairly good condition.

For the other works contained herein, vide under No. 936 Vol. II.

॥ काशिकापञ्चकम् ॥

7222. KĀŚIKĀPAÑCAKAM.

S. S. Collection No. 37 b.

Substance—Paper. Size—10½ × 4½ inches. Sheet—1. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—8. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

ओं मनोनिवृत्तिः परमोपशान्तिः
सातीर्थवर्या मणिकर्णिका च ।
ज्ञानप्रवाहो विमला हि गङ्गा
सा काशिकाऽहं निजबोधरूपः ॥ १ ॥

यस्यामिदं कल्पितमिन्द्रजालं
चराचरं भाति मनोविलासम् ।
साच्चित्सुखैकं जगदात्मरूपं
सा का० ॥ २ ॥

पञ्चात्मकोशेषु विराजमाना
बुद्धिर्भवानी प्रतिदेहगेहे ।
साक्षी शिवः सर्वगतान्तरात्मा
सा का० ॥ ३ ॥

काश्या हि काश्यते काशी काशी सर्वप्रकाशका ।
सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥ ४ ॥

काशीक्षेत्रं शरीरं त्रिभुवनजननी व्यापिनी ज्ञानगङ्गा
भक्तिः श्रद्धा गयेयं निजगुरुचरणध्यानयोगः प्रयागः ।

विश्वेशो यत्तुरीयस्सकलतनुमनस्साक्षिभूतान्तरात्मा ।
देहे सर्वं मदीये हृदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥

Colophon: Nil.

Subject: Kāśikāpañcakam 1-5 ślokas.

Remarks:—The Ms. is in a fairly good condition.

This work is included in the printed work called Vedānta-stotra Sangraha published from Lucknow.

॥ कौपीनपञ्चकम् ॥

7223. KAUPĪNAPAÑCAKAM.

S. S. Collection No. 67 e.

Substance—Paper. Size—10 × 4½ inches. Sheet—1 (3rd). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

वेदान्तवाक्येषु सदा रमन्तः
भिक्षान्नमात्रेण च तुष्टिमन्तः ।
अशोकवन्तः करुणैकवन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥

End:

पञ्चाक्षरं पावनमुच्चरन्तः
पतिं पशूनां हृदि भावयन्तः ।
भिक्षाशिनो दिक्षु परिभ्रमन्तः
कौपीनवन्तः खलु भाग्यवन्तः ॥ ५ ॥

Colophon:

इति श्रीशङ्कराचार्यविरचितं कौपीनपञ्चकं समाप्तम् ॥

Subject: Kaupīnapañcakam.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are a. Śivastotra; b. Śaṅkara's Vijñānansukā, and c. Upadeśapañcaka. This work is published in many places including the Srī Vāṇi Vilas Press, Srirangam, under the name Yatipañcakam.

॥ कौपीनपञ्चकम् ॥

7224. KAUPĪNAPAÑCAKAM.

P. A. Collection No. 78 a.

Substance—Paper. Size—$7\frac{3}{4}\times4$ inches. Sheet—1. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—Śaṅkarācārya. Complete. Not printed.

Beginning, end and subject—Same as No. 7223.

Colophon: Nil.

Subject: Kaupīnapañcaka.

Remarks:—The Ms. is in good condition. The other works contained herein are Māyāpañcaka and Pādukāpañcaka.

॥ चिदानन्दात्मकस्तोत्रम् ॥

7225. CIDĀNANDĀTMAKASTOTRAM.

Burnell's Catalogue No. 8879. Page 202. Left column.

Substance—Paper. **Size**—4⅛ × 2¼ **inches**. **Sheets**—6. **Lines**—5 to a Page. **Script**—Devanāgarī. **No. of Granthas**—15. **Author**—Śaṅkarācārya **Complete**. **Not printed.**

Beginning:

तदा नैव बालो युवा भोगलोलो
तदा नैव वृद्धो समासीनकालः ।
न वा साधुशीलोऽन्यथाऽसाधुशीलः
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ १ ॥

तदा नो जीवो वा (नों न जीवो) शिवो नापि कर्ता
तदा नैव भोक्ता न भर्ताऽनुमन्ता ।
तदा नो विरिञ्चिर्विधिर्नापि विष्णुः
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ २ ॥

तदा नापि बद्धो न मुक्तो न रागी
निरागी न सङ्गी तदा नो वियोगी ।
न भोगी न योगी न संसाररोगी
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ ३ ॥

तदा नापि जाग्रत्सुषुप्तिर्न चास्ति
न वा स्वप्न (ए)षां तुरीयापि काचित् ।
न वा चोन्मनीनो गता भाति यस्मिन्
चिदान्दसिन्धौ यदाहं निमग्नः ॥ ४ ॥

तदा नैव सूक्ष्मं महास्थूलमेकं
न चाजंगमं जङ्गमं कापि किंचित् ।

न कर्माणि धर्मोऽप्यधर्मो न कश्चित्
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ ५ ॥

तदा कामिनी नैव कामी न कामो
न वा क्लीव.... त्ये च वर्णाश्रमादि ।
न वा शिष्यवर्गो गुरुर्वा न चास्ते
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ ६ ॥

तदा ना... नं प्राणरोधो निरोधो
न चाकारणा नो तथोद्धारणा नो ।
न वा ध्यानमेकं समाधिर्न कश्चित्
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ ७ ॥

तदा नाप्यभेदो न खेदो न बोधो
न चाबोधयत्नो(?)विनोदो न खेदः ।
अहो नो मुकुन्दो न चानन्दकन्दो
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ ८ ॥

तदा न स्मृतिर्विस्मृतिर्नो बहिर्नो
तथा नान्तरो साधको नापि सीधा ।
असिद्धो न सिद्धो न चासुधयेष्टां (?)
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ ९ ॥

तदा नैव क्लिष्टो न तुष्टो न किंचित्
न चाकिंचिदेवेति कोटिद्वयेन ।

यथा वस्तुतोऽहं तथेशोऽस्मि सिद्धः
चिदानन्दसिन्धौ यदाहं निमग्नः ॥ १० ॥

Colophon:

इति श्रीपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिते चिदानन्दात्मक-
स्तोत्रं सम्पूर्णम् ॥

Subject: Cidānandātmakastotram.

Remarks:—The Ms. is in good condition though full of scriptorial blunders.

This is a work ascribed to Śaṅkara by the colophon and not printed anywhere. Though the title calls it Aṣṭakam it contains ten verses. All of them are given in full.

॥ ज्ञानसंन्यासः ॥

7226. JÑĀNASANYĀSAḤ.

Burnell's Catalogue No. 6471. Page 91. Left coulmn. Substance—Paper. Size—4½×8 inches. Sheets—7. Lines—7-8 to a Page. Script—Devanāgarī. No. of Granthas—41. Author—Śaṅkarācārya. Complete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ।

वहिरन्तास्थितं देवमात्मानं परमेश्वरम् ।
दृश्यादृश्यादिसद्रूपं विश्वमेकं नमाम्यहम् ॥ १ ॥

यतीनामुत्तमाचरो मोक्षसाधनरूपकं ।
मोहपाशविनिर्मुक्तो देहं त्यजान्ति(ति) हृ(हि) ध्रुवम् ॥ २ ॥

End:

आत्माकाशादिवत्पूर्णो देशकालादिवर्जितः ।
अज्ञानकार्यरहितं अघनशातिते वृतम्(?) ॥ ४० ॥

एकोऽपि तु जगत्सर्वं एकमाकाशमालयम् ।
ईश्वरस्य गृहं विश्वं कृतसीमानुलंघनम् ॥ ४१ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिते
ज्ञानसन्यासः समाप्तः ॥

Subject: Jnānasanyāsa, in 40 verses.

Remarks:—The Ms. is in excellent condition. This Ms. is full of scriptorial blunders. This work is ascribed to Śankara but not printed any where as such.

॥ दाक्षिणामूर्त्यष्टकम् ॥

7227. DAKṢIṆĀMŪRTYAṢṬAKAM.

Burnell's Catalogue No. 12713.

Substance—Paper. Size—4½ × 2⅝ inches. Sheets—4. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—25. Author—Śankarācārya. Complete. Printed.

Beginning:

श्रीसाम्बसदाशिवाय नमः ॥

विश्वन्दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।

यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

End:

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥

Colophon:

दक्षिणामूर्त्यष्टकं सम्पूर्णम
शङ्कराचार्यकृतं दक्षिणामूर्त्यष्टकम् स्तोत्रम् ॥

Subject: Dakṣiṇamūrtyaṣṭakam a Vedāntic poem 1-11 ślokas.

Remarks:—The Ms. is in good condition, This work is very familiar and is published in all parts of India, sometimes with translation also.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7228	B. L. 8490	Paper.	5⅜×3	5	6	Devanāgarī.	Complete;
7229	,, 8564	,,	4½×3¾	4 (59-62)	8 or 9	,,	,,
7230	,, 8937	,,	8½×9¾	1 (232nd)	20	,,	,,
7231	,, 12064	Palm leaf.	8½×1¼	4 (38-41)	6	Grantha.	,,
7232	,, 12234	,,	11½×1¼	4	5	,,	,,
7233 Not noticed by Burnell	Ms. No. 12719 a	Paper.	5×3½	2	8	Devanāgarī.	,,
7234	,, 12720	,,	5½×3½	3	8	,,	,,
7235	,, 12721 a	,,	7¾×4¼	3	10	,,	,,
7236	,, 12725	,,	4⅞×2⅞	5	6	,,	,,
7237	,, 18496	,,	6½×3½	5	6	,,	,,

DAKṢIṆĀMŪRTYAṢṬAKAM (Contd.)

Descriptive No.	Collection No.		Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7238	,,	13497	Paper.	6½×3⅝	8	6	Devanāgarī.	Complete.
7239	,,	13670 b	,,	4⅝×2¼	8 (3–5)	7	,,	,,
7240	J. L.	962	,,	5½×3¾	5	6	,,	,,
7241	,,	963	,,	5×3¼	4	7	,,	,,
7242	T. S.	883	,,	5×8	4	8	,,	,,
7243	S. K.	808	,,	8½×6	2	13	,,	,,
7244	G. K. D.	186	,,	8×4½	2	8	,,	,,
7245	,,	187	,,	4½×3	8	4	,,	,,
7246	,,	209	,,	9×3½	3	6	,,	,,
7247	,,	215	,,	11×4½	2	8	,,	,,
7248	J. L.	964	,,	4¼×8½	2	10	,,	Incomplete 1–6 Slokas.

DETAILED REMARKS
on the
DAKṢINĀMŪRTYAṢṬAKA MSS.

7233 The other work contained herein is Abhilāṣāṣṭakam.

7235 This Ms. contains one more additional verse at the end as follows:

' स्फटिकरजतवर्णैर्मौक्तिकैरक्षमालां
कलशममृतविद्यां ज्ञानमुद्रां कराग्रात् ।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं
विविधरुचिरभूषं दक्षिणामूर्तिमीडे ' ॥

7236 After the colophon is given—

नमः शिवाय साम्बाय सगणाय ससूनवे ।
सनन्दिने सगङ्गाय सवृषाय नमो नमः ॥

॥ दक्षिणामूर्तिस्तोत्रव्याख्या—मानसोल्लासः ॥

7249. DAKṢIṆĀMŪRTISTOTRAVYĀKHYĀ—MĀNASOLLĀSAḤ.

Burnell's Catalogue No. 6452. Page 91. Right column. Substance—Paper. Size—10 × 4¼ inches. Sheets—28. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—850. Author—Sureśvara. Complete. Printed.

Beginning:

ओं नमः श्रीगणाधिपतये ।

आत्मलाभात्परो लाभो नास्तीति कवयो विदुः ।
तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरम् ॥
स्वेच्छया सृष्टमाविश्य विश्वं यो मनसि स्थितः ।
स्तोत्रेण स्तूयतेऽनेन स एष परमेश्वरः ॥
अस्ति प्रकाशत इति व्यवहारः प्रवर्त्तते ।

End:

अन्तर्लक्ष्यविलीनचित्तपवनो योगी सदा वर्तते
यावन्निश्चलतां गमिष्यति तदा स्वात्मन्यवस्थोच्यते ।
मुद्रा सैव हि खेचरीति कथिता यस्य प्रसादाद्गुरोः
भावाभावविवर्जितं स्फुरति तत्तत्त्वं भजे शांभवम् ॥ २१ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यशंकरभगवत्पादाचार्यविरचित
दक्षिणामूर्तिस्तोत्रभावार्थप्रतिपादकसुरेश्वराचार्यविरचिते
मानसोल्लासे दशमोल्लासः समाप्तः ॥

Sudject: Dakṣiṇāmūrtistotravyākhyā known as Mānasollāsā 1–10 Ullāsās; with text.

Remarks:—The Ms. is in a fairly good condition. On the title page is given

हे पुस्तक + काशीदेशाहुन + अणिलें असें ।

This Ms. is edited and published by **A. Mahādevaśāstri** Adyar. It contains the text, commentary and English translation.

॥ दक्षिणामूर्तिस्तोत्रव्याख्या–मानसोल्लासः ॥

7250. DAKṢIṆĀMŪRTISTOTRAVYĀKHYĀ–MĀNASOLLĀSAḤ.

J. L. Collection No. 965.

Substance—Paper. Size—10 × 4½ inches. Sheets—14. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Sureśvara. Incomplete. Printed.

Beginning—Same as No. 7249.

End :

महामेरुसमानस्य समुद्धरणकर्माणि ।
अत्यल्पतुल्यमूलत्वलघिमा चेति कल्पनम् ॥ ४७ ॥

स्वशरीरप्रकाशेन सर्वथा.........
प्राकाम्यामिदमैश्वर्यमिति केचित्प्रचक्षते ॥

स्वेच्छामात्रेण लोकानां सृष्टिस्थित्यन्तकल्पना ।

Colophon: (Sheet 2)

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके प्रबन्धे **मानसोल्लासे** प्रथमोल्लाससंग्रहः ।

Subject: Dakṣiṇāmūrtistotravyākhyā otherwise known as Mānasollāsa.

Remarks:—The Ms. is in a bad condition and wants a few lines at the end.

॥ दक्षिणामूर्तिस्तोत्रव्याख्या—मानसोल्लासः ॥

7251. DAKṢIṆĀMŪRTISTOTRAVYĀKHYĀ—MĀNASOLLĀSAḤ.

J. L. Collection No. 966.

Substance—Paper. Size—9¼ × 4 inches. Sheets—24 (2-25). Lines—9 to a page. Script—Devanāgarī. No. of Granthas—345. Author—Sureśvara. Incomplete. Printed.

Beginning:

मू ॥...दृश्यमाननगरीतुल्यं × दक्षिणामूर्तये ॥

अस्यार्थः ॥

अन्तरस्मिन्निमे लोका अन्तर्विश्वमिदं जगत् ।
बाहिर्वन्मायया भाति दर्पणे प्रतिबिम्बवत् ॥

End, colophon and subject—Same as No. 7249.

Remarks:—The Ms. is in a decaying condition.

॥ दक्षिणामूर्त्यष्टकव्याख्या—तत्त्वसुधा ॥

7252. DAKṢIṆĀMŪRTYAṢṬAKAVYĀKHYĀ—TATTVASUDHĀ.

G. K. D. Collection No. 250.

Substance—Paper. Size—12 × 5 inches. Sheets—18. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Svayamprakāśayati. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

मौनव्याख्या + दक्षिणामूर्तिमीडे ॥ १ ॥

कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ ।
नत्वारभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारो लोकानुग्रहैकप्रयोजनकृतशारीरपरिग्रहः सकलवेदान्तदुग्धोदधौ न्यायमन्दरेण विचारनिर्मथनादाविर्भूताद्वैतामृतस्य विन्यासकलशभूतं दक्षिणामूर्तिस्तोत्रं सकललोकानुजिघृक्षया भोक्तृजीवभोग्यजगद्भोगप्रदपरमेश्वरमोक्षप्रदगुरूणामत्यन्ताभेदबोधकं सकृत्पाठश्रवणार्थमननादिमात्रेण परमपुरुषार्थप्रापकमारभमाणः तस्य वेदान्तसारभूतनवनीतपिण्डात्मकत्वेन तदीयविषयादिभिरेव तद्वृत्तासिद्धिमाभिप्रेत्यादौ प्रतीचः सकलजगदधिष्ठानत्वेन परमेश्वरतां दर्शयन् दक्षिणामुखं परमेश्वरं मनसा पूजयति–

॥ श्लोकः ॥ विश्वं दर्पण + दक्षिणामूर्तये ॥

End:

सर्वात्मत्वं × ऐश्वर्यमव्याहतं ॥ १० ॥

* * *

अव्याहतम् ॥ क्वचिदपि अप्रतिहतं सिध्येत् । स एकधा भवति त्रिधा भवति । स यदि पितृलोककामो

भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्तीत्यादि श्रुत्युक्तं सर्वं भवेदित्यर्थः ॥

एवमेषा कृता व्याख्या दक्षिणास्यामुखस्तुतेः ।
यथामति तया तुष्टो दक्षिणामूर्तिरस्तु नः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवल्यानन्दयोगीन्द्रपादकमलभृङ्गायमाणस्वयम्प्रकाशयतिना विरचिता दक्षिणामूर्तिस्तोत्रव्याख्या तत्त्वसुधाख्या सम्पूर्णा ॥

प्रमाथीवत्सरे चैव फाल्गुने चासिते तथा ।
समाप्तिमगमद्ग्रन्थः पञ्चम्यां स्थिरवासरे ॥

Subject: Dakṣiṇāmūrtistotra with vyākhyā called Tattvasudhā.

Remarks:—The Ms. is in a fairly good condition.

This author has written many works. For detailed remarks see under No. 7677.

॥ दक्षिणामूर्त्यष्टकव्याख्या—तत्त्वसुधा ॥

7253. DAKṢIṆĀMŪRTYAṢṬAKAVYĀKHYĀ—TATTVASUDHĀ.

Burnell's Catalogue No. 8847. Page 202. Left column. Substance—Paper. Size—$9\frac{3}{8} \times 4\frac{1}{8}$ inches. Sheets—20. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Svayamprakāśayati. Complete. Not printed.

Beginning, subject and remarks—Same as No. 7252.

End:

सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादि श्रुत्युक्तं
सर्वं भवेदित्यर्थः ॥

वटविटपि + छेददक्षं नमामि ॥ ११ ॥

चित्रं + न संशयः ॥ १२ ॥

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।

निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ १३ ॥

Colophon:

इति दक्षिणामूर्तिस्तोत्रम् ।

एवमेषा + अस्तु नः ॥

वामेन सीतां परिरभ्य बाहुना
वामाङ्कलग्नां दशि मुद्रया नुताम् ।
तत्त्वंकरेणोपादिशन्तमद्वयं
हनूमते दाशरथिं हरिं भजे ॥ ११ ॥

भास्वद्रत्नासनस्थं मणिनिकरलसत्सर्वहेमाद्रिभूषं
हैमाहीन्द्रत्रिसूत्रीविजितकटिलसत्वाचकौसुम्भचेलम् ।
सान्द्रानन्दं सुरक्ताभयवरदकरं स्मेरवक्त्रं त्रिनेत्रं
साङ्गं चन्द्रार्धमौलिं कटिमरकतकामन्द्रमूर्तिं भजामि ॥

इति श्रीमत्परमहंस + तत्त्वसुधाख्या समाप्ता ॥

Remarks: —The Ms. is in good condition.

॥ दक्षिणामूर्त्यष्टकव्याख्या— तत्त्वसुधा ॥

7254. DAKṢIṆĀMŪRTYAṢṬAKAVYĀKHYĀ—TATTVASUDHĀ.

T. S. Collection No. 179.

Substance—Paper. Size—11 × 4½ inches. Sheets—11. Lines—7 or 8 to a Page, Script—Devanāgarī. No. of Granthas— Author—Svayamprakāśa. Incomplete. Not printed.

Beginning and subject—Same as No. 7252.

End:

॥ मूलं ॥ राहुग्रस्त + मूर्तये ॥

* *

यथा राहुणा ग्रस्तो दिवाकरश्चन्द्रो वा स्फुटं न प्रकाशत इत्येता... ॥

Remarks:—The Ms. is in a fairly good condition.

॥ दाक्षिणामूर्त्यष्टकव्याख्या—तत्त्वसुधा ॥

7255. DAKṢIṆĀMŪRṬYAṢṬAKAVYĀKHYĀ—TATTVASUDHĀ.

G. K. D. Collection No. 185.

Substance—Paper. Size—8¼ × 4 inches. Sheets—11. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Svayamprakāśayai. Incomplete. Not printed.

Beginning:

मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥ १ ॥

Same as No. 7252.

End, colophon and subject—Same as No. 7252.

Remarks:—The Ms. is in good condition. It requires a few words alone at the end.

॥ दशश्लोकी ॥

7256. DAŚAŚLOKĪ.

Burnell's Catalogue No. 8880. Page 202. Left column. Substance—Paper. Size—4¾×3½ inches. Sheets—3. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—15. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

न भूमिर्न तोयं न तेजो न वायुः
न खं नेन्द्रियं न(नैव) तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्यैकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥

End:

न चैकन्तदन्यद्द्वितीयं कुतस्स्यात्
न वा केवलत्वं न चाकेवलत्वम् ॥

न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥

Colophon:

इति श्री निर्वाणदशकम् ॥ श्रीशङ्कराचार्यविरचितं दशश्लोक-
[ानि] शिवस्तोत्रम् सम्पूर्णम् ॥

Subject: Nirvāṇadaśakam otherwise known as Daśaślokī a poem which describes Ātman by a process of elimination 1-10 slokas.

Remarks:—The Ms. is in a fairly good condition. This work is published by Śri Vāni Vilās Press, Srirangam in the Memorial edition and also with an English translation by S. Venkataramanan at Madras. This work is otherwise known as Daśaślokī.

DAŚAŚLOKĪ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7257	B. L. 8881	Paper.	4⅛3×⅜	3	8	Devanāgarī.	Complete
7258	„ 8987	„	8½×9¾	2 (194 & 195)	20	„	„
7259	„ 12252	Palm leaf.	8×1¼	3 (99-101)	?	„	„
7260	Ms. Not noticed by Burnell No. 12786	Paper.	8½×2¼	?	?	„	„
7261	„ 13549	„	9½×4	2	9	„	„
7262	„ 13569	„	9×4¼	1	12	„	„
7263	„ 13573	„	8×4	2	9	„	„
7264	„ 13574	„	8×5	2	9	„	„
7265	„ 13575	„	10×5	2	8 or 9	„	„
7266	„ 13576	„	7½×4⅛	1	14	„	„

DAŚAŚLOKĪ (Contd.)

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7267	,, 13580	Paper.	5½×8¼	4	8	Devanāgarī.	Complete.
7268	,, 15566 k.	Palm leaf.	15¾×1	1 (49th)	6	Telugu.	,,
7269	T. S. 968	Paper.	8×4	2	8	Devanāgarī.	,,
7270	P. A. 9	,,	7×5¼	1 (4th)	15	,,	,,
7271	S. S. 37 a.	,,	10½×4½	1	10	,,	,,
7272	J. L. 956 f.	,,	11½×4¾	1 (4th)	9	,,	,,

DETAILED REMARKS

on the

DAŚAŚLOKĪ MSS.

7263 & 4 Colophon—

इति हस्तामलकस्तोत्रं सम्पूर्णम् ॥

7267 There is an additional verse given at the beginning—

'देहबुध्या तु दासोऽहं जीवबुद्ध्या तदंशकः ।
आत्मबुद्धया त्वमेवाहं इति मे निश्चला मतिः ॥'

And also at the end—

'यथा वेदद्दष्टैव ते सूतकार्यै-
....बुद्धिशुक्रघते सूतकीर्ति ।
तथा वेदवेद्यं विशुद्धात्मकत्वं
स्वकीयं ग्रहं तं विवादं कथन्ते ॥'

Colophon:

इति मर्पयसंवादे एकादशस्तोत्रं सम्पूर्ण ॥
श्रीवसिष्ठार्पणमस्तु ॥

हृदयकमलमध्ये सूर्यबिम्बासनस्थं
सकलभुवनबीजं सृष्टिसंहारहेतु ।
निरतिशयसुहंसामात्मजोतशिरूपं
विततभुवनवन्ति चिन्तयेदात्मरूपम् ॥

7268 The marginal note calls the work Siddhāntabinduprakaraṇa. For the other works contained herein see remarks under No. 7189.

7271 The other work contained herein is **Kāśikāpañcakam.**

7272 For the other works contained herein see **remarks** under No. 7140.

॥ द्वादशमञ्जरी ॥

7273. DVĀDAŚAMAÑJARĪ.

Burnell's Catalogue No. 9858 c.

Substance—Palm leaf. Size—11½ × 1¼ inches. Leaves—2 (2 & 3) at the end. Lines—7 to a Page. Script—Grantha. No. of Granthas—15. Author—Śaṅkarācārya. **Complete.** Printed.

Beginning:

मूढ जहीहि धनागमतृष्णाम् ।
कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तम् ॥ १ ॥

End:

द्वादशमञ्जारिकाभिरशेषः
शिष्याणां कथितो ह्युपदेशः ।
येषां नैव करोति विवेकं
ते पच्यन्ते नरकमनेकम् ॥ १३ ॥

Colophon: Nil.

Subject: Dvādaśamañjarī a vedāntic poem 1-13 ślokas.

Remarks:—The Ms. is in good condition. For the other works contained herein see remarks under No. 7173. The whole work Mohamudgara of which this is a part is very familiar and published under the name of Bhajagovindam also.

DVĀDAŚAMAÑJARĪ.

Descriptive No.	Collection No.	Substance.	Size inches.	No. of Sheets or leaves.	No. of Lines per Page or sheet.	Script.	Complete or otherwise.
7274	B. L. 10309 a	Palm leaf.	[illegible]½ × 1½	1	8	Grantha.	Complete.
7275	Not noticed by Burnell. Ms. No. 12048 f	,,	14⅞ × 1¼	1	6 or 7	,,	,, The order of verses is different in this Ms.
7276	,, 15566 c	,,	15¾ × 1½	1 (43rd)	6	Telugu.	,,
7277	,, 15566 e	,,	15¾ × 1½	2 (44th & 45th)	6	Grantha.	,,
7278	J. L. 956 d	Paper.	11½ × 4¾	1 (3rd)	12	Devanāgarī.	,,
7279	B. L. 12254 e	Palm leaf.	11½ × 1¼	3	5	Grantha.	Incomplete.

DETAILED REMARKS

on the

DVĀDAŚAMAÑJARĪ MSS..

7274 There is an additional verse given at the beginning.

‘ परमार्थैकसत्यन्त्वां प्रज्ञानानन्दसद्घनम् ।
आश्रये दक्षिणामूर्तिं अवाङ्मनसगोचरम् ॥’

After the colophon is given a loose verse:—

वासुदेवञ्च माञ्चैव भिन्नं पश्यन्ति ये नराः ।
न तैः पूजितवानस्मि क्रकचैर्दारितोऽस्म्यहम् ॥’

7275 The works contained herein are:—

1. ललितासहस्रनामावली
2. आत्मरक्षामन्त्रः
3. गणेशाथर्वशिरस्
4. शरभमन्त्रः
5. Do मन्त्रान्तरम्
6. द्वादशमञ्जरिकास्तोत्रम्
7. अथर्वणभद्रकालीमन्त्रः
8. प्रत्यङ्गिरामन्त्रः
9. चित्रमालामन्त्रः
10. भैरवमन्त्रः
11. Do मन्त्रान्तरम्
12. ललितासहस्रनामावली

7277 The works contained herein are:—

1. ...पूजाकल्पः
2. ?
3. द्वादशमञ्जरी
4. अद्वैतपञ्चरत्नम्
5. द्वादशमञ्जरी
6. उपदेशपञ्चरत्नम्
7. हस्तामलकस्तोत्रम
8. मनीषापञ्चकम्
9. शुकाष्टकम्
10. दशश्लोकी
11. सप्तर्षिस्तोत्रम्
12. निर्वाणषट्कम्

7278 For other works contained herein see remarks under No. 7140.

7279 For other works contained herein see remarks under Subhāṣita ślokas.

॥ द्वादशमहावाक्यविवरणम् ॥

7280. DVĀDAŚAMAHĀVĀKYAVIVARAṆAM.

T. S. Collection No. 131.

Substance—Paper. Size—10×4¼ inches. Sheets—27. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Śaṅkarācārya. Complete. Not printed.

Beginning:

श्रीगुरु सज्जनानन्दतीर्थाय नमः ।

अथ द्वादशमहावाक्यविवरणो विधीयते ॥

तत्र परमहंसस्याधिकारः ॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
शब्दैकरूपरूपाय विष्णवे प्रभविष्णवे ॥ १ ॥

जगदङ्कुरकन्दाय सच्चिदानन्दमूर्तये ।
गलिताखिलभेदाय नमश्शान्ताय वेधसे ॥ २ ॥

यदबोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥ ३ ॥

परमहंसः कीदृक् । समस्तविषयवासनाविनिर्मुक्तः स हंसः । केवलनिर्विशेषब्रह्मचिन्तनमात्रोऽवतिष्ठति स परमहंसः ॥ ❀

नतु महावाक्यं कीदृक्

End:

परापश्यन्तीमध्यमावैखरीरूपेण अव्ययमयी ब्रह्मशब्दं ब्रह्मस्वरूपेण आत्मानं अभिव्यक्तीकरोति अथर्वणवेदात्सांख्यदर्शनपातञ्जलदर्शनं उपदर्शनमन्त्रशास्त्राणीति संक्षेपात् । ब्रह्मस्वरूपनिरूपणं वेदान्तप्रकरणे अथर्वणवाक्यता ब्रह्मशब्दयोनाम (?) त्रयोदशसिद्धान्तः ।

Colophon:

इति श्रीमत्परमहंसंपरिव्राजकाचार्यश्रीमच्छंकरभगवतःकृतौ द्वादशमहावाक्यविवरणम् सम्पूर्णम् ॥

Subject: Dvādaśamahāvākyavivaraṇam.

Remarks:—The Ms. is in a fairly good condition. The colophon ascribes the work to Śaṅkara.

॥ निरञ्जनाष्टकम् ॥

7281. NIRAÑJANĀṢṬAKAM.

Not noticed by Burnell Ms. No. 12655.

Substance—Paper. Size—$7\frac{1}{4} \times 4$ inches. Sheet—1. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

श्रीगणेशाय नमः ।

स्थानं न मानं न च नादबिंबं
रूपं न रेखा न च धातुवर्णम् ।
दृष्टे न दृष्टा श्रुत्वे न श्रुत्वा(?)
तस्मै नमो ब्रह्मनिरञ्जनाय ॥ १ ॥

वृक्षं न मूलं न च बीजकूलं
शाखा न पत्रं न च वेलिपल्लवम्(?) ।
पुष्पं न गंधंनलं न ध्या...(?)
तस्मै नमो ब्रह्मनिरञ्जनाय ॥ २ ॥

End:

गंभीरधीरं निर्वाणशून्यं
संसारसारं न च पापपुण्यम् ।
वक्ते न वक्ता न च भेदभिन्नं
तस्मै नमो ब्रह्मनिरञ्जनाय ॥ ८ ॥

Colophon:

इति श्रीशंकराचार्यविराचितं निरञ्जनाष्ठकस्तोत्रं सम्पूर्णम् ।

Subject: Nirañjanāṣṭakam.

Remarks:—The Ms. is in good condition. But it is full of scriptorial blunders. This work is published in Vedāntastotrasaṃgraha by Paramānanda with a Hindi interpretion at Bombay.

॥ निरञ्जनाष्टकम् ॥

7282. NIRAÑJANĀṢṬAKAM.

Burnell's Catalogue No. 8478. Page 198. Right column. Substance—Paper. Size—9¼×4 inches. Sheets—2. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—10. Author—Śaṅkarācārya. Complete. Printed.

Beginning:

स्थानं न मानं न च नादबिन्दु
रूपं न रेखा न च धातुवर्णम् ।
दृष्ट्वा न दृष्ट्वा न श्रुतं न श्रुत्वा
तस्मै नमो देव निरञ्जनाय ॥

End:

सगरेण पङ्कं नगरेण क्षत्रं
जातिर्न कुलं न च भेदभेदम् ।
भिन्नन्न भिन्नं न पृथक् न पृथ्वी
तस्मै नमो देव निरञ्जनाय ॥

Colophon:

